CC-O. In Public Domain. Digitized by eGangotri

ॐ श्रीपरमात्मने नमः

मत्स्य-पुराण

[अंतिमखण्ड]

Sri Vidyabharathi Book Centre, Sringeri

हरे राम हरे राम राम राम हरे हरे। हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ॥

CC-0. In Public Domain. Digitized by eGangotri

(संस्करण १,७०,०००)

विषय-सूची

कल्याण, सौर फाल्गुन, श्रीकृष्ण-संवत् ५२१०, फरवरी १९८५

अध्याय विषय	पृष्ठ-संख्या
सहज कृपामय भगवान् विष्णु [कविता] ...	८९७
२२८—अद्भुत शान्तिका वर्णन ...	९१२
२२९—उत्पातोंके भेद तथा कतिपय ऋतुस्वभावजन्य शुभदायक अद्भुतोंका वर्णन ...	९१४
२३०—अद्भुत उत्पातके लक्षण तथा उनकी शान्तिके उपाय ...	९१६
२३१—अग्निसम्बन्धी उत्पातके लक्षण तथा उनकी शान्तिके उपाय ...	९१७
२३२—वृक्षजन्य उत्पातके लक्षण और उनकी शान्तिके उपाय ...	९१८
२३३—वृष्टिजन्य उत्पातके लक्षण और उनकी शान्तिके उपाय ...	९२०
२३४—जलाशयजनित विकृतियाँ और उनकी शान्तिके उपाय ...	९२१
२३५—प्रसवजनित विकारका वर्णन और उसकी शान्ति ...	९२१
२३६—उपस्कर-विकृतिके लक्षण और उनकी शान्ति ...	९२२
२३७—पशु-पक्षी-सम्बन्धी उत्पात और उनकी शान्ति	९२२
२३८—राजाकी मृत्यु तथा देशके विनाशसूचक लक्षण और उनकी शान्ति ...	९२४
२३९—ग्रहयोगका विधान ...	९२५
२४०—राजाओंकी विजयार्थ यात्राका विधान ...	९२८
२४१—अङ्गस्फुरणके शुभाशुभ फल ...	९३०
२४२—शुभाशुभ स्वप्नोंके लक्षण ...	९३२
२४३—शुभाशुभ शकुनोंका निरूपण ...	९३४
२४४—वामन-प्रादुर्भाव-प्रसङ्गमें श्रीभगवान्-द्वारा अदितिको वरदान ...	९३६
२४५—बलिद्वारा विष्णुकी निन्दापर प्रह्लादद्वारा उन्हें शाप, बलिका अनुनय, ब्रह्माजीद्वारा वामनभगवान्‌का स्तवन, भगवान् वामनका देवताओंको आश्वासन तथा उनका बलिके यज्ञके लिये प्रस्थान ...	९४१

चित्र-सूची

१—भगवान् मत्स्य (रेखा-चित्र) आवरण-पृष्ठ

२—भगवान् श्रीहरिद्वारा गजेन्द्रका उद्धार (रंगीन चित्र) मुख-पृष्ठ

प्रत्येक साधारण अङ्कका मूल्य
भारतमें १.०० रु०
विदेशमें १० पेंस

जय विराट् जय जगत्पते । गौरीपति जय रमापते ॥

कल्याणका वार्षिक मूल्य
भारतमें २४.०० रु०
विदेशमें ६०.०० रु०
(४ पौण्ड)

संस्थापक—ब्रह्मलीन परमश्रद्धेय श्रीजयदयालजी गोयन्दका

आदिसम्पादक—नित्यलीलालीन भाईजी श्रीहनुमानप्रसादजी पोद्दार

सम्पादक—राधेश्याम खेमका

गोविन्दभवन-कार्यालयके लिये जगदीशप्रसाद जालानद्वारा गीताप्रेस, गोरखपुरसे मुद्रित तथा प्रकाशित

[भारत-सरकारद्वारा उपलब्ध कराये गये रियायती मूल्यके कागजपर मुद्रित]

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri



भगवान् श्रीहरिद्वारा गजेन्द्रका उद्धार

Sri Vidyabharathi Book Centre, Sringeri

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

CC-0. In Public Domain. Digitized by eGangotri

कल्याण

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते म्लेच्छान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥

वर्ष ५९ } गोरखपुर, सौर फाल्गुन, श्रीकृष्ण-संवत् ५२१०, फरवरी १९८५ ई० { संख्या २
पूर्ण संख्या ६९९

सहज कृपामय भगवान् विष्णु

हरि-सम आपदा-हरन ।
नहिं कोउ सहज कृपालु दुसह दुख-सागर-तरन ॥ १ ॥
गज निज बल अवलोकि कमल गहि गयो सरन ।
दीन बचन सुनि चले गरुड़ तजि सुनाभ-धरन ॥ २ ॥
द्रुपदसुताको लग्यो दुसासन नगन करन ।
'हा हरि पाहि' कहत पूरे पट बिबिध बरन ॥ ३ ॥
इहै जानि सुर-नर-मुनि-कोविद सेवत चरन ।
तुलसिदास प्रभु को न अभय कियो नृग उद्धरन ॥ ४ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

वर्णानामानुपूर्व्येण त्रयाणामविशेषतः । अकार्यकारिणः सर्वान् प्रायश्चित्तानि कारयेत् ॥ ३३ ॥
अमत्या च प्रमाप्य स्त्रीं शूद्रहत्याव्रतं चरेत् । दानेन च धनेनैकं सर्पादीनामशक्नुवन् ॥ ३४ ॥
एकैकं स चरेत् कृच्छ्रं द्विजः पापापनुत्तये । फलदानां च वृक्षाणां छेदने जप्यमृक्शतम् ॥ ३५ ॥
गुल्मवल्लीलतानां च पुष्पितानां च वीरुधाम् ।
अस्थिमतां च सत्त्वानां सहस्रस्य प्रमापणे । पूर्णे वानस्यवस्थातुं शूद्रहत्याव्रतं चरेत् ॥ ३६ ॥
किंचिद् देयं च विप्राय दद्यादस्थिमतां वधे । अनस्थ्नां चैव हिंसायां प्राणायामैर्विशुद्ध्यति ॥ ३७ ॥
अन्नादिजानां सत्त्वानां रसजानां च सर्वशः । फलपुष्पोद्गतानां च घृतप्राशो विशोधनम् ॥ ३८ ॥
कृष्टानामोषधीनां च जातानां च स्वयं वने । वृथाच्छेदेन गच्छेत दिनमेकं पयोव्रती ॥ ३९ ॥
एतैर्व्रतैरपोह्यं स्यादेनो हिंसासमुद्भवम् । स्तेयदोषापहर्तॄणां श्रूयतां व्रतमुत्तमम् ॥ ४० ॥

ब्राह्मण, क्षत्रिय, वैश्य—इन तीनों वर्णोंके लोग समाजमें अपनी स्थितिके बिना किसी विशेषताके क्रमसे यदि निषिद्ध कार्य करते हैं तो उन सबसे प्रायश्चित्त करवाना चाहिये । यदि कोई अनजानमें स्त्रीका वध कर देता है तो उसे शूद्र-हत्या-व्रतका पालन करना चाहिये । सर्पादिकी हत्या कर धन-दान करनेमें असमर्थ द्विजको पाप-शान्तिके लिये एक-एक कृच्छ्रव्रतका आचरण करना चाहिये । फल देनेवाले वृक्षों, फूली हुई लताओं, गुल्मों, वल्लियों तथा फूले हुए वृक्षोंको काटनेपर सौ ऋचाओंका जप करना चाहिये । एक सहस्र अथवा एक गाड़ीमें भर जानेके योग्य हड्डीवाले जीवोंकी हत्या करनेवालेको शूद्रहत्या-का प्रायश्चित्त करना चाहिये । हड्डीवाले जानवरोंकी हत्या करनेपर ब्राह्मणको कुछ दान देना चाहिये और जो बिना हड्डीके हैं, उनकी हिंसा करनेपर प्राणायामसे शुद्धि हो जाती है । अन्नादिसे एवं रससे उत्पन्न होनेवाले तथा फलों और पुष्पोंमें पैदा होनेवाले जन्तुओंकी हिंसा करनेपर घृत-पान ही प्रायश्चित्त है । जुताईसे उत्पन्न हुई तथा वनमें स्वतः उगी हुई ओषधियोंको बिना आवश्यकताके काटनेपर एक दिनका दुग्धव्रत करना चाहिये । हिंसासे उत्पन्न हुआ पातक इन व्रतोंसे दूर किया जा सकता है । अब चोर-कर्मसे उत्पन्न हुए पापको दूर करनेके लिये उत्तम व्रत सुनिये ॥ ३३–४० ॥

धान्यान्नधनचौर्याणि कृत्वा कामाद् द्विजोत्तमः । सजातीयगृहादेव कृच्छ्रार्धेन विशुद्ध्यति ॥ ४१ ॥
मनुष्याणां तु हरणे स्त्रीणां क्षेत्रगृहस्य तु । कूपवापीजलानां तु शुद्धिश्चान्द्रायणं स्मृतम् ॥ ४२ ॥
द्रव्याणामल्पसाराणां स्तेयं कृत्वान्यवेश्मतः । चरेत् सान्तपनं कृच्छ्रं तन्निर्यात्यविशुद्धये ॥ ४३ ॥
भक्ष्यभोज्यापहरणे यानशय्यासनस्य तु । पुष्पमूलफलानां तु पञ्चगव्यं विशोधनम् ॥ ४४ ॥
तृणकाष्ठद्रुमाणां तु शुष्कान्नस्य गुडस्य च । चैलचर्मामिषाणां तु त्रिरात्रं स्यादभोजनम् ॥ ४५ ॥
मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च । अयस्कांस्योपलानां च द्वादशाहं कणान्नभुक् ॥ ४६ ॥
कार्पासकीटजोर्णानां द्विशफैकशफस्य च । पक्षिगन्धौषधीनां च रज्ज्वाश्चैव त्र्यहं पयः ॥ ४७ ॥
एतैर्व्रतैर्व्यपोहेत पापं स्तेयकृतं द्विजः । अगम्यागमनीयं तु व्रतैरेभिरपानुदेत् ॥ ४८ ॥
गुरुतल्पव्रतं कुर्याद् रेतः सिक्त्वा स्वयोनिषु । सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु च ॥ ४९ ॥
पैतृष्वस्रीयभगिनीं स्वस्रीयां मातुरेव च । भ्रातुर्दुहितरं चैव गत्वा चान्द्रायणं चरेत् ॥ ५० ॥

यदि ब्राह्मण अपनी जातिवालोंके घरसे इच्छापूर्वक धान्य, अन्न और धनकी चोरी करता है तो वह अर्ध-कृच्छ्रव्रतसे शुद्ध होता है । मनुष्य, स्त्री, खेत, घर, कूप और बावलीके जलका हरण करनेपर शुद्धिके लिये चान्द्रायणव्रतका विधान है । दूसरेके घरसे थोड़ी मूल्यवाली वस्तुओंकी चोरी करनेपर उससे शुद्ध होनेके लिये कृच्छ्रसांतपन-व्रतका अनुष्ठान करना चाहिये । भक्ष्य, भोज्य, वाहन, शय्या, आसन, पुष्प, मूल और फलकी चोरी करनेपर उसका प्रायश्चित्त पञ्चगव्य-पान है । तृण, काष्ठ, वृक्ष, सूखा अन्न, गुड, वस्त्र, चमड़ा

Sri Vidyabharathi Book Centre, Sringeri

*

CC-O. In Public Domain. Digitized by eGangotri

तथा मांसकी चोरी करनेपर तीन राततक उपवास करना चाहिये। मणि, मोती, प्रवाल, ताँबा, चाँदी, लोहा, काँसा तथा पत्थरकी चोरी करनेपर बारह दिनोंतक अन्नके कणोंका भोजन करना चाहिये। सूती, रेशमी, ऊनी वस्त्र, दो तथा एक खुरवाले पशु, पक्षी, सुगन्धित द्रव्य, ओषधि तथा रस्सीकी चोरी करनेपर तीन दिनतक केवल जल पीकर रहना चाहिये। ब्राह्मणको इन व्रतोंद्वारा चोरीसे उत्पन्न हुए पापका निवारण करना चाहिये। अगम्या स्त्रीके साथ समागम करनेसे उत्पन्न हुए पापको इन व्रतोंद्वारा नष्ट करना चाहिये। अपनी जातिकी परायी स्त्रीके साथ समागम करके गुरुतल्प-व्रतका अनुष्ठान करना चाहिये अर्थात् गुरुकी स्त्रीके साथ समागम करनेपर जो प्रायश्चित्त कहा गया है, उसका अनुष्ठान करना चाहिये। मित्र तथा पुत्रकी स्त्री, कुमारी कन्या, नीच जातिकी स्त्री (चाण्डाली), फुफेरी तथा मौसेरी बहन और भाईकी कन्याके साथ समागम करनेपर चान्द्रायण-व्रतका अनुष्ठान करना चाहिये ॥ ४८-५० ॥

एताः स्त्रियस्तु भार्यार्थे नोपगच्छेत्तु बुद्धिमान्। ज्ञातीनां च स्त्रियो यास्तु पतितानुगताश्च याः ॥ ५१ ॥
अमानुषीषु पुरुषो उदक्यायामयोनिषु। रेतः सिक्त्वा जले चैव कृच्छ्रं सांतपनं चरेत् ॥ ५२ ॥
मैथुनं च समालोक्य पुंसि योषिति वा द्विजः। गोयानेऽप्सु दिवा चैव सवासाः स्नानमाचरेत् ॥ ५३ ॥
चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञानात् साम्यं तु गच्छति ॥ ५४ ॥
विप्रदुष्टां स्त्रियं भर्त्ता निरुन्ध्यादेकवेश्मनि। यत् पुंसः परदारेषु तच्चैनां चारयेद् व्रतम् ॥ ५५ ॥
सा चेत् पुनः प्रदुष्येत्तु सदृशेनोपमन्त्रिता। कृच्छ्रं चान्द्रायणं चैव तत् तस्याः पावनं स्मृतम् ॥ ५६ ॥
यः करोत्येकरात्रेण वृषलीसेवनं द्विजः। तद्भक्ष्यभुग् जपेन्नित्यं त्रिभिर्वर्षैर्व्यपोहति ॥ ५७ ॥
एषा पापकृतामुक्ता चतुर्णामपि निष्कृतिः। पतितैः सम्प्रयुक्तानामिमां शृणुत निष्कृतिम् ॥ ५८ ॥

बुद्धिमान् पुरुषको चाहिये कि जो स्त्रियाँ अपनी जातिकी हों तथा जो पतितोंकी अनुगामिनी हों, उनके साथ भार्याके समान समागम न करे। मनुष्यसे भिन्न योनि, ऋतुमती स्त्री तथा योनिद्वारसे अन्यत्र अथवा जलमें वीर्यपात करके पुरुषको कृच्छ्र-सान्तपन नामक व्रतका अनुष्ठान करना चाहिये। बैलगाड़ीपर, जलमें तथा दिनमें स्त्री-पुरुषके मैथुनको देखकर ब्राह्मणको वस्त्रसहित स्नान करना चाहिये। ब्राह्मण यदि अज्ञानसे चाण्डाल और अन्त्यज स्त्रियोंके साथ सम्भोग, उनके यहाँ भोजन और उनका दिया हुआ दान ग्रहण करता है तो वह पतित हो जाता है और जान-बूझकर करता है तो वह उन्हींके समान हो जाता है। ब्राह्मणद्वारा दूषित स्त्रीको उसका पति एक घरमें बंद कर दे। इसी प्रकार दूसरेकी स्त्रियोंसे समागम करनेवाले पुरुषको भी यही व्रत करना चाहिये। यदि वह स्त्री पुनः किसी परकीय पुरुषसे दूषित होती है तो उसे शुद्ध करनेके लिये कृच्छ्रचान्द्रायण व्रतका अनुष्ठान बताया गया है। जो द्विज एक रात भी शूद्रा स्त्रीके साथ समागम करता है तथा उसका दिया हुआ अन्न भोजन करता है, वह तीन वर्षोंतक निरन्तर गायत्री-जप करनेसे शुद्ध होता है। चारों वर्णोंके पापियोंके लिये यह प्रायश्चित्त कहा गया है। अब पतितोंके संसर्गमें होनेवाले पापके लिये यह प्रायश्चित्त सुनिये ॥ ५१-५८ ॥

संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद् योनादनुयानाशनासनात् ॥ ५९ ॥
यो येन पतितेनैषां संसर्गं याति मानवः। स तस्यैव व्रतं कुर्यात् तत्संसर्गविशुद्धये ॥ ६० ॥
पतितस्योदकं कार्यं सपिण्डैर्बान्धवैः सह। निन्दितेऽहनि सायाह्ने ज्ञातिभिर्गुरुसंनिधौ ॥ ६१ ॥
दासी घटमपां पूर्णं पर्यस्येत् प्रेतवत् सदा। अहोरात्रमुपासीरन् नाशौचं बान्धवैः सह ॥ ६२ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

निवर्तयेरंस्तस्मात्तु सम्भाषणसहासनम्। दायादस्य प्रमाणं च यात्रामेव च लौकिकीम् ॥ ६३ ॥
ज्येष्ठाभावान्निवर्तेत ज्येष्ठ्यावाप्तं च यत्पुनः। ज्येष्ठांशं प्राप्नुयाच्चास्य यवीयान् गुणतोऽधिकः ॥ ६४ ॥
स्थापितां चापि मर्यादां ये भिन्द्युः पापकर्मिणः। सर्वे पृथग्दण्डनीया राज्ञा प्रथमसाहसम् ॥ ६५ ॥
शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति। वैश्यस्तु द्विशतं राजञ् शूद्रस्तु वधमर्हति ॥ ६६ ॥
पञ्चाशद् ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने। वैश्यस्याप्यर्धपञ्चाशच्छूद्रे द्वादशको दमः ॥ ६७ ॥
क्षत्रियस्याप्नुयाद्वैश्यः साहसं पूर्वमेव च। शूद्रः क्षत्रियमाक्रुश्य जिह्वाच्छेदनमाप्नुयात् ॥ ६८ ॥

पतितके साथ यज्ञानुष्ठान, अध्यापन, यौन-सम्बन्ध, भोजन, एक वाहनपर गमन तथा आसनपर उपवेशन करनेसे भला मनुष्य (भी) एक वर्षमें पतित हो जाता है। जो मनुष्य इन कर्मोंमें जिस पतितका संसर्ग प्राप्त करता है, उसे उस संसर्गदोषकी शुद्धिके लिये उसी पतितके व्रतका अनुष्ठान करना चाहिये। उसके सपिण्ड भाई-बन्धुओंको जातिवालोंके साथ किसी निन्दित दिनको सायंकालके समय गुरुके समीप उस पतितके लिये उदक-क्रिया करनी चाहिये। दासी उक्त व्यक्तिके लिये प्रेतकी तरह जलपूर्ण घट रखे, परिवारवालोंके साथ एक दिन-रातका उपवास करे और अशौचके समान व्यवहार करे। परिवारवालोंके लिये उसके साथ वार्तालाप करना और एक आसनपर बैठना निषिद्ध है। इस पाप-कर्मकी जातिको भी उन्हें नहीं प्रकट करना चाहिये—यह लोककी मर्यादा है। जिस प्रकार ज्येष्ठ भाईके न रहनेपर उसके हिस्सेकी प्राप्ति छोटे भाईको होती है, उसी प्रकार अधिक गुणवान् होनेपर भी छोटे भाईको उसका फल भोगना पड़ता है। जो पापाचारी प्राणी निश्चित की गयी मर्यादाको तोड़ देते हैं, उन्हें राजा पृथक्-पृथक् जाति-क्रमके अनुसार प्रथम साहस(२५०पण)का दण्ड दे। राजन्! यदि क्षत्रिय होकर ब्राह्मणको कटु वचन कहता है तो उसे सौ मुद्राका दण्ड देना चाहिये। यदि वैश्य है तो उसे दो सौ मुद्राका और यदि शूद्र है तो उसे प्राण-दण्ड देना चाहिये। यदि ब्राह्मण क्षत्रियको कटु बातें कहे तो उसे पचास पण, वैश्यको कहे तो पचीस पण तथा शूद्रको कहे तो बारह पणका दण्ड देना चाहिये। यदि वैश्य क्षत्रियको कटु वचन कहता है तो उसे पूर्वोक्त साहसका दण्ड देना चाहिये और शूद्र क्षत्रियको कटूक्ति सुनाता है तो उसकी जीभ काट लेनी चाहिये ॥ ५९—६८ ॥

पञ्चाशत्क्षत्रियो दण्ड्यस्तथा वैश्याभिशंसने। शूद्रे चैवार्धपञ्चाशत्तथा धर्मो न हीयते ॥ ६९ ॥
वैश्यस्याक्रोशने दण्ड्यः शूद्रश्चोत्तमसाहसम्। शूद्राक्रोशे तथा वैश्यः शतार्धं दण्डमर्हति ॥ ७० ॥
सवर्णाक्रोशने दण्ड्यस्तथा द्वादशकं स्मृतम्। वादेष्ववचनीयेषु तदेव द्विगुणं भवेत् ॥ ७१ ॥
एकजातिर्द्विजातिं तु वाचा दारुणया क्षिपन्। जिह्वायाः प्राप्नुयाच्छेदं जघन्यः प्रथमो हि सः ॥ ७२ ॥
नामजातिग्रहं तेषामभिद्रोहेण कुर्वतः। निक्षेप्योऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः ॥ ७३ ॥
धर्मोपदेशं शूद्रस्तु द्विजानामभिकुर्वतः। तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः ॥ ७४ ॥
श्रुतिं देशं च जातिं च कर्म शारीरमेव च। वितथं च ब्रुवन् दण्ड्यो राज्ञा द्विगुणसाहसम् ॥ ७५ ॥
यस्तु पातकसंयुक्तः क्षिपेद् वर्णान्तरं नरः। उत्तमं साहसं दण्डः पात्यस्तस्मिन् यथाक्रमम् ॥ ७६ ॥
राज्ञो निवेशनियमं वितथं यान्ति वै मिथः। सर्वे द्विगुणदण्ड्यास्ते विप्रलम्भान्नृपस्य तु ॥ ७७ ॥
प्रीत्या मयास्याभिहितं प्रमादेनाथवा वदेत्। भूयो न चैवं वक्ष्यामि स तु दण्डार्धभाग्भवेत् ॥ ७८ ॥

क्षत्रिय यदि वैश्यको बुरा-भला कहता है तो उसे पचास और शूद्रको कहता है तो पचीस पणका दण्ड देना चाहिये। ऐसा करनेसे उसका धर्म क्षीण नहीं होता। शूद्र यदि वैश्यको कटु वचन कहे तो उसे उत्तम साहस(हजारपण)का दण्ड देना चाहिये और वैश्य होकर शूद्रको बुरा-भला कह रहा है तो वह पचास पणके दण्डका भागी होता है। यदि कोई अपने वर्णवालेको कटूक्ति सुनाता है तो उसे बारह पणका दण्ड देना चाहिये तथा

Sri Vidyabharathi Book Centre Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अकथनीय बातें कहनेपर वह दण्ड दुगुना हो जाता है। यदि द्विजातिसे भिन्न जातिवाला किसी द्विजातिको कठोर वाणीसे बुरा-भला कहता है तो उसकी जीभ काट लेनी चाहिये और उसे परम नीच समझना चाहिये। अधिक द्रोहवश नाम, जाति तथा वर्णकी निन्दा करनेवालेके मुखमें लोहेकी बारह अंगुल लम्बी जलती हुई शलाका डाल देनी चाहिये। राजाको द्विजातिको धर्मोपदेश करनेवाले शूद्रके मुख और कानमें खौलता हुआ तेल डाल देना चाहिये। वेद, देश, जाति और शारीरिक कर्मको निष्फल बतलानेवाला राजाद्वारा मध्यम साहस(५०० पण)के दण्डका भागी होता है। जो मनुष्य स्वयं पापाचारी होकर दूसरे वर्णकी निन्दा करता है, उसे राजा जातिके अनुरूप उत्तम साहसका दण्ड दे। जो राजाके बनाये हुए नियमकी अवहेलना करते हैं अथवा राजाकी निन्दा करते हैं, उन सबको मध्यम साहसका दण्ड देना चाहिये। जो व्यक्ति 'मैंने प्रेमवश अथवा प्रमादसे ऐसा कहा है, अब पुनः ऐसा नहीं कहूँगा' ऐसा कहकर अपराध स्वीकार कर लेता है, वह आधे दण्डका पात्र है ॥ ६९–७८ ॥

काणं वाप्यथवा खञ्जमन्धं चापि तथाविधम्। तथ्येनापि ब्रुवन् दाप्यो दण्डं कार्षापणं धनम् ॥ ७९ ॥
मातरं पितरं ज्येष्ठं भ्रातरं श्वशुरं गुरुम्। आक्रोशयञ् शतं दण्ड्यः पन्थानं चाददन् गुरोः॥ ८० ॥
गुरुवर्ज्यं तु मानार्हं यो हि मार्गं न यच्छति। स दाप्यः कृष्णलं राज्ञस्तस्य पापस्य शान्तये ॥ ८१ ॥
एकजातिर्द्विजातिं तु येनाङ्गेनापराध्नुयात्। तदेव च्छेदयेत्तस्य क्षिप्रमेवाविचारयन् ॥ ८२ ॥
अवनिष्ठीवतो दर्पाद् द्वावोष्ठौ च्छेदयेन्नृपः। अवमूत्रयतो मेढ्रमपशब्दयतो गुदम् ॥ ८३ ॥
सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः। कट्यां कृताङ्को निर्वास्यः स्फिचं वाप्यस्य कर्तयेत् ॥ ८४ ॥
केशेषु गृह्णतो हस्तं छेदयेदविचारयन्। पादयोर्नासिकायां च ग्रीवायां वृषणेषु च ॥ ८५ ॥
त्वग्भेदकः शतं दण्ड्यो लोहितस्य च दर्शकः। मांसभेत्ता च षण्निष्कान् निर्वास्यस्त्वस्थिभेदकः ॥ ८६ ॥
अङ्गभङ्गकरस्याङ्गं तदेवापहरेन्नृपः। दण्डपारुष्यकृद् दण्ड्यः समुत्थानव्ययं तथा ॥ ८७ ॥
अर्धपादकरः कार्यो गोगजाश्वोष्ट्रघातकः। पशुक्षुद्रमृगाणां च हिंसायां द्विगुणो दमः ॥ ८८ ॥
पञ्चाशच्च भवेद् दण्ड्यस्तथैव मृगपक्षिषु। कृमिकीटेषु दण्ड्यः स्याद् रजतस्य च माषकम् ॥ ८९ ॥
तस्यानुरूपं मूल्यं च प्रदद्यात् स्वामिने तथा।

कोई काना हो, लँगड़ा हो अथवा अन्धा हो, उसे सत्यतापूर्वक उसी प्रकारका कहनेपर भी उसे एक कार्षापणका* दण्ड देना चाहिये। माता, पिता, ज्येष्ठ भाई, श्वशुर तथा गुरु—इनकी निन्दा करनेवाले तथा गुरुजनोंके मार्गको नष्ट करनेवालेको सौ कार्षापणका दण्ड देना चाहिये। जो माननीय श्रेष्ठ लोगोंको मार्ग नहीं देता, उसे उस पापकी शान्तिके लिये राजा एक कृष्णलका दण्ड दे। द्विजातिसे भिन्न जातिवाला व्यक्ति किसी द्विजातिका जिस अङ्गसे अपकार करता है, उसके उसी अङ्गको शीघ्र ही बिना कुछ विचार किये कटवा देना चाहिये। राजा सामने गर्वपूर्वक थूकनेवाले, पेशाब करनेवाले तथा अपानवायु छोड़नेवाले व्यक्तिका क्रमशः दोनों होंठ, लिङ्ग और गुदाद्वार कटवा दे। यदि कोई नीच जातिवाला व्यक्ति उत्कृष्ट व्यक्तिके साथ आसनपर बैठना चाहता है तो राजा उसकी कमरमें एक चिह्न बनाकर अपने राज्यसे निर्वासित कर दे या उसके गुदाभागको कटवा दे। इसी प्रकार यदि कोई निम्न जातिवाला किसी उच्च जातीय व्यक्तिके केशोंको पकड़ता है तो उसके हाथको बिना विचार किये ही कटवा देना चाहिये। इसी प्रकारका दण्ड दोनों पैरों, नासिका, गला तथा अण्डकोशके पकड़नेपर भी देना चाहिये। यदि कोई किसीके चमड़ेको काट देता है और उससे रक्त निकलने लगता है तो उसे शतमुद्राका दण्ड देना चाहिये। मांस काट लेनेवालेको छः निष्कोंका दण्ड तथा हड्डी तोड़नेवालेको देशनिकालाका दण्ड देना चाहिये। यदि कोई व्यक्ति किसीके अङ्गको तोड़-फोड़ देता है तो राजाको चाहिये कि उसके उसी अङ्गको

Sri Vidyabharathi Book Centre, Sringeri

* १६ माशेकी स्वर्णमुद्रा या १६ पणकी रजतमुद्रा। (दे० मनु० ८। १३६, ३३६ आदि)

CC-0. In Public Domain. Digitized by eGangotri

कटवा दे तथा उसे उतने द्रव्यका भी दण्ड दे, जितना उस आहत व्यक्तिके उठने-बैठनेके व्ययके लिये अपेक्षित हो। गाय, हाथी, अश्व और ऊँटकी हत्या करनेवालेका आधा हाथ और आधा पैर काट लेना चाहिये। राजाको पशु तथा छोटे जानवरोंकी हत्या करनेपर अपराधीको उनके मूल्यके दुगुने पणका दण्ड देना चाहिये। मृग तथा पक्षियोंकी हत्या करनेपर पचास पणका दण्ड करनेका विधान है। कृमि तथा कीटोंके मारनेपर एक मासा चाँदीका दण्ड लगाना उचित है तथा उसके अनुकूल मूल्य भी उसके स्वामीको दिलाना चाहिये ॥७९–८९½॥

स्वस्वामिकानां सकलं शेषाणां दण्डमेव तु ॥ ९० ॥
वृक्षं तु सफलं छित्त्वा सुवर्णं दण्डमर्हति। द्विगुणं दण्डयेच्चैनं पथि सीम्नि जलाशये ॥ ९१ ॥
छेदनादफलस्यापि मध्यमं साहसं स्मृतम्। गुल्मवल्लीलतानां च सुवर्णस्य च माषकम् ॥ ९२ ॥
वृथाच्छेदी तृणस्यापि दण्ड्यः कार्षापणं भवेत्। त्रिभागं कृष्णला दण्ड्याः प्राणिनस्ताडने तथा ॥ ९३ ॥
देशकालानुरूपेण मूल्यं राजा द्रुमादिषु। तत्स्वामिनस्तथा दण्ड्या दण्डमुक्तस्तु पार्थिव ॥ ९४ ॥
यत्रातिवर्तते युग्यं वैगुण्यात् प्राजकस्य तु। तत्र स्वामी भवेद् दण्ड्यो नाप्तश्चेत् प्राजको भवेत् ॥ ९५ ॥
प्राजकश्च भवेदाप्तः प्राजको दण्डमर्हति। नास्ति दण्डश्च तस्यापि तथा वै हेतुकल्पकः ॥ ९६ ॥
द्रव्याणि यो हरेद् यस्य ज्ञानतोऽज्ञानतोऽपि वा। स तस्योत्पादयेत् तुष्टिं राज्ञो दद्यात् ततो दमम् ॥ ९७ ॥
यस्तु रज्जुं घटं कूपाद्धरेद् भिन्द्याच्च तां प्रपाम्। स दण्डं प्राप्नुयान्माषं तच्च सम्प्रतिपादयेत् ॥ ९८ ॥
धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः। शेषेऽप्येकादशगुणं तस्य दण्डं प्रकल्पयेत् ॥ ९९ ॥
तथा भक्ष्यान्नपानानां न तथाप्यधिके वधः। सुवर्णरजतादीनामुत्तमानां च वाससाम् ॥१००॥
पुरुषाणां कुलीनानां नारीणां च विशेषतः। महापशूनां हरणे शस्त्राणामौषधस्य च ॥१०१॥
मुख्यानां चैव रत्नानां हरणे वधमर्हति।

अब स्वतन्त्र पदार्थोंको नष्ट करनेपर लगनेवाले दण्डको बतला रहा हूँ। फलयुक्त वृक्षको काटनेपर अपराधीको सुवर्णका दण्ड देना उचित है। यदि वह वृक्ष किसी सीमा, मार्ग अथवा जलाशयके समीप है तो उसे दुगुना दण्ड देना चाहिये। फलरहित वृक्षको भी काटनेपर मध्यमसाहसका दण्ड देनेका विधान है। गुल्मों, लताओं तथा वल्लियोंको काटनेपर एक मासा सुवर्णका दण्ड देना चाहिये। बिना किसी आवश्यकताके तृणको भी नष्ट करनेवाला व्यक्ति एक कार्षापणके दण्डका भागी होता है। किसी प्राणीको कष्ट पहुँचानेवालेको कृष्णलके तिहाई भागका दण्ड देना चाहिये। राजन्! वृक्षादिके काटे जानेपर राजा देश तथा कालके अनुसार उचित मूल्यका दण्ड दे और उस दण्डको वृक्षादिके स्वामीको दिला दे। यदि चालककी असावधानीसे रथ मार्गसे विचलित हो जाता है तो ऐसे अवसरपर यदि वह चालक निपुण नहीं है तो उसके स्वामीको दण्ड देना चाहिये और यदि चालक निपुण है तो उसीके ऊपर दण्ड लगाना चाहिये, किंतु यदि वह घटना किसी विशेष परिस्थिति-वश घटित हुई हो तो चालकको भी दण्ड नहीं देना चाहिये। जो किसीके द्रव्यको जानकर या अनजानमें अपहरण कर लेता है, उसे राजाके सम्मुख दण्ड स्वीकार कर उसके स्वामीको संतुष्ट करना चाहिये। अन्यथा उसपर एक पण दण्ड लगानेका विधान है। जो व्यक्ति किसी कुएँपरसे रस्सी अथवा घड़ा चुरा लेता है या उस कुएँको तोड़ता-फोड़ता है, उसके ऊपर एक मासा सुवर्णका दण्ड लगाना उचित है और उसीसे कुएँकी क्षति-पूर्ति करानी चाहिये। दस घड़ेसे अधिक अन्न चुरानेवालेको प्राण-दण्ड देना चाहिये। यदि दस घड़ेसे कम अन्न चुराता है तो उसने जितना अन्न चुराया है, उससे ग्यारहगुना अधिक मूल्यका दण्ड उसपर लगाना चाहिये। उसी प्रकार दस घड़ेसे अधिक खाद्य-सामग्री, अन्न एवं पानादिकी

Sri Vidyabharathi Book Centre Sringeri

CC-0. In Public Domain. Digitized by eGangotri

चोरी करनेपर उसी प्रकारके दण्डका विधान है। उसे स्त्रियों, बड़े-बड़े पशुओं, हथियारों, ओषधियों तथा प्राणदण्ड नहीं देना चाहिये। सुवर्ण, चाँदी आदि मुख्य-मुख्य रत्नोंकी चोरी करनेपर चोर प्राण-दण्डका धातुओं, उत्तम वस्त्रों, कुलीन पुरुषों, विशेषतया कुलीन पात्र होता है॥ ९०-१०१½ ॥

दध्नः क्षीरस्य तक्रस्य पानीयस्य रसस्य च ॥१०२॥
वेणुवैदलभाण्डानां लवणानां तथैव च। मृन्मयानां च सर्वेषां मृदो भस्मन एव च ॥१०३॥
कालमासाद्य कार्यं च राजा दण्डं प्रकल्पयेत्। गोषु ब्राह्मणसंस्थासु महिषीषु तथैव च ॥१०४॥
अश्वापहारकश्चैव सद्यः कार्योऽर्धपादकः। सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च ॥१०५॥
मत्स्यानां पक्षिणां चैव तैलस्य च घृतस्य च। मांसस्य मधुनश्चैव यच्चान्यद्वस्तुसम्भवम् ॥१०६॥
अन्येषां लवणादीनां मद्यानामोदनस्य च। पक्वान्नानां च सर्वेषां तन्मूल्याद् द्विगुणो दमः ॥१०७॥
पुष्पेषु हरिते धान्ये गुल्मवल्लीलतासु च।
अन्नेषु परिपूर्णेषु दण्डः स्यात् पञ्चमाषकम्। परिपूर्णेषु धान्येषु शाकमूलफलेषु च ॥१०८॥
निरन्वये शतं दण्ड्यः सान्वये द्विशतं दमः। येन येन यथाङ्गेन स्तेनोऽन्येषु विचेष्टते ॥१०९॥
तत्तदेव हरेत् तस्य प्रत्यादेशाय पार्थिवः। द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके ॥११०॥
त्रपुसोर्वारुकौ द्वौ च तावन्मात्रं फलेषु च। तथा च सर्वधान्यानां मुष्टिग्राहेण पार्थिव ॥१११॥
शाके शाकप्रमाणेन गृह्णमाणे न दुष्यति। वानस्पत्यं फलं मूलं दार्वग्न्यर्थं तथैव च ॥११२॥
तृणं गोऽभ्यवहारार्थमस्तेयं मनुरब्रवीत्। अदेववाटिजं पुष्पं देवतार्थं तथैव च ॥११३॥
आददानः परक्षेत्रान्न दण्डं दातुमर्हति।

दही, दूध, तक्र (छाँछ-मट्ठा), जल, रस, बाँस एवं बेंदल आदिके पात्र, लवण, सभी प्रकारके मिट्टीके पात्र, मिट्टी और भस्मकी चोरी करनेवालेके लिये राजा देश एवं कालके अनुसार दण्डकी व्यवस्था करे। ब्राह्मणके घरसे गाय, भैंस और घोड़ेकी चोरी करनेवालेको तुरंत ही आधे पैरवाला कर देना चाहिये। सूत, कपास, आसव, गोबर, गुड़, मछली, पक्षी, तेल, घी, मांस, मधु, नमक, मदिरा, भात एवं इनसे बनी हुई अन्यान्य वस्तुओं तथा सभी प्रकारके पकवानोंकी चोरी करनेवालेको उस वस्तुके मूल्यसे दुगुना दण्ड देना चाहिये। पुष्प, कच्चा अन्न, गुल्म, लता, वल्ली तथा अधिक अन्नकी चोरी करनेवालेको पाँच मासा सुवर्णका दण्ड देना उचित है। प्रचुरमात्रामें अन्न, शाक, मूल और फलकी चोरी करनेवाले संतानहीनको सौ मुद्राका तथा संतानवालेको दो सौ पणका दण्ड देना चाहिये। चोर जिस-जिस अङ्गोंकी सहायतासे चोरी करनेकी चेष्टा करता है, राजा उसके उस अङ्गको कटवा दे। यदि कोई अकिंचन ब्राह्मण मार्गमें चलते हुए दो ईख, दो कन्द (मूली), दो खीरे, दो तरबूजे, दो अन्य फल, दो मुट्ठी सभी प्रकारके अन्न अथवा साग ले लेता है तो वह चोरीके दोषसे दूषित नहीं होता। भोजनके लिये वृक्षसे उत्पन्न हुए फल, मूल और जलौनी लकड़ीको काट लेना अथवा गौको खिलानेके लिये घास उखाड़ लेना चोरी नहीं है—ऐसा मनुजीने कहा है। देवताकी वाटिकासे भिन्न दूसरेके खेतमें उत्पन्न हुए पुष्पको देवताकी पूजाके लिये तोड़नेवाला दण्डका पात्र नहीं होता, उसे दण्ड नहीं देना चाहये॥ १०२-११३½ ॥

शृङ्गिणं नखिनं राजन् दंष्ट्रिणं च वधोद्यतम् ॥११४॥
यो हन्यान्न स पापेन लिप्यते मनुजेश्वर। गुरुं वा बालवृद्धं वा ब्राह्मणं वा बहुश्रुतम् ॥११५॥

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

आततायिनमायान्तं हन्यादेवाविचारयन् । नाततायिवधे दोषो हन्तुर्भवति कश्चन ॥११६॥
प्रकाशं वाप्रकाशं वा मन्युस्तं मन्युमृच्छति । गृहक्षेत्राभिहर्तारस्तथागम्याभिगामितः ॥११७॥
अग्निदो गरदश्चैव तथा चाभ्युद्यतायुधः । अभिचारं तु कुर्वाणो राजगामि च पैशुनम् ॥११८॥
एते हि कथिता लोके धर्मज्ञैराततायिनः । भिक्षुकोऽप्यथवा नारी योऽपि वा स्यात् कुशीलवः ॥११९॥
प्रविशेत् प्रतिषिद्धस्तु प्राप्नुयाद् द्विगुणं दमः । परस्त्रीणां तु सम्भाषे तीर्थेऽरण्ये गृहेऽपि वा ॥१२०॥
नदीनां चैव सम्भेदे स संग्रहणमाप्नुयात् । न सम्भाषेत् परस्त्रीभिः प्रतिषिद्धः समाचरेत् ॥१२१॥
प्रतिषिद्धे समाभाष्य सुवर्णं दण्डमर्हति । नैव चारणदारेषु विधिरात्मोपजीविषु ॥१२२॥
सज्जयन्ति मनुष्यैस्ता निगूढं वा चरन्त्युत । किंचिदेव तु दाप्यः स्यात् सम्भाषेणापचारयन् ॥१२३॥
प्रेष्यासु चैव सर्वासु गृहप्रव्रजितासु च । योऽकामां दूषयेत् कन्यां स सद्यो वधमर्हति ॥१२४॥
सकामां दूषयाणस्तु प्राप्नुयाद् द्विशतं दमम् । यश्च संरक्षकस्तत्र पुरुषः स तथा भवेत् ॥१२५॥

राजन् ! जो अपनेको मारनेके लिये उद्यत सींगवाले, नखवाले तथा दाढ़वाले पशुको मारता है, वह पापसे लिप्त नहीं होता । गुरु, बालक, वृद्ध अथवा शास्त्रज्ञ ब्राह्मण ही क्यों न हो, यदि वह अपनेको मारनेके लिये आ रहा हो तो उसे बिना विचार किये ही मार डालना चाहिये;* क्योंकि आततायीका वध करनेपर वधकर्ताको कोई पाप नहीं लगता । प्रकटरूपमें अथवा गुप्तरूपमें भी पाप करनेवाला पापका भागी होता है । दूसरोंके घर तथा खेतका अपहरण करनेवाले, अगम्या स्त्रीके साथ समागम करनेवाले, आग लगानेवाले, विष देनेवाले, हथियार लेकर मारनेके लिये उद्यत, अभिचार-परायण, राजाके विरोधमें विद्रोह करनेवाले—इनको धर्मज्ञोंने लोकमें आततायी बतलाया है । यदि भिक्षुक, परायी स्त्री तथा चारण आदि निषेध करनेपर भी घरमें घुस जाते हैं तो उन्हें दुगुना दण्ड देना चाहिये । तीर्थ, जंगल या घरमें परायी स्त्रियोंके साथ वार्तालाप करनेवाले तथा नदीकी धाराका भेदन करनेवालेको पकड़कर बंद कर देना चाहिये । 'परायी स्त्रीके साथ सम्भाषण नहीं करना चाहिये'—ऐसी निषेधाज्ञा घोषित कर दे । निषेध होनेपर भी यदि कोई सम्भाषण करता है तो वह एक सुवर्ण-मुद्राके दण्डका भागी होता है । किंतु यह दण्ड चारणों, स्त्रियों तथा अन्तःपुरमें प्रवेश कर नृत्य-गीतादिद्वारा अपनी जीविका चलानेवालेको नहीं देना चाहिये । ऐसे लोग यदि अन्तःपुरके लोगोंके साथ सम्भाषण करते हैं या वहाँ घूमते-फिरते हैं तो उन्हें तथा घरसे निकालकर बाहर घूमती हुई सभी दासियोंको नाममात्रका दण्ड देना चाहिये । जो व्यक्ति किसी कुमारी कन्याके साथ बलात्कार करता है, वह तुरंत ही मार डालने योग्य है । यदि कोई किसी कामुकी कुमारी कन्याके साथ व्यभिचार करता है तो उसे दो सौ पणका दण्ड देना चाहिये और वहाँ जो संरक्षणकर्ता पुरुष है, उसे भी यही दण्ड देना चाहिये ॥ ११४–१२५ ॥

पारदारिकवद् दण्ड्यो योऽपि स्यादवकाशदः । बलात् संदूषयेद् यस्तु परभार्यां नरः क्वचित् ॥१२६॥
वधो दण्डो भवेत्तस्य नापराधो भवेत् स्त्रियाः । रजस्तृतीयं या कन्या स्वगृहे प्रतिपद्यते ॥१२७॥
अदण्ड्या सा भवेद् राज्ञा वरयन्ती पतिं स्वयम् । स्वदेशे कन्यकां दत्त्वा तामादाय तथा व्रजेत् ॥१२८॥
परदेशे भवेद् वध्यः स्त्रीचौरः स यतो भवेत् । अद्रव्यां मृतपत्नीं तु संगृह्णन्नापराध्यति ॥१२९॥
सद्रव्यां तां संग्रहीता दण्डं तु क्षिप्रमर्हति । उत्कृष्टं या भजेत् कन्या देया तस्यैव सा भवेत् ॥१३०॥
यच्चान्यं सेवमानां च संयतां वासयेद् गृहे ।
उत्तमां सेवमानस्तु जघन्यो वधमर्हति । जघन्यमुत्तमा नारी सेवमाना तथैव च ॥१३१॥
भर्तारं लङ्घयेद् या स्त्री ज्ञातिभिर्बलदर्पिता । तां च निष्कासयेद् राजा संस्थाने बहुसंस्थिते ॥१३२॥

* मिताक्षरादिके मतसे यह अर्थवाद है ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम्। वासयेत् स्वैरिणीं नित्यं सवर्णेनाभिदूषिताम् ॥१३३॥
ज्यायसा दूषिता नारी मुण्डनं समवाप्नुयात्। वासश्च मलिनं नित्यं शिखां सम्प्राप्नुयाद् दश ॥१३४॥
ब्राह्मणः क्षत्रियो वैश्यः क्षत्रविट्शूद्रयोषितः। व्रजन् दण्ड्यो भवेद् राज्ञा दण्डमुत्तमसाहसम् ॥१३५॥
वैश्यागमे च विप्रस्य क्षत्रियस्यान्त्यजागमे। मध्यमं प्रथमं वैश्यो दण्ड्यः शूद्रागमाद् भवेत् ॥१३६॥
शूद्रः सवर्णागमने शतं दण्ड्यो महीक्षिता। वैश्यस्तु द्विगुणं राजन् क्षत्रस्तु त्रिगुणं तथा ॥१३७॥
ब्राह्मणश्च भवेद् दण्ड्यस्तथा राजंश्चतुर्गुणम्। अगुप्तासु भवेद् दण्डः सुगुप्तास्वधिको भवेत् ॥१३८॥

जो ऐसे व्यभिचारोंको सम्भव बनानेमें अवकाश देता है, उसे परायी स्त्रीके साथ व्यभिचार करनेवालेके समान ही दण्ड देना चाहिये। जो मनुष्य दूसरेकी स्त्रीके साथ बलात्कार करता है, उसे प्राणदण्ड देना चाहिये और इसमें उस स्त्रीका कोई भी अपराध नहीं मानना चाहिये। जो कन्या पिताके घरपर तीसरी बार रजस्वला होकर स्वयं पतिका वरण कर लेती है, वह राजाद्वारा दण्डनीय नहीं होती। जो अपने देशमें कन्यादान देकर पुनः उसे लेकर परदेशमें भाग जाता है, उसे प्राण-दण्ड देना चाहिये; क्योंकि वह स्त्री-चोर है। द्रव्यहीना विधवा स्त्रीको ग्रहण करनेवाला अपराधी नहीं माना जाता, किंतु सम्पत्तिसहित विधवाको स्वीकार करनेवाला शीघ्र ही दण्डका भागी होता है। जो कन्या अपनी जाति अथवा योग्यतासे उत्कृष्ट व्यक्तिसे प्रेम करती है तो उसे उसी व्यक्तिको दे देना चाहिये, किंतु जो कन्या किसी कम योग्यतावालेसे प्रेम करती है, उसे विशेष संयमके साथ घरमें ही रखे। यदि नीच जातिवाला जघन्य पुरुष उत्तम जातिकी कन्याके साथ प्रेम करता है तो उसे प्राण-दण्ड देना चाहिये। इसी प्रकार यदि उत्तम जातिकी स्त्री किसी नीच जातिके पुरुषके साथ प्रेम करती है तो वह भी प्राण-दण्डके योग्य है। जो स्त्री अपने जाति-भाइयोंके बलसे गर्वीली होकर अपने पतिको छोड़ देती है, उसे घरसे निकालकर अनेक व्यक्तियोंसे युक्त संस्थानमें रख दे। राजा सवर्ण पुरुषद्वारा दूषित कुलटा स्त्रीको सभी अधिकारोंसे वञ्चित कर मलिन बना दे और भोजनमात्रका प्रबन्ध कर घरमें पड़ा रहने दे। उत्तम कुल एवं जातिमें उत्पन्न हुई स्त्री यदि दूषित हुई हो तो उसकी दस चोटियाँ रखकर शेष बाल कटवा दे और नित्य मैला वस्त्र पहननेको दे। यदि ब्राह्मण, क्षत्रिय तथा वैश्य क्रमशः क्षत्रिय, वैश्य एवं शूद्रकी स्त्रीके साथ दुराचार करते हैं तो वे राजाद्वारा उत्तमसाहस नामक दण्डके भागी होते हैं। यदि ब्राह्मण वैश्य-स्त्रीके साथ और क्षत्रिय अन्त्यज-स्त्रीके साथ पापाचरण करते हैं तो उन्हें मध्यमसाहसका दण्ड देना चाहिये और यदि वैश्य शूद्रा स्त्रीके साथ व्यभिचार करता है तो उसे भी पूर्वोक्त रीतिके अनुसार उत्तमसाहसका दण्ड मिलना चाहिये। राजन्! यदि शूद्र अपनी जातिकी स्त्रीके साथ समागम करता है तो उसे राजाद्वारा सौ मुद्राओंका दण्ड मिलना चाहिये। इसी प्रकार सवर्णा स्त्रीके साथ पापाचरण करनेसे वैश्यको दो सौ, क्षत्रियको तीन सौ तथा ब्राह्मणको चार सौ मुद्राओंका दण्ड देनेका विधान है। ये दण्ड अरक्षित स्त्रीके साथ पापाचरण करनेपर बताये गये हैं, किंतु सुरक्षित स्त्रियोंके साथ दुराचार करनेपर इससे अधिक दण्ड देना चाहिये ॥ १२६–१३८ ॥

माता पितृष्वसा श्वश्रूर्मातुलानी पितृव्यजा।
पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी तथा। भ्रातृभार्यागमे पूर्वाद् दण्डस्तु द्विगुणो भवेत् ॥१३९॥
भागिनेयी तथा चैव राजपत्नी तथैव च। तथा प्रव्रजिता नारी वर्णोत्कृष्टा तथैव च ॥१४०॥
इत्यगम्याश्च निर्दिष्टास्तासां तु गमने नरः। शिश्नस्योत्कर्तनं कृत्वा ततस्तु वधमर्हति ॥१४१॥
चण्डालीं च [illegible] वाप्नुयात् ॥१४२॥
Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

तिर्यग्योनिं च गोवर्ज्यं मैथुनं यो निषेवते । वपनं प्राप्नुयाद् दण्डं तस्याश्च यवसोदकम् ॥१४३॥
सुवर्णं च भवेद् दण्ड्यो गां व्रजन् मनुजोत्तम । वेश्यागामी द्विजो दण्ड्यो वेश्याशुल्कसमं पणम्॥१४४॥
गृहीत्वा वेतनं वेश्या लोभादन्यत्र गच्छति । वेतनं द्विगुणं दद्याद् दण्डं च द्विगुणं तथा ॥१४५॥
अन्यमुद्दिश्य यो वेश्यां नयेदन्यस्य कारणात् । तस्य दण्डो भवेद् राजन् सुवर्णस्य च माषकम् ॥१४६॥
नीत्वा भोगान्न यो दद्याद् दाप्यो द्विगुणवेतनम् । राज्ञश्च द्विगुणं दण्डं तथा धर्मो न हीयते ॥१४७॥
बहूनां व्रजतामेकां सर्वे ते द्विगुणं दमम् । दद्युः पृथक् पृथक् सर्वे दण्डं च द्विगुणं परम् ॥१४८॥
न माता न पिता न स्त्री न ऋत्विग् याज्यमानवाः ।
अन्योन्यं पतितास्त्याज्या योगे दण्ड्याः शतानि षट् ॥१४९॥
पतिता गुरवस्त्याज्या न तु माता कथंचन । गर्भधारणपोषाभ्यां तेन माता गरीयसी ॥१५०॥

माता, फूफी, सास, मामी, चचेरी बहन, चाचीकी सखी, शिष्यकी स्त्री, बहिन, उसकी सखी तथा भाईकी स्त्री—इन सबके साथ समागम करनेपर पूर्वकथित दण्डसे दुगुना दण्ड देना चाहिये । भानजेकी स्त्री, राजाकी पत्नी, संन्यासिनी तथा उच्चवर्णकी स्त्री—ये सभी अगम्या मानी गयी हैं । इन सबके साथ समागम करनेवाले व्यक्तिके लिंगको कटवाकर तत्पश्चात् उसे प्राण-दण्ड देना चाहिये । इसी प्रकार चाण्डालकी स्त्री तथा कुत्तेको खानेवालोंकी स्त्रीके साथ व्यभिचार करनेवालेको प्राण-दण्ड देना चाहिये । गौको छोड़कर अन्य तिर्यग् योनियोंमें सम्भोग करनेवाले व्यक्तिको मुण्डनका दण्ड देकर उस पशुके लिये घास तथा जल देनेका दण्ड देना चाहिये । मानवश्रेष्ठ ! गौके साथ भोग करनेवाले व्यक्तिको सुवर्णका दण्ड लगाना चाहिये । वेश्याके साथ समागम करनेवाले ब्राह्मणको वेश्याको दिये गये शुल्कके बराबर अर्थ-दण्ड देना चाहिये । वेश्या यदि वेतन स्वीकार करनेके उपरान्त लोभवश अन्यत्र चली जाती है तो उसे दुगुना दण्ड देनेके उपरान्त लिये हुए शुल्कका दूना अर्थ दण्ड भी देना चाहिये । राजन् ! यदि कोई वेश्याको दूसरेके बहानेसे किसी दूसरेके पास लिवा जाता है तो उसे एक मासा सुवर्णका दण्ड देना चाहिये । जो वेश्याको लानेके बाद उसके साथ सम्भोगादि नहीं करता, उसे दूना दण्ड देकर उस वेश्याको दूना शुल्क दिलाना चाहिये । ऐसा करनेसे राजाका धर्म क्षीण नहीं होता । यदि अनेक व्यक्ति एक वेश्याके साथ समागम करनेको उपस्थित हों तो राजा उनको दूना दण्ड दे और वे सब पृथक्-पृथक् उस वेश्याको दूना द्रव्य दण्डरूपमें अधिक दें । माता, पिता, स्त्री, पुरोहित और यजमान—ये पतित होनेपर भी नहीं छोड़े जाते, पर यदि कोई मनुष्य इनमेंसे किसीको छोड़ता है तो वह छः सौ सुवर्ण-मुद्राओंका दण्डभागी होता है । पतित होनेपर गुरुजन भी त्याज्य हो सकते हैं, किंतु माता नहीं छोड़ी जा सकती । गर्भकालमें धारण-पोषण करनेके कारण माताका गौरव गुरुजनोंसे भी अधिक है ॥

अधीयानोऽप्यनध्याये दण्ड्यः कार्षापणत्रयम् । अध्यापकश्च द्विगुणं तथाऽऽचारस्य लङ्घने ॥१५१॥
अनुक्तस्य भवेद् दण्डः सुवर्णस्य च कृष्णलम् । भार्या पुत्रश्च दासश्च शिष्यो भ्राता च सोदरः ॥१५२॥
कृतापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा । पृष्ठतस्तु शरीरस्य नोत्तमाङ्गं कथंचन ॥१५३॥
अतोऽन्यथा प्रहरतः प्राप्तं स्याच्चोरकिल्बिषम् । दूतीं समाह्वयंश्चैव यो निषिद्धं समाचरेत् ॥१५४॥
प्रच्छन्नं वा प्रकाशं वा स दण्ड्यः पार्थिवेच्छया । वासांसि फलकैः श्लक्ष्णैर्निर्णिज्याद् रजकः शनैः ॥१५५॥
अतोऽन्यथा हि कुर्वंस्तु दण्ड्यः स्याद् रुक्मभाषकम् । रक्षास्वधिकृतैश्चैव प्रदेयं यैर्विलुप्यते ॥१५६॥
कर्षकेभ्योऽर्थमादाय यः कुर्यात् करमन्यथा । तस्य सर्वस्वमादाय तं राजा विप्रवासयेत् ॥१५७॥
ये नियुक्ताः स्वकार्येषु हन्युः कार्याणि कार्यिणाम् । निर्घृणाः क्रूरमनसः सर्वे कर्मापराधिनः ॥१५८॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

धनोष्मणा पच्यमानास्तान् निःस्वान् कारयेन्नृपः। कूटशासनकर्तुंश्च प्रकृतीनां च दूषकान् ॥१५९॥
स्त्रीबालब्राह्मणघ्नांश्च वध्यात् तत्सेविनस्तथा। अमात्यः प्राड्विवाको वा यः कुर्यात् कार्यमन्यथा॥१६०॥
तस्य सर्वस्वमादाय तं राजा विप्रवासयेत्। ब्रह्मघ्नश्च सुरापश्च तस्करो गुरुतल्पगः ॥१६१॥
एतान् सर्वान् पृथग्विधान्महापातकिनो नरान्। महापातकिनो वध्या ब्राह्मणं तु विवासयेत् ॥१६२॥
कृतचिह्नं स्वदेशाच्च शृणु चिह्नाकृतिं ततः। गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः ॥१६३॥
स्तेने तु श्वपदं तद्वद् ब्रह्महन्यशिराः पुमान्। असम्भाष्या ह्यसम्भोज्या असंवाह्या विशेषतः॥१६४॥
त्यक्तव्याश्च तथा राजञ्ज्ञातिसम्बन्धिबान्धवैः।

अनध्यायके दिन भी अध्ययन करनेवाले ब्राह्मणको तीन कार्षापणका दण्ड देना चाहिये और अध्यापकको दुगुना दण्ड देनेका विधान है। इसी प्रकार उन्हें अपने-अपने आचारोंका उल्लङ्घन करनेपर भी दण्ड देना चाहिये। जिन-जिन अपराधोंमें केवल दण्डकी चर्चा की गयी है और कोई परिमाण नहीं निश्चित किया गया है, वहाँ सुवर्णका एक कृष्णल दण्डरूपमें समझना चाहिये। स्त्री, पुत्र, सेवक, शिष्य तथा सगा भाई—ये यदि अपराध करते हैं तो इन्हें रस्सीसे बाँधकर बाँसकी छड़ीसे शरीरके पिछले भागपर दण्ड देना चाहिये; किंतु सिरपर किसी प्रकार भी चोट न लगने दे। इन कहे गये स्थानोंके अतिरिक्त अन्य स्थानोंपर प्रहार करनेवालेको चोरी करनेके समान पाप लगता है। जो दूतीको बुलाकर प्रकट-रूपमें या गुप्तरूपमें निषिद्धाचरण करता है, उसके लिये राजा स्वेच्छानुसार दण्डकी व्यवस्था करे। धोबीको चाहिये कि वह कोमल काठके पीठकोंपर वस्त्रको धीरे-धीरे साफ करे। यदि वह ऐसा नहीं करता है तो उसे एक मासे सुवर्णका दण्ड देना चाहिये। राजाकी ओरसे रक्षा आदि स्थानोंपर नियुक्त किये गये लोग यदि देय भागको हड़प लेते हैं या किसानोंसे कर लेकर उसे दूसरे कार्योंमें लगा देते हैं तो राजा उनका सर्वस्व छीनकर उन्हें निर्वासनका दण्ड दे। जो लोग अपने पदपर नियुक्त होकर अन्य कर्मचारियोंके कार्योंको हानि पहुँचाते हैं, वे सभी निर्दय, क्रूरात्मा, कर्मके अपराधी और धनकी गर्मीसे उन्मत्त हो जाते हैं, राजाको चाहिये कि उन्हें निर्धन बना दे। यदि राजाके सेवकगण कूटनीतिसे शासन करनेवाले, प्रजावर्गको राजाके विरुद्ध भड़कानेवाले, स्त्री, बालक और ब्राह्मणकी हत्या करनेवाले हों तो राजा उन्हें प्राण-दण्ड दे। चाहे अमात्य हो या प्रधान न्यायकर्ता, यदि वह अपने कर्तव्यका पालन नहीं करता तो राजा उसका सर्वस्व छीनकर उसे अपने देशसे बाहर निकाल दे। ब्रह्महत्यारा, मद्यपायी, चोर तथा गुरु-स्त्रीगामी—इन महापातकी पुरुषोंको राजा पृथक्-पृथक् प्राण-दण्डकी व्यवस्था करे। ऐसे महापापियोंको राजा प्राण-दण्ड दे, किंतु ब्राह्मणको चिह्नित करके अपने देशसे निकाल दे। उक्त चिह्नका आकार बताता हूँ, सुनिये। यदि ब्राह्मण गुरुपत्नीके साथ समागम करता है तो उसके शरीरमें भगका आकार, मदिरापायी हो तो सुराध्वजका चिह्न, चोरीके अपराधमें कुत्तेके पैरोंका चिह्न तथा ब्रह्मघातीके शरीरमें बिना सिरके पुरुषका चिह्न बनाना चाहिये। राजन्! ऐसे घोर पापियोंके साथ उनकी जातिवाले, सम्बन्धी तथा भाई-बन्धुओंको विशेषतया सम्भाषण, सहभोज तथा विवाहादि-सम्बन्ध त्याग देना चाहिये ॥ १५१–१६४½ ॥

महापातकिनो वित्तमादाय नृपतिः स्वयम् ॥१६५॥
अप्सु प्रवेशयेद् दण्डं वरुणायोपपादयेत्। सहोढं न विना चोरं घातयेद् धार्मिको नृपः ॥१६६॥
सहोढं सोपकरणं घातयेदविचारयन्। ग्रामेष्वपि च ये केचिच्चोराणां भक्ष्यदायकाः ॥१६७॥
भाण्डावकाशदाश्चैव सर्वांस्तानपि घातयेत्। राष्ट्रेषु राष्ट्राधिकृताः सामन्ताश्चैव दूषकाः ॥१६८॥

Sri Vidyadhirathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अभ्याघातेषु मध्यस्थाः क्षिप्रं शास्यास्तु चोरवत् । ग्रामघाते मठाभङ्गे पथि मोषाभिमर्दने ॥१६९॥
शक्तितो नाभिधावन्तो निर्वास्याः सपरिच्छदाः । राज्ञः कोशापहर्तृंश्च प्रतिकूलेषु संस्थितान् ॥१७०॥
अरीणामुपकर्तृंश्च घातयेद् विविधैर्वधैः । संधिं कृत्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः ॥१७१॥
तेषां छित्त्वा नृपो हस्तौ तीक्ष्णशूले निवेशयेत् । तडागभेदकं हन्यादप्सु शुद्धवधेन तु ॥१७२॥
यस्तु पूर्वं निविष्टं स्यात् तडागस्योदकं हरेत् । आगमं चाप्यपां भिन्द्यात् स दाप्यः पूर्वसाहसम् ॥१७३॥
कोष्ठागारायुधागारदेवागारविभेदकान् । पापान् पापसमाचारान् पातयेच्छीघ्रमेव च ॥१७४॥

राजा महापापी पुरुषोंकी सम्पत्तिको अपने अधीन कर ले और उसमेंसे दण्डभागको वरुणके उद्देश्यसे जलमें छोड़ दे। धार्मिक राजाको सपत्नीक चोरको प्राण-दण्ड नहीं देना चाहिये, किंतु चुरायी हुई वस्तुके साथ ही यदि सपत्नीक चोर पकड़ा जाता है तो उसे भी राजा बिना किसी विचारके प्राण-दण्ड दे। ग्रामोंमें भी जो कोई चोरोंको भोजन, पात्र तथा रहनेका आश्रय देनेवाले हों तो इन सभीको प्राण-दण्ड देना चाहिये। राष्ट्रमें राजाके अधिकारी तथा अधीनस्थ सामन्तगण यदि दुष्ट हो गये हों या बुरे अवसरपर तटस्थ रहते हों तो वे भी चोरोंके समान दण्डके भागी होते हैं। ग्राममें किसी विनाशके उपस्थित होनेपर, किसी घर आदिके गिरनेके अवसरपर या मार्गमें किसी रमणीपर अत्याचार किये जानेपर राजाके जो अधिकारी या सामन्त अपनी शक्तिके अनुसार उसकी रक्षाके लिये नहीं दौड़ते, वे परिवार तथा साधनसहित निर्वासित कर देने योग्य हैं। राजाके कोशको अपहृत करनेवालों, शत्रु-पक्षसे मिले रहनेवालों तथा शत्रुओंका उपकार करनेवालोंको विविध वधोपायोंद्वारा मरवा डालना चाहिये। जो चोर रातमें सेंध लगाकर चोरी करते हैं, राजाको उनके हाथोंको काटकर तीखे शूलपर बैठा देना चाहिये। तड़ागका भेदन करनेवालेको राजा जलमें डुबोकर मृत्युदण्ड दे। जो व्यक्ति तालाबमें भरे हुए जलकी चोरी करता है, या उसमें जलके आनेके मार्गोंको रोक देता है, उसे पूर्ववत् साहस-दण्ड देना चाहिये। कोष्ठागार, आयुधागार तथा देवागारोंको तोड़नेवाले पापाचारियों एवं पापयुक्त किंवदन्तीसे लिप्त पुरुषोंको राजा शीघ्र ही प्राण-दण्ड दे॥ १६५–१७४॥

समुत्सृजेद् राजमार्गे यस्त्वमेध्यमनापदि । स हि कार्षापणं दण्ड्यस्तत्त्वमेध्यं च शोधयेत् ॥१७५॥
आपद्गतोऽथवा वृद्धो गर्भिणी बाल एव च । परिभाषणमर्हन्ति न च शोध्यमिति स्थितिः ॥१७६॥
प्रथमं साहसं दण्ड्यो यश्च मिथ्या चिकित्सते । परुषे मध्यमं दण्डमुत्तमं च तथोत्तमे ॥१७७॥
छत्रस्य ध्वजयष्टीनां प्रतिमानां च भेदकाः । प्रतिकुर्युस्ततः सर्वं पञ्च दण्ड्याः शतानि च ॥१७८॥
अदूषितानां द्रव्याणां दूषणे भेदने तथा । मणीनामपि भेदेन दण्ड्यः प्रथमसाहसम् ॥१७९॥
समं च विषमं चैव कुरुते मूल्यतोऽपि वा । समाप्नुयात् स वै पूर्वं दमं मध्यममेव च ॥१८०॥
बन्धनानि च सर्वाणि राजमार्गे निवेशयेत् । कर्षन्तो यत्र दृश्यन्ते विकृताः पापकारिणः ॥१८१॥
प्राकारस्य च भेत्तारं परिखाणां च भेदकम् । द्वाराणां चैव भेत्तारं क्षिप्रं निर्वासयेत् पुरात् ॥१८२॥
मूलकर्माभिचारेषु कर्तव्यो द्विशतो दमः । अबीजविक्रयी यश्च बीजोत्कर्षक एव च ॥१८३॥
मर्यादाभेदकश्चापि विकृतं वधमाप्नुयात् । सर्वसंकरपापिष्ठं हेमकारं नराधिप ॥१८४॥
अन्याये वर्तमानं च छेदयेल्लवशः क्षुरैः । द्रव्यमादाय वणिजामनर्घेणावरुन्धताम् ॥१८५॥
द्रव्याणां दूषको यस्तु प्रतिच्छन्नस्य विक्रयी । मध्यमं प्राप्नुयाद् दण्डं कूटकर्त्ता तथोत्तमम् ॥१८६॥
राजा पृथक् पृथक् कुर्याद् दण्डं चोत्तमसाहसम् । शस्त्राणां यज्ञतपसां देशानां क्षेपको नरः ॥१८७॥
देवतानां सतीनां च उत्तमं दण्डमर्हति । एकस्य दण्डपारुष्ये बहूनां द्विगुणो दमः ॥१८८॥

जो किसी आपत्तिके न होनेपर भी सड़कपर मल आदि अपवित्र वस्तुओंको फेंकता है, उसे एक कार्षापणका दण्ड देना चाहिये और उसीसे उस गंदी वस्तुको हटवाना चाहिये। यदि आपत्तिग्रस्त, वृद्ध, गर्भिणी स्त्री

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अथवा बालक ऐसा अपराध करते हैं तो उन्हें कहकर मना कर दे, उनसे सफाई न कराये, ऐसी मर्यादा है। जो वैद्य झूठी दवा करता है या वैद्य न होकर भी दवा देता है, उसे प्रथम साहसका दण्ड देना चाहिये। जिसकी दवा निकृष्ट है, उसे मध्यम साहसका दण्ड तथा जिसकी दवा अत्यन्त अवगुणकारी है, उसे उत्तमसाहसका दण्ड देना चाहिये। छत्र, ध्वजाके दण्डों तथा प्रतिमाओंको तोड़नेवालेको पाँच सौ मुद्राका दण्ड देना चाहिये और उन्हींसे इन सबका प्रतिशोध भी कराना चाहिये। अदूषित वस्तुओंको दूषित करने या तोड़नेवालेको तथा मणि आदि मूल्यवान् वस्तुओंको नष्ट करनेवालेको प्रथमसाहसका दण्ड देना चाहिये। किसी वस्तुके मूल्यमें जो कमी या वृद्धि करता है, उसे क्रमशः पूर्व और मध्यम साहसका दण्ड देना चाहिये। राजाको अपराधियोंके सभी प्रकारके दण्डोंकी व्यवस्था मुख्य सड़कपर करनी चाहिये जिससे उस दण्डको भुगतनेवाले पापात्माको सभी लोग देख सकें। दुर्गकी चहारदीवारी, खाइयों तथा दरवाजोंको तोड़नेवालेको राजा तुरंत अपने पुरसे बाहर निकाल दे। वशीकरण, अभिचार आदि करनेवालेको राजा दो सौ पणका दण्ड दे। घटिया बीज बेचनेवाले, बोये हुए खेतको जोतनेवाले तथा खेतोंकी मेड़को तोड़नेवालेको विकृत मृत्युका दण्ड देना चाहिये। नराधिप! अच्छी धातुमें नकली धातु मिलानेवाले पापात्मा एवं अन्यायी सोनारको छुरेसे खण्ड-खण्ड काट डालना चाहिये। जो बनियेसे वस्तु लेकर उसका दाम नहीं चुकाता, अच्छी वस्तुको बुरी बतलाता है और वस्तुको बाजारमें छिपाकर बेंचता है, उसे मध्यम साहसका दण्ड देना चाहिये। इसी प्रकार कूटनीतिका प्रयोग करनेवालेको उत्तम साहसका दण्ड देनेका विधान है। इन सभी अपराधियोंको राजा अलग-अलगसे उत्तम साहसका दण्ड दे। शास्त्र, यज्ञ, तपस्या, देश, देवता तथा सतीकी निन्दा करनेवाला पुरुष उत्तम साहसके दण्डका पात्र है। अनेक व्यक्ति किसी एक व्यक्तिके प्रति कठोर दण्डनीय अपराध करते हैं तो उन सबको दुगुना दण्ड देना चाहिये॥ १७५-१८८॥

कलहो यद्गतो दाप्यो दण्डश्च द्विगुणस्ततः। मध्यमं ब्राह्मणं राजा विषयाद् विप्रवासयेत्॥१८९॥
लशुनं च पलाण्डुं च शूकरं ग्रामकुक्कुटम्। तथा पञ्चनखं सर्वं भक्ष्यादन्यत्तु भक्षयेत्॥१९०॥
विवासयेत् क्षिप्रमेव ब्राह्मणं विषयात् स्वकात्। अभक्ष्यभक्षणे दण्ड्यः शूद्रो भवति कृष्णलम्॥१९१॥
ब्राह्मणक्षत्रियविशां चतुस्त्रिद्विगुणं स्मृतम्। यः साहसं कारयति स दण्ड्यो द्विगुणं दमम्॥१९२॥
यस्त्वेवमुक्त्वाहं दाता कारयेत् स चतुर्गुणम्। संदिष्टस्याप्रदाता च समुद्रगृहभेदकः॥१९३॥
पञ्चाशत्पणिको दण्डस्तत्र कार्यो महीक्षिता। अस्पृश्यं च स्पृशन्नार्यो ह्ययोग्यो योग्यकर्मकृत्॥१९४॥
पुंस्त्वहर्ता पशूनां च दासीगर्भविनाशकृत्। शूद्रप्रव्रजितानां च दैवे पित्र्ये च भोजकः॥१९५॥
अव्रजन् बाढमुक्त्वा तु तथैव च निमन्त्रणे। एते कार्षापणशतं सर्वे दण्ड्या महीक्षिता॥१९६॥
दुःखोत्पादि गृहे द्रव्यं क्षिपन् दण्ड्यस्तु कृष्णलम्।
पितापुत्रविरोधे च साक्षिणां द्विशतो दमः। स्यान्नरश्च तथार्यः स्यात् तस्याप्यष्टशतो दमः॥१९७॥

जिस व्यक्तिपर कलहका आरोप हो, उसे दूना दण्ड देना चाहिये। जो ब्राह्मण अपने आचार-विचारसे अधम हो गया हो, उसे राजा अपने देशसे निकाल दे। भक्ष्य पदार्थोंको छोड़कर जो लहसुन, प्याज, सूअर, ग्रामीण मुरगे, पाँच नखवाले जीवों तथा अन्य अभक्ष्य पदार्थोंको खाता है, उस ब्राह्मणको शीघ्र ही अपने राष्ट्रसे निकाल देना चाहिये। अभक्ष्य पदार्थोंको खानेसे शूद्रको एक कृष्णलका दण्ड देना चाहिये तथा ब्राह्मण, क्षत्रिय और

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

वैश्यको क्रमशः चौगुना, तिगुना तथा दुगुना दण्ड देनेका विधान है। जो अभक्ष्य-भक्षणके लिये उत्साहित करता है, उसे दूना दण्ड देना चाहिये। जो मनुष्य 'मैं देता हूँ' ऐसा कहकर अभक्ष्य वस्तुओंके भक्षणमें दूसरेको प्रवृत्त करता है, उसे भी चौगुना दण्ड मिलना चाहिये। संदेशको न देनेवाले तथा समुद्रमें बने हुए अङ्कोको नष्ट करनेवाले व्यक्तियोंको राजा पचास मुद्राका दण्ड दे। जो श्रेष्ठ होकर अस्पृश्यका स्पर्श करता है, अयोग्य होकर योग्य कार्यमें हाथ लगाता है, पशुओंके पुंस्त्वका अपहरण करता है, दासीके गर्भको नष्ट करता है, शूद्र और संन्यासियोंके घर देव-कार्य और पितृकार्यमें भोजन करता है तथा निमन्त्रण स्वीकार करनेपर भोजन करने नहीं जाता—ये सभी राजाद्वारा सौ पग कार्षापण-दण्डके भागी हैं। अपने घरमें पीडोत्पादक वस्तु रखनेवालेको एक कृष्णलका दण्ड देना चाहिये। पिता और पुत्रके पारस्परिक विरोधमें साक्षी देनेवालोंको दो सौ पणका दण्ड लगाना चाहिये। यदि कोई माननीय व्यक्ति यह अपराध करता है तो उसपर एक सौ आठ पणका दण्ड लगाना चाहिये ॥१८९–१९७॥

तुलाशासनमानानां कूटकृन्मानकस्य च। एभिश्च व्यवहर्ता च स दण्ड्यो दममुत्तमम् ॥१९८॥
विषाग्निदां पतिगुरुनिजापत्यप्रमापणीम्। विकर्णनासिकां व्योष्ठीं कृत्वा गोभिः प्रमापयेत् ॥१९९॥
ग्रामस्य दाहका ये च ये च क्षेत्रस्य वेश्मनः। राजपत्न्यभिगामी च दग्धव्यास्ते कटाग्निना ॥२००॥
ऊनं वाप्यधिकं वापि लिखेद् यो राजशासनम्। पारदारिकचौरं वा मुञ्चतो दण्ड उत्तमः ॥२०१॥
अभक्ष्येण द्विजं दूष्य दण्ड्य उत्तमसाहसम्। क्षत्रियं मध्यमं वैश्यं प्रथमं शूद्रमर्धकम् ॥२०२॥
मृताङ्गलग्नविक्रेतुर्गुरुं ताडयतस्तथा। राजयानासनारोढुर्दण्ड उत्तमसाहसः ॥२०३॥
यो मन्येताजितोऽस्मीति न्यायेनापि पराजितः। तमायान्तं पुनर्जित्वा दण्डयेद् द्विगुणं दमम् ॥२०४॥
आह्वानकारी मध्यः स्यादनाह्वाने तथाह्वयन्। दण्डिकस्य च यो हस्तादभियुक्तः पलायते ॥२०५॥
हीनः पुरुषकारेण तं दण्ड्याद् दाण्डिको धनम्। प्रेष्यापराधात् प्रेष्यस्तु स दण्ड्यश्चार्धमेव च ॥२०६॥
दण्डार्थं नियमार्थं च नीयमानेषु बन्धनम्। यदि कश्चित् पलायेत दण्डश्चाष्टगुणो भवेत् ॥२०७॥
अनिन्दिते विवादे तु नखरोमावतारणम्। कारयेद् यः स पुरुषो मध्यमं दण्डमर्हति ॥२०८॥

तराजू, शासन, मानदण्ड और धर्मकाँटेके प्रति कूटनीतिका प्रयोग करनेवाले तथा ऐसे व्यक्तिके साथ व्यवहार करनेवालेको उत्तम साहसका दण्ड देना चाहिये। विष देनेवाली, आग लगानेवाली, पति, गुरुजन एवं अपने बच्चोंकी हत्या करनेवाली स्त्रीको कान, ओठ और नाकसे रहित करके पशुओंद्वारा मरवा डालना चाहिये। जो गाँव, खेत और घरमें आग लगानेवाले तथा राजपत्नीके साथ व्यभिचार करनेवाले हैं, उन्हें घास-फूसकी अग्निमें जला देना चाहिये। जो (राजाका अधिकारी) राजाज्ञाको घटा-बढ़ाकर लिखता है तथा दूसरेकी स्त्रीके साथ अपराध करनेवाले एवं चोरको छोड़ देता है, उसे उत्तमसाहसका दण्ड देना चाहिये। जो व्यक्ति अभक्ष्य वस्तु खिलाकर ब्राह्मणको दूषित करता है, उसे उत्तमसाहसका दण्ड देना चाहिये। इसी प्रकार क्षत्रियको विधर्मी करनेवालेको मध्यम, वैश्यको प्रथम तथा शूद्रको अर्धसाहसका दण्ड देना चाहिये। मृतकके शरीरपर लगे हुए आभूषण तथा वस्त्रादिको बेंचनेवाले, गुरुको पीटनेवाले, राजाके वाहन और आसनपर बैठनेवालेको उत्तम साहसका दण्ड देना चाहिये। जो व्यक्ति न्यायद्वारा या युद्धमें पराजित होनेपर भी अपनेको 'मैं पराजित नहीं हूँ'—ऐसा मानता है, उसे आता हुआ देखकर राजाको चाहिये कि उसे पुनः जीतकर दुगुने पणका दण्ड दे। जो व्यक्ति अपराध होनेपर सूचनाद्वारा बुलानेसे नहीं आता है और जो बिना बुलाये ही आकर सम्मुख उपस्थित होता है तथा

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

जो अपराधी दण्ड देनेवालेके हाथसे छुड़ाकर भाग जाता है—ऐसे हीन लोगोंको पौरुषपूर्वक दण्ड देनेवाला न्यायकर्ता आर्थिक दण्ड दे। जो व्यक्ति दूत होनेपर अपने कर्तव्यका पालन नहीं करता, उसे उपर्युक्त दण्डका आधा दण्ड देना चाहिये। दण्ड या नियमनके लिये बाँधकर ले जाते समय यदि कोई अपराधी भाग जाता है तो उसे आठगुना दण्ड देना चाहिये। जो पुरुष सामान्य वाद-विवादमें किसीके नख या बालको काट लेता है, वह मध्यम दण्डका भागी होता है ॥ १९८–२०८ ॥

बन्धनं चाप्यवध्यस्य बलान्मोचयते तु यः। वध्यं विमोचयेद् यस्तु दण्ड्यो द्विगुणभाग् भवेत् ॥२०९॥
दुर्दृष्टव्यवहाराणां सभ्यानां द्विगुणो दमः। राज्ञा त्रिंशद्गुणो दण्डः प्रक्षेप्य उदके भवेत् ॥२१०॥
अल्पदण्डेऽधिकं कुर्याद् विपुले चाल्पमेव च। ऊनाधिकं तु तं दण्डं सभ्यो दद्यात् स्वकाद् गृहात् ॥२११॥
यावानवध्यस्य वधे तावान् वध्यस्य रक्षणे। अधर्मो नृपतेर्दृष्ट एतयोरुभयोरपि ॥२१२॥
ब्राह्मणं नैव हन्यात्तु सर्वपापेष्ववस्थितम्। प्रवासयेत् स्वकाद् राष्ट्रात् समग्रधनसंयुतम् ॥२१३॥
न जातु ब्राह्मणं वध्यात् पातकं ह्यधिकं भवेत्। यस्मात् तस्मात् प्रयत्नेन ब्रह्महत्यां विवर्जयेत् ॥२१४॥
अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्। अयशो महदाप्नोति नरकं चाधिगच्छति ॥२१५॥
ज्ञात्वापराधं पुरुषस्य राजा कालं तथा चानुमतं द्विजानाम्।
दण्ड्येषु दण्डं परिकल्पयेत्तु यो यस्य युक्तः स समीक्ष्य कुर्यात् ॥२१६॥

इति श्रीमात्स्ये महापुराणे राजधर्मे दण्डप्रणयनं नाम सप्तविंशत्यधिकद्विशततमोऽध्यायः ॥ २२७ ॥

जो व्यक्ति बलपूर्वक अवध्य अपराधीके बन्धनोंको खोल देता है तथा जो मृत्यु-दण्डके अपराधीको छोड़ देता है, वह दुगुने दण्डका भागी होता है। राजाके जो सभासद उपस्थित विषयोंमें कुशलतासे मनोयोग नहीं देते, उन्हें दूना दण्ड देना चाहिये। राजा ऐसे अपराधियोंको तीसगुना अधिक दण्ड दे और जलमें फेंकवा दे। थोड़ेसे अपराधमें अधिक दण्ड देनेवाले तथा भीषण अपराधमें अल्प दण्ड देनेवाले न्यायकर्ताको जितना कम या अधिक दण्ड हो, उसे अपने घरसे पूर्ण करना या अपराधीको लौटाना चाहिये। अवध्य अपराधीका वध करनेमें जितना पाप लगता है उतना ही पाप वध्यको छोड़ देनेमें लगता है। राजाको इन दोनों दशाओंमें समानरूपसे पापभागी होना पड़ता है। सभी प्रकारके पापोंमें अपराधी पाये गये ब्राह्मणको मृत्युदण्ड नहीं देना चाहिये, उसे सम्पूर्ण सम्पत्तिके साथ अपने राष्ट्रसे निर्वासित कर देना चाहिये। कभी भूलकर भी ब्राह्मणका वध नहीं करना चाहिये; क्योंकि इससे अधिक पाप होता है। इसलिये राजाको ब्रह्महत्यासे बचना चाहिये। अदण्डनीय पुरुषोंको दण्ड देने तथा दण्डनीयको दण्ड न देनेसे राजा महान् अयशका भागी बनता है और मरनेपर नरकगामी होता है। इसलिये राजा मनुष्यके अपराधको भलीभाँति जानकर तथा यथासमय ब्राह्मणोंकी अनुमति लेकर दण्डनीयोंके प्रति दण्डकी कल्पना करे और जो जिस प्रकारके दण्डका पात्र हो, उसकी भलीभाँति समीक्षा कर उसे उसी प्रकारका समुचित दण्ड दे ॥२०९–२१६॥

इस प्रकार श्रीमत्स्यमहापुराणके राजधर्म-कीर्तन-प्रसङ्गमें दण्डनीति नामक दो सौ सत्ताईसवाँ अध्याय सम्पूर्ण हुआ ॥ २२७ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

दो सौ अट्ठाईसवाँ अध्याय

अद्भुतशान्तिका* वर्णन

मनुरुवाच

दिव्यान्तरिक्षभौमेषु या शान्तिरभिधीयते । तामहं श्रोतुमिच्छामि महोत्पातेषु केशव ॥ १ ॥

मनुने पूछा—केशव ! दिव्य, अन्तरिक्ष और पृथ्वी-सम्बन्धी बड़े-बड़े अद्भुत उपद्रवोंके होनेपर जिस शान्तिका विधान किया जाता है, उसे मैं श्रवण करना चाहता हूँ ॥ १ ॥

मत्स्य उवाच

अथातः सम्प्रवक्ष्यामि त्रिविधामद्भुतादिषु । विशेषेण तु भौमेषु शान्तिः कार्या तथा भवेत् ॥ २ ॥
अभया चान्तरिक्षेषु सौम्या दिव्येषु पार्थिव । विजिगीषुः परं राजन् भूतिकामस्तु यो भवेत् ॥ ३ ॥
विजिगीषुः परानेवमभियुक्तस्तथा परैः । तथाभिचारशङ्कायां शत्रूणामभिनाशने ॥ ४ ॥
भये महति सम्प्राप्ते अभया शान्तिरिष्यते । राजयक्ष्माभिभूतस्य क्षतक्षीणस्य चाप्यथ ॥ ५ ॥
सौम्या प्रशस्यते शान्तिर्यज्ञकामस्य चाप्यथ । भूकम्पे च समुत्पन्ने प्राप्ते चान्नक्षये तथा ॥ ६ ॥
अतिवृष्ट्यामनावृष्ट्यां शलभानां भयेषु च । प्रमत्तेषु च चौरेषु वैष्णवी शान्तिरिष्यते ॥ ७ ॥
पशूनां मारणे प्राप्ते नराणामपि दारुणे । भूतेषु दृश्यमानेषु रौद्री शान्तिस्तथेष्यते ॥ ८ ॥
वेदनाशे समुत्पन्ने जने जाते च नास्तिके । अपूज्यपूजने जाते ब्राह्मी शान्तिस्तथेष्यते ॥ ९ ॥
भविष्यत्यभिषेके च परचक्रभयेऽपि च । स्वराष्ट्रभेदेऽरिवधे रौद्री शान्तिः प्रशस्यते ॥ १० ॥

शौनकजीने कहा—अर्जुन ! यह जगत् पहले दिव्य हिरण्मय अण्डके रूपमें था । यह प्रजापतिकी मूर्ति है—ऐसी वैदिकी श्रुति है । एक हजार वर्ष व्यतीत होनेपर सर्वव्यापी एवं लोकोंके जन्मदाता विष्णुने उस अण्डके ऊर्ध्व मुखका भेदन किया और पुनः लोकसृष्टिके लिये उसके अधोमुखको भी फोड़ दिया । फिर उस अण्डको आठ भागोंमें विभक्त कर दिया । तत्पश्चात् विभागकर्ता विष्णुने जगत्‌का भी विभाजन किया । विश्वस्रष्टा भगवान्‌द्वारा किया गया जो ऊपरका छिद्र था, वह विवरके आकारवाला आकाश और जो नीचेका छिद्र था, वह रसातल हुआ । भगवान्‌ने पूर्वकालमें लोकसृष्टिकी कामनासे जिस अण्डको उत्पन्न किया था, उससे जो जल टपका था, वह स्वर्णमय सुमेरु पर्वत हुआ और हजारों पर्वतोंके संयोगसे विशाल पृथ्वी विषमा अर्थात् ऊँची-नीची हो गयी । उस समय अनेकों योजन विस्तृत उन भारी

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पर्वतसमूहोंसे पीड़ित हुई पृथ्वी व्याकुल हो गयी। महामते! तब पृथ्वी जो स्वर्णमय तेजसे युक्त, महान् बलसे सम्पन्न और नारायणस्वरूप था, उस दिव्य हिरण्मय अण्डको धारण करनेमें असमर्थ होकर उसे त्यागकर नीचेकी ओर जाने लगीं; क्योंकि वह उन भगवान्‌के तेजसे पीड़ित हो रही थी। तब भगवान् मधुसूदनने पृथ्वीको नीचे प्रवेश करती हुई देखकर लोककल्याण-भावनासे उसके उद्धारका विचार किया ॥ १–१० ॥

श्रीभगवानुवाच

मत्तेजः एषा वसुधा समासाद्य तपस्विनी। रसातलं प्रविशति पङ्के गौरिव दुर्बला ॥ ११ ॥

श्रीभगवान्‌ने कहा—यह तपस्विनी पृथ्वी मेरे तेजको प्राप्तकर (धारण करनेमें असमर्थ हो) कीचड़में फँसी हुई दुबली गौकी भाँति रसातलमें प्रवेश कर रही है ॥ ११ ॥

पृथिव्युवाच

त्रिविक्रमायामितविक्रमाय महावराहाय सुरोत्तमाय।
श्रीशार्ङ्गचक्रासिगदाधराय नमोऽस्तु ते देववर प्रसीद ॥ १२ ॥
तव देहाज्जगज्जातं पुष्करद्वीपमुत्थितम्। ब्रह्माणमिह लोकानां भूतानां शाश्वतं विदुः ॥ १३ ॥
तव प्रसादाद् देवोऽयं दिवं भुङ्क्ते पुरन्दरः। तव क्रोधाद्धि बलवान् जनार्दन जितो बलिः ॥ १४ ॥
धाता विधाता संहर्ता त्वयि सर्वं प्रतिष्ठितम्। मनुः कृतान्तोऽधिपतिर्ज्वलनः पवनो घनः ॥ १५ ॥
वर्णाश्चाश्रमधर्माश्च सागरास्तरवोऽचलाः। नद्यो धर्मश्च कामश्च यज्ञा यज्ञस्य च क्रियाः ॥ १६ ॥
विद्या वेद्यं च सत्त्वं च ह्रीः श्रीः कीर्तिर्धृतिः क्षमा। पुराणं वेदवेदाङ्गं सांख्ययोगौ भवाभवौ ॥ १७ ॥
जङ्गमं स्थावरं चैव भविष्यं च भवच्च यत्। सर्वं तच्च त्रिलोकेषु प्रभावोपहितं तव ॥ १८ ॥
त्रिदशोदारफलदः स्वर्गस्त्रीचारुपल्लवः। सर्वलोकमनःकान्तः सर्वसत्त्वमनोहरः ॥ १९ ॥
विमानानेकविटपस्तोयदाम्बुमधुस्रवः। दिव्यलोकमहास्कन्धः सत्यलोकप्रशाखवान् ॥ २० ॥
सागराकारनिर्यासो रसातलजलाश्रयः। नागेन्द्रपादपोपेतो जन्तुपक्षिनिषेवितः ॥ २१ ॥

पृथ्वीने कहा—जो तीन पगमें पृथ्वीको नाप लेनेवाले वामनरूप, अमित पराक्रमी महावराहरूप, सुरश्रेष्ठ तथा लक्ष्मी, धनुष, चक्र, खड्ग और गदा धारण करनेवाले हैं, ऐसे आपको नमस्कार है। देवश्रेष्ठ! आप मुझपर प्रसन्न हो जाइये। प्रभो! आपके शरीरसे जगत् उत्पन्न हुआ है, पुष्कर द्वीपकी उत्पत्ति हुई है और ब्रह्मा प्रकट हुए हैं, आप सभी लोकों और प्राणियोंके सनातन पुरुष माने जाते हैं। आपकी कृपासे ये देवराज इन्द्र स्वर्गका उपभोग कर रहे हैं। जनार्दन! आपके क्रोधसे बलवान् बलि जीता गया है। आप धाता, विधाता और संहर्ता हैं। आपमें समस्त जगत् प्रतिष्ठित है। मनु, प्रजापति, यम, अग्नि, पवन, मेघ, वर्णधर्म, आश्रमधर्म, समुद्र, वृक्ष, पर्वत, नदियाँ, धर्म, काम, यज्ञ; यज्ञकी क्रियाएँ, विद्या, जाननेयोग्य अन्य बातें, जीवगण, लज्जा, श्री, कीर्ति, धैर्य, क्षमा, पुराण, वेद, वेदाङ्ग, सांख्य, योग, जन्म, मरण, जंगम, स्थावर, भूत और भविष्यत्—ये सभी तीनों लोकोंमें आपके प्रभावसे आच्छादित हैं। आप देवताओंको उत्तम फल देनेवाले, स्वर्गकी रमणियोंके लिये सुन्दर पल्लवरूप, सभी लोगोंके मनको प्रिय लगनेवाले, सभी जीवोंके मनके हरणकर्ता, विमानरूपी अनेक वृक्षोंसे युक्त, मेघोंके जलरूप मधु टपकानेवाले, दिव्य लोकरूप महान् स्कन्धवाले, सत्यलोकरूप शाखाओंसे युक्त, सागररूप रस, रसातलकी तरह जलके आश्रयस्थान, ऐरावतरूप वृक्षसे युक्त तथा जन्तुओं और पक्षियोंसे सुसेवित हैं ॥ १२–२१ ॥

शीलाचारार्यगन्धस्त्वं सर्वलोकमयो द्रुमः। द्वादशार्कमयद्वीपो रुद्रैकादशपत्तनः ॥ २२ ॥
वस्वष्टाचलसंयुक्तस्त्रैलोक्याम्भोमहोदधिः। सिद्धसाध्योर्मिकलिलः सुपर्णानिलसेवितः ॥ २३ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

दैत्यलोकमहाग्राहो रक्षोरगझषाकुलः । पितामहमहाधैर्यः स्वर्गस्त्रीरत्नभूषितः ॥ २४
धीश्रीह्रीकान्तिभिर्नित्यं नदीभिरुपशोभितः । कालयोगमहापर्वप्रयागगतिवेगवान् ॥ २५
त्वं स्वयोगमहावीर्यो नारायण महार्णवः । कालो भूत्वा प्रसन्नाभिरद्भिर्ह्लादयसे पुनः ॥ २६
त्वया सृष्टास्त्रयो लोकास्त्वयैव प्रतिसंहृताः । विशन्ति योगिनः सर्वे त्वामेव प्रतियोजिताः ॥ २७
युगे युगे युगान्ताग्निः कालमेघो युगे युगे । मम भारावताराय देव त्वं हि युगे युगे ॥ २८
त्वं हि शुक्लः कृतयुगे त्रेतायां चम्पकप्रभः । द्वापरे रक्तसंकाशः कृष्णः कलियुगे भवान् ॥ २९
वैवर्ण्यमभिधत्से त्वं प्राप्तेषु युगसंधिषु । वैवर्ण्य सर्वधर्माणामुत्पादयसि वेदवित् ॥ ३०
भासि वासि प्रतपसि त्वं च पासि विचेष्टसे । क्रुद्ध्यसि क्षान्तिमायासि त्वं दीपयसि वर्षसि॥ ३१
त्वं हास्यसि न निर्यासि निर्वापयसि जाग्रसि । निःशेषयसि भूतानि कालो भूत्वा युगक्षये ॥ ३२

आप शील, सदाचार और श्रेष्ठ गन्धसे युक्त, सर्वलोकमय वृक्ष, बारह आदित्योंसे युक्त द्वीप, ग्यारह रुद्ररूप नगर, आठों वसुरूप पर्वत, त्रिलोकीरूप जलसे परिपूर्ण महासागर, सिद्ध और साध्यरूप लहरोंसे युक्त, गरुड़रूप वायुसे सेवित, दैत्यसमूहरूप महान् ग्राह, राक्षस और नागरूपी मछलियोंसे व्याप्त, ब्रह्मारूप महान् धैर्यसम्पन्न, स्वर्गकी अप्सरारूप रत्नसे विभूषित हैं । आप बुद्धि, लक्ष्मी, लज्जा और कान्तिरूपी नदियोंसे नित्य सुशोभित तथा कालके योगसे उत्पन्न होनेवाले महापर्वके समय वेगपूर्वक प्रयागमें गमन करनेवाले हैं । नारायण ! आप अपने योगरूपी महापराक्रमसे सम्पन्न महासागर हैं और पुनः आप ही काल बनकर निर्मल जलसे जगत्को आह्लादित करते हैं । आपने तीनों लोकोंकी सृष्टि की है और आपसे ही उनका संहार होता है । आपके द्वारा नियुक्त किये गये सभी योगी आपमें प्रविष्ट होते हैं । देव ! आप प्रत्येक युगमें प्रलया और प्रत्येक युगमें प्रलयकालीन मेघ हैं तथा मेरा भ उतारनेके लिये आप प्रत्येक युगमें अवतीर्ण होते है आप कृतयुगमें श्वेतवर्ण, त्रेतामें चम्पक-पुष्प-सदृश पी वर्ण, द्वापरमें रक्तवर्ण और कलियुगमें श्यामवर्ण हो ज हैं । वेदज्ञ ! युग-संधियोंके प्राप्त होनेपर आप विवर्ण को धारण करते हैं और सभी धर्मोंमें विपरीतता उत्प कर देते हैं । आप प्रकाशित होते, प्रवाहित होते, तप रक्षा करते और चेष्टा करते हैं । आप क्रोध करते, शा धारण करते, उद्दीप्त करते और वर्षा करते हैं । आ हँसते, स्थिर रहते, मारते और जागते रहते हैं त प्रलयकालमें काल बनकर सभी जीवोंको निःशेष क देते हैं ॥ २२–३२ ॥

शेषमात्मानमालोक्य विशेषयसि त्वं पुनः । युगान्ताग्न्यवलीढेषु सर्वभूतेषु किञ्चन ॥ ३३
यातेषु शेषो भवसि तस्माच्छेषोऽसि कीर्तितः । च्यवनोत्पत्तियुक्तेषु ब्रह्मेन्द्रवरुणादिषु ॥ ३४
यस्मान्न च्यवसे स्थानात् तस्मात् संकीर्त्यसेऽच्युतः । ब्रह्माणमिन्द्रं च यमं रुद्रं वरुणमेव च ॥ ३५
निगृह्य हरसे यस्मात् तस्माद्धरिरिहोच्यसे । संतानयसि भूतानि वपुषा यशसा श्रिया ॥ ३६
परेण वपुषा देव तस्माच्चासि सनातनः । यस्माद् ब्रह्मादयो देवा मुनयश्चोग्रतेजसः ॥ ३७
न तेऽन्तं त्वधिगच्छन्ति तेनानन्तस्त्वमुच्यसे । न क्षीयसे न क्षरसे कल्पकोटिशतैरपि ॥ ३८
तस्मात् त्वमक्षरत्वाच्च अक्षरश्च प्रकीर्तितः । विष्टब्धं यत्त्वया सर्वं जगत्स्थावरजङ्गमम् ॥ ३९
जगद्विष्टम्भनाच्चैव विष्णुरेवेति कीर्त्यसे । विष्टभ्य तिष्ठसे नित्यं त्रैलोक्यं सचराचरम् ॥ ४०
यक्षगन्धर्वनगरं सुमहद्भूतपन्नगम् । व्याप्तं त्वयैव विशता त्रैलोक्यं सचराचरम् ॥ ४१
तस्माद् विष्णुरिति प्रोक्तः स्वयमेव स्वयम्भुवा । नारा इत्युच्यते ह्यापो ह्यृषिभिस्तत्त्वदर्शिभिः॥ ४२
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः । युगे युगे प्रनष्टां गां विष्णो विन्दसि तत्त्वतः ॥ ४३
गोविन्देति ततो नाम्ना प्रोच्यसे ऋषिभिस्तथा । हृषीकाणीन्द्रियाण्याहुस्तत्त्वज्ञानविशारदाः ॥ ४४
ईशिता च त्वमेतेषां हृषीकेशस्तथोच्यसे ।

Sri Vidyabharathi Book Centre, Sringeri

*

CC-O. In Public Domain. Digitized by eGangotri

फिर अपनेको शेष बचा हुआ देखकर पुनः आप उसकी वृद्धि करते हैं। युगान्तकी अग्निमें सभी भूतोंके दग्ध हो जानेपर एकमात्र आप शेष रहते हैं, इसलिये आप 'शेष' नामसे पुकारे जाते हैं। ब्रह्मा, इन्द्र, वरुण आदि देवता उत्पत्ति और पतनसे युक्त हैं, किंतु आप अपने स्थानसे च्युत नहीं होते, इसीलिये 'अच्युत' कहलाते हैं। चूँकि आप ब्रह्मा, इन्द्र, यम, रुद्र और वरुणका निग्रहपूर्वक हरण करते हैं, इसलिये यहाँ 'हरि' कहे जाते हैं। देव! आप अपने शरीर, यश, श्री और विराट् शरीरद्वारा सभी जीवोंका विस्तार करते हैं, इसलिये 'सनातन' हैं। चूँकि ब्रह्मा आदि देवगण और उग्र तेजस्वी मुनिगण आपका अन्त नहीं जान पाते, इसीलिये आप 'अनन्त' कहे जाते हैं। सैकड़ों करोड़ कल्पोंमें भी न तो आप क्षीण होते हैं और न नष्ट होते हैं, इसलिये विनाशरहित होनेके कारण आप 'अक्षर' कहे गये हैं। आप सम्पूर्ण चराचर जगत्‌को स्तम्भित किये रहते हैं, इसलिये जगत्‌का विष्टम्भन करनेके कारण 'विष्णु' कहे जाते हैं। आप सचराचर त्रिलोकीको नित्य अवरुद्ध करके स्थित रहते हैं तथा आप ही यक्षों एवं गन्धर्वोंके नगरोंसे सम्पन्न और महान् नागोंसे युक्त चराचरसहित त्रिलोकीमें प्रवेश करके उसे व्याप्त किये रहते हैं, इसीलिये स्वयं ब्रह्माने आपको 'विष्णु'नामसे अभिहित किया है। तत्त्वदर्शी ऋषियोंने जलका नाम 'नारा' कहा है और वह पूर्वकालमें आपका निवासस्थान था, इसीसे आप 'नारायण'कहे जाते हैं। विष्णो! प्रत्येक युगमें नष्ट हुई गोरूपिणी पृथ्वीको तत्त्वतः आप ही प्राप्त करते हैं, इसीलिये ऋषिगण आपको 'गोविन्द' नामसे पुकारते हैं। तत्त्वज्ञानमें निपुणजन इन्द्रियोंको हृषीक कहते हैं और आप उन इन्द्रियोंके शासक हैं, अतः 'हृषीकेश' कहे जाते हैं॥ ३३-४४½॥

वसन्ति त्वयि भूतानि ब्रह्मादीनि युगक्षये॥ ४५॥
त्वं वा वससि भूतेषु वासुदेवस्तथोच्यसे। संकर्षयसि भूतानि कल्पे कल्पे पुनः पुनः॥ ४६॥
ततः संकर्षणः प्रोक्तस्तत्त्वज्ञानविशारदैः। प्रतिव्यूहेन तिष्ठन्ति सदेवासुरराक्षसाः॥ ४७॥
प्रविद्युः सर्वधर्माणां प्रद्युम्नस्तेन चोच्यसे। निरोद्धा विद्यते यस्मान्न ते भूतेषु कश्चन॥ ४८॥
अनिरुद्धस्ततः प्रोक्तः पूर्वमेव महर्षिभिः। यत् त्वया धार्यते विश्वं त्वया संह्रियते जगत्॥ ४९॥
त्वं धारयसि भूतानि भुवनं त्वं बिभर्षि च। यत् त्वया धार्यते किंचित् तेजसा च बलेन च॥ ५०॥
मया हि धार्यते पश्चान्नाधृतं धारये त्वया। न हि तद् विद्यते भूतं त्वया यन्नात्र धार्यते॥ ५१॥
त्वमेव कुरुषे देव नारायण युगे युगे। मम भारावतरणं जगतो हितकाम्यया॥ ५२॥
तवैव तेजसाऽऽक्रान्तां रसातलतलं गताम्। त्रायस्व मां सुरश्रेष्ठ त्वामेव शरणं गताम्॥ ५३॥
दानवैः पीड्यमानाहं राक्षसैश्च दुरात्मभिः। त्वामेव शरणं नित्यमुपयामि सनातनम्॥ ५४॥
तावन्मेऽस्ति भयं देव यावन्न त्वां ककुद्मिनम्। शरणं यामि मनसा शतशोऽप्युपलक्षये॥ ५५॥
उपमानं न ते शक्ताः कर्तुं सेन्द्रा दिवौकसः। तत्त्वं त्वमेव तद् वेत्सि निरुत्तरमतः परम्॥ ५६॥

युगान्तके समय ब्रह्मा आदि सभी प्राणी आपमें निवास करते हैं और आप प्राणियोंमें निवास करते हैं, इसीलिये आप 'वासुदेव' कहलाते हैं। प्रत्येक कल्पमें आप पुनः-पुनः प्राणियोंको आकर्षित करते हैं, इसीलिये तत्त्वज्ञानविशारदोंने आपको 'संकर्षण' कहा है। आपके प्रभावसे देवता, असुर और राक्षस अपने-अपने व्यूहोंमें स्थित रहते हैं तथा आप सभी धर्मोंके विशेषज्ञ हैं, अतः 'प्रद्युम्न' नामसे कहे जाते हैं। चूँकि सभी प्राणियोंमें कोई भी आपका निरोध करनेवाला नहीं है, इसीलिये महर्षियोंने पहलेसे ही आपका 'अनिरुद्ध' नाम रख दिया है। आप विश्वको धारण करते हैं, आप ही जगत्‌का संहार भी करते हैं, आप ही प्राणियोंको

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

धारण करते हैं और आप ही भुवनका पालन-पोषण करते हैं। आप अपने तेज और बलसे जो कुछ धारण करते हैं, उसीको पीछे मैं भी धारण करती हूँ। आपके द्वारा धारण न की हुई वस्तुको मैं धारण नहीं करती। ऐसा कोई भी प्राणी नहीं है, जिसे आपने इस जगत्‌में धारण न किया हो। नारायण देव! आप ही प्रत्येक युगमें संसारकी कल्याण-भावनासे मेरे ऊपर पड़नेवाले असहनीय भारको दूर करते हैं। मैं आपके ही तेजसे आक्रान्त हो रसातलमें पहुँच गयी हूँ। सुरश्रेष्ठ! मैं आपकी शरणागत हूँ, आप मेरी रक्षा कीजिये। मैं दुरात्मा दानवों एवं राक्षसोंसे पीड़ित होकर नित्य आप सनातनकी ही शरणमें जाती हूँ। देव! मेरे लिये भय तभीतक रहता है, जबतक मैं मनसे आप ककुद्मीकी शरणमें नहीं आती हूँ। मैंने सैकड़ों बार ऐसा देखा है। इन्द्रसहित समस्त देवगण आपकी समानता करनेमें समर्थ नहीं हैं। आप ही उस परम तत्त्वके ज्ञाता हैं। इसके बाद अब मुझे कुछ नहीं कहना है॥ ४५-५६॥

शौनक उवाच

ततः प्रीतः स भगवान् पृथिव्यै शार्ङ्गचक्रधृक्। काममस्या यथाकाममभिपूरितवान् हरिः॥ ५७॥
अब्रवीच्च महादेवि माधवीयं स्तवोत्तमम्। धारयिष्यति यो मर्त्यो नास्ति तस्य पराभवः॥ ५८॥
लोकान् निष्कल्मषांश्चैव वैष्णवान् प्रतिपत्स्यते। एतदाश्चर्यसर्वस्वं माधवीयं स्तवोत्तमम्॥ ५९॥
अधीतवेदः पुरुषो मुनिः प्रीतमना भवेत्॥ ६०॥
मा भैर्धरणि कल्याणि शान्तिं व्रज ममाग्रतः। एष त्वामुचितं स्थानं प्रापयामि मनीषितम्॥ ६१॥

शौनकजीने कहा—तदनन्तर शार्ङ्गधनुष और चक्र धारण करनेवाले भगवान् विष्णुने पृथ्वीपर प्रसन्न होकर उसके यथेष्ट मनोरथको पूर्ण कर दिया। तत्पश्चात् उन्होंने कहा—'महादेवि! जो मनुष्य इस उत्तम माधवीय स्तोत्रको धारण करेगा, उसका कभी पराभव नहीं होगा। वह पापरहित वैष्णव-लोकोंको प्राप्त होगा। यह उत्तम माधवीय स्तोत्र सभी आश्चर्योंसे परिपूर्ण है। वेदाध्यायी पुरुष और मुनि इससे प्रसन्न हो जाते हैं। धरणि! तुम भय मत करो। कल्याणि! तुम मेरे सामने शान्ति धारण करो। मैं तुम्हें मनसेप्सित उचित स्थान प्राप्त कराऊँगा॥ ५७-६१॥

शौनक उवाच

ततो महात्मा मनसा दिव्यं रूपमचिन्तयत्। किं नु रूपमहं कृत्वा उद्धरेयं धरामिमाम्॥ ६२॥
जलक्रीडारुचिस्तस्माद्वाराहं वपुरास्थितः। अधृष्यं सर्वभूतानां वाङ्मयं ब्रह्म संस्थितम्॥ ६३॥
शतयोजनविस्तीर्णमुच्छ्रितं द्विगुणं ततः। नीलजीमूतसंकाशं मेघस्तनितनिःस्वनम्॥ ६४॥
गिरिसंहननं भीमं श्वेततीक्ष्णाग्रदंष्ट्रिणम्।
विद्युदग्निप्रतीकाशमादित्यसमतेजसम्। पीनवृत्तायतस्कन्धं दृप्तशार्दूलगामिनम्॥ ६५॥
पीनोन्नतकटीदेशं वृषलक्षणपूजितम्। रूपमास्थाय विपुलं वाराहमजितो हरिः॥ ६६॥
पृथिव्युद्धरणायैव प्रविवेश रसातलम्। वेदपादो यूपदंष्ट्रः क्रतुदन्तश्चितीमुखः॥ ६७॥
अग्निजिह्वो दर्भलोमा ब्रह्मशीर्षो महातपाः। अहोरात्रेक्षणधरो वेदाङ्गश्रुतिभूषणः॥ ६८॥
आज्यनासः स्रुवतुण्डः सामघोषस्वनो महान्। सत्यधर्ममयः श्रीमान् कर्मविक्रमसत्कृतः॥ ६९॥
प्रायश्चित्तनखो घोरः पशुजानुर्मखाकृतिः। उद्गीथहोमलिङ्गोऽथ बीजौषधिमहाफलः॥ ७०॥
वाय्वन्तरात्मा यज्ञास्थिविकृतिः सोमशोणितः। वेदस्कन्धो हविर्गन्धो हव्यकव्यविभागवान्॥ ७१॥
प्राग्वंशकायो द्युतिमान् नानादीक्षाभिरन्वितः। दक्षिणाहृदयो योगी महासत्रमयो महान्॥ ७२॥
उपाकर्मोष्ठरुचकः प्रवर्ग्यावर्तभूषणः।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

नानाच्छन्दोगतिपथो गुह्योपनिषदासनः। छायापत्नीसहायो वै मणिश‍ृङ्ग इवोच्छ्रितः ॥ ७३ ॥
रसातलतले मग्नां रसातलतलं गताम्। प्रभुर्लोकहितार्थाय दंष्ट्राग्रेणोज्जहार ताम् ॥ ७४ ॥

शौनकजीने कहा—तदनन्तर भगवान् विष्णुने मनमें दिव्य स्वरूपका चिन्तन किया और सोचने लगे कि मैं कौन-सा रूप धारणकर इस पृथ्वीका उद्धार करूँ। ऐसा सोचते हुए उन्हें जलक्रीडाकी रुचि उत्पन्न हो गयी, इसलिये उन्होंने शूकरका शरीर धारण किया। वह रूप सभी प्राणियोंके लिये अजेय, वाङ्मय, ब्रह्मस्वरूप, सौ योजनोंमें विस्तृत, उससे दुगुना ऊँचा, नीले मेघके समान कान्तिमान्, मेघोंकी गड़गड़ाहटके सदृश शब्दसे युक्त, पर्वतके समान सुदृढ़, भयंकर, श्वेत एवं तीखे अग्रभागवाले दाढ़ोंसे युक्त, बिजली एवं अग्निकी भाँति कान्तिमान्, सूर्यके समान तेजस्वी, मोटे एवं चौड़े कंधेसे सुशोभित, गर्वीले सिंहकी-सी चालवाला, मोटे एवं ऊँचे कटिभागसे सम्पन्न और वृषभके लक्षणोंसे युक्त था। तब अजेय भगवान् विष्णुने ऐसा विशाल वराह स्वरूप धारणकर पृथ्वीका उद्धार करनेके लिये रसातलमें प्रवेश किया। उन महातपस्वी भगवान् वराहके वेद चारों पैर थे, यज्ञ-स्तम्भ उनका दाढ़ें था, यज्ञ उनके दाँत थे, यज्ञका कुण्ड उनका मुख था, अग्नि उनकी जीभ थी, कुश उनके रोएँ थे, ब्रह्म उनका मस्तक था, दिन और रात उनके नेत्र थे, वेदोंके छः अङ्ग कानके आभूषण थे, घृताहुति उनकी नासिका थी, स्रुवा उनका थूथुन था, सामवेदका उच्चस्वर शब्द था, वे सत्य और धर्मसे युक्त, श्रीसम्पन्न और कर्मरूप पराक्रमसे सत्कृत थे। प्रायश्चित्त उनके भीषण नख और पशुगण जानु भाग थे। यज्ञ उनकी आकृति थी। उद्गीथद्वारा किया गया हवन उनका लिङ्ग था, बीज और ओषधियाँ महान् फल थीं, वायु उनका अन्तरात्मा, यज्ञ अस्थिविकार, सोमरस रक्त, वेद कंधे और हवि गन्ध था। वे भगवान् हव्य तथा कव्यके विभाग करनेवाले थे। प्राग्वंश उनका शरीर था। वे कान्तिमान् और अनेकों दीक्षाओंसे दीक्षित थे। दक्षिणा उनका हृदय था, वे परम योगी और महान् यज्ञमय महापुरुष थे। उपाकर्म उनके होठोंके फलक, प्रवर्ग्य सम्पूर्ण आभूषण, समस्त वेद गमन-मार्ग और गोपनीय उपनिषदें उनकी आसन थीं। छाया उनकी पत्नी थी, वे मणि-श‍ृङ्गके समान ऊँचे थे। ऐसे वराह भगवान्ने रसातलमें जाकर डूबी हुई पृथ्वीका लोकहितकी कामनासे अपने दाढ़ोंके अग्रभागपर रखकर उद्धार किया ॥ ६२–७४ ॥

ततः स्वस्थानमानीय वराहः पृथिवीधरः। मुमोच पूर्वं मनसा धारितां च वसुंधराम् ॥ ७५ ॥
ततो जगाम निर्वाणं मेदिनी तस्य धारणात्। चकार च नमस्कारं तस्मै देवाय शम्भवे ॥ ७६ ॥
एवं यज्ञवराहेण भूत्वा भूतहितार्थिना। उद्धृता पृथिवी देवी सागराम्बुगता पुरा ॥ ७७ ॥
अथोद्धृत्य क्षितिं देवो जगतः स्थापनेच्छया। पृथिवीप्रविभागाय मनश्चक्रेऽम्बुजेक्षणः ॥ ७८ ॥
रसां गतामवनिमचिन्त्यविक्रमः सुरोत्तमः प्रवरवराहरूपधृक्।
वृषाकपिः प्रसभमथैकदंष्ट्रया समुद्धरद्धरणिमतुल्यपौरुषः ॥ ७९ ॥

इति श्रीमात्स्ये महापुराणे वराहप्रादुर्भावो नामाष्टचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४८ ॥

इसके बाद पृथ्वीको धारण करनेवाले वराह भगवान्ने पहले मनसे धारण की हुई वसुंधराको अपने स्थानपर लाकर छोड़ दिया। उनके धारण करनेसे पृथ्वीने भी शान्ति-लाभ किया और उन कल्याणकारी भगवान्को नमस्कार किया। इस प्रकार पूर्वकालमें भगवान्ने प्राणियोंका हित करनेकी इच्छासे यज्ञवराहरूप धारण कर सागरके जलमें निमग्न हुई पृथ्वीदेवीका उद्धार किया था। इस प्रकार पृथ्वीका उद्धार कर कमलनयन

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

भगवान् विष्णुने जगत्की स्थापनाके लिये पृथ्वीको विभक्त करनेका विचार किया। इस प्रकार अचिन्त्यपराक्रमी, अनुपम पुरुषार्थी, सुरश्रेष्ठ, श्रेष्ठ वराहका रूप धारण करनेवाले भगवान् वृषाकपिने* रसातलमें गयी हुई पृथ्वीका बलपूर्वक अपनी एक दाढ़द्वारा उद्धार किया था ॥ ७५—७९ ॥

इस प्रकार श्रीमत्स्यमहापुराणमें वराह-प्रादुर्भाव नामक दो सौ अड़तालीसवाँ अध्याय सम्पूर्ण हुआ ॥ २४८ ॥

दो सौ उनचासवाँ अध्याय

अमृत-प्राप्तिके लिये समुद्र-मन्थनका उपक्रम और वारुणी (मदिरा) का प्रादुर्भाव

ऋषय ऊचुः

नारायणस्य माहात्म्यं श्रुत्वा सूत यथाक्रमम्। न तृप्तिर्जायतेऽस्माकमतः पुनरिहोच्यताम् ॥ १ ॥
कथं देवा गताः पूर्वममरत्वं विचक्षणाः। तपसा कर्मणा वापि प्रसादात् कस्य तेजसा ॥ २ ॥

ऋषियोंने पूछा—सूतजी ! भगवान् नारायणके माहात्म्यको क्रमशः सुनकर हमलोगोंकी तृप्ति नहीं हो रही है, अतः उसे पुनः बतलाइये। प्राचीनकालमें चतुर देवतालोग तपस्या या कर्मसे अथवा किस देवताकी कृपासे किस प्रकार अमरत्वको प्राप्त हुए थे ? ॥ १—२ ॥

सूत उवाच

यत्र नारायणो देवो महादेवश्च शूलधृक्। तत्रामरत्वे सर्वेषां सहायौ तत्र तौ स्मृतौ ॥ ३ ॥
पुरा देवासुरे युद्धे हताश्च शतशः सुरैः। पुनः संजीवनीं विद्यां प्रयोज्य भृगुनन्दनः ॥ ४ ॥
जीवापयति दैत्येन्द्रान् यथा सुप्तोत्थितानिव। तस्य तुष्टेन देवेन शंकरेण महात्मना ॥ ५ ॥
मृतसंजीवनी नाम विद्या दत्ता महाप्रभा। तां तु माहेश्वरीं विद्यां महेश्वरमुखोद्गताम् ॥ ६ ॥
भार्गवे संस्थितां दृष्ट्वा मुमुदुः सर्वदानवाः। ततोऽमरत्वं दैत्यानां कृतं शुक्रेण धीमता ॥ ७ ॥
या नास्ति सर्वलोकानां देवानां यक्षरक्षसाम्। न नागानामृषीणां च न च ब्रह्मेन्द्रविष्णुषु ॥ ८ ॥
तां लब्ध्वा शंकराच्छुक्रः परां निर्वृतिमागतः। ततो देवासुरो घोरः समरः सुमहानभूत् ॥ ९ ॥
तत्र देवैर्हतान् दैत्याञ् शुक्रो विद्याबलेन च। उत्थापयति दैत्येन्द्राँल्लीलयैव विचक्षणः ॥ १० ॥
एवंविधेन शक्रस्तु बृहस्पतिरुदारधीः। हन्यमानास्ततो देवाः शतशोऽथ सहस्रशः ॥ ११ ॥
विषण्णवदनाः सर्वे बभूवुर्विकलेन्द्रियाः।
ततस्तेषु विषण्णेषु भगवान् कमलोद्भवः। मेरुपृष्ठे सुरेन्द्राणामिदमाह जगत्पतिः ॥ १२ ॥

सूतजी कहते हैं—ऋषियो ! जहाँ भगवान् विष्णु और शूलधारी शंकरजी वर्तमान हैं, वहाँ वे ही दोनों सभी देवताओंकी अमरत्व-प्राप्तिमें सहायक माने गये हैं। प्राचीनकालमें देवासुर-संग्राममें देवताओंद्वारा मारे गये सैकड़ों राक्षसोंको भृगुनन्दन शुक्राचार्य संजीवनी विद्याका प्रयोग करके जीवित कर देते थे। तब वे दैत्येन्द्र फिर सोकर उठे हुएकी तरह उठकर लड़ने लगते थे। परम कान्तिमती मृत-संजीवनी विद्या शुक्राचार्यको उनपर प्रसन्न हुए भगवान् शंकरने दी थी। महेश्वरके मुखसे निकली हुई उस माहेश्वरी विद्याको शुक्राचार्यमें संस्थित देखकर दानवगण अतिशय प्रमुदित थे। इस विद्याके प्रभावसे बुद्धिमान् शुक्राचार्यने राक्षसोंको अमर कर दिया था। जो विद्या न तो सम्पूर्ण लोकों, देवों, यक्षों और राक्षसोंमें थी, न नागों और ऋषियोंमें तथा न ब्रह्मा, इन्द्र और विष्णुमें थी, उसे

* निरुक्तादिके अनुसार वृषाकपिका अर्थ महादेव, वाराहावतार विष्णु तथा (हनुमान्) आदि है। निरुक्त एवं अन्य वैदिक तथा व्याकरणादि ग्रन्थोंके अनुसार इनकी पत्नी 'वृषाकपायी' कही गयी हैं।

Sri Vidyabharathi Book Centre, Bangalore

CC-O. In Public Domain. Digitized by eGangotri

शंकरजीसे प्राप्तकर शुक्र परम संतुष्ट थे। इसके बाद देवताओं और राक्षसोंमें महान् भीषण युद्ध छिड़ गया। उसमें देवताओंद्वारा मारे गये दैत्येन्द्रोंको परम निपुण आचार्य शुक्र अपनी विद्याके बलसे देखते-ही-देखते तुरंत जीवित कर देते थे। इस प्रकार सैकड़ों-हजारों देवताओंको मारा जाता हुआ देखकर इन्द्र, उदारहृदय बृहस्पति तथा सभी देवताओंके मुख सूख गये और उनकी इन्द्रियाँ विकल हो गयीं। इस प्रकार उनके चिन्तित होनेपर कमलोद्भव जगत्पति भगवान् ब्रह्माने सुमेरु पर्वतपर अवस्थित देवताओंसे इस प्रकार कहा ॥ ३–१२ ॥

ब्रह्मोवाच

देवाः शृणुत मद्वाक्यं तत्तथैव निरूप्यताम्। क्रियतां दानवैः सार्धं सख्यमत्राभिधीयताम् ॥ १३ ॥
क्रियताममृतोद्योगो मथ्यतां क्षीरवारिधिः। सहायं वरुणं कृत्वा चक्रपाणिर्विबोध्यताम् ॥ १४ ॥
मन्थानं मन्दरं कृत्वा शेषनेत्रेण वेष्टितम्। दानवेन्द्रो बलिः स्वामी स्तोककालं निवेश्यताम् ॥ १५ ॥
प्रार्थ्यतां कूर्मरूपश्च पाताले विष्णुरव्ययः। प्रार्थ्यतां मन्दरः शैलो मन्थकार्यं प्रवर्त्यताम् ॥ १६ ॥
तच्छ्रुत्वा वचनं देवा जग्मुर्दानवमन्दिरम्। अलं विरोधेन वयं भृत्यास्तव बलेऽधुना ॥ १७ ॥
क्रियताममृतोद्योगो व्रियतां शेषनेत्रकम्। त्वया चोत्पादिते दैत्य अमृतेऽमृतमन्थने ॥ १८ ॥
भविष्यामोऽमराः सर्वे त्वत्प्रसादान्न संशयः। एवमुक्तस्तदा देवैः परितुष्टः स दानवः ॥ १९ ॥
यथा वदत हे देवास्तथा कार्यं मयाधुना। शक्तोऽहमेक एवात्र मथितुं क्षीरवारिधिम् ॥ २० ॥
आहरिष्येऽमृतं दिव्यममृतत्वाय वोऽधुना। सुदूरादाश्रयं प्राप्तान् प्रणतानपि वैरिणः ॥ २१ ॥
यो न पूजयते भक्त्या प्रेत्य चेह विनश्यति। पालयिष्यामि वः सर्वानधुना स्नेहमास्थितः ॥ २२ ॥
एवमुक्त्वा स दैत्येन्द्रो देवैः सह ययौ तदा। मन्दरं प्रार्थयामास सहायत्वे धराधरम् ॥ २३ ॥
मन्था भव त्वमस्माकमधुनामृतमन्थने। सुरासुराणां सर्वेषां महत्कार्यमिदं यतः ॥ २४ ॥
तथेति मन्दरः प्राह यद्याधारो भवेन्मम। यत्र स्थित्वा भ्रमिष्यामि मथिष्ये वरुणालयम् ॥ २५ ॥
कल्प्यतां नेत्रकार्ये यः शक्तः स्याद् भ्रमणे मम। ततस्तु निर्गतौ देवौ कूर्मशेषौ महाबलौ ॥ २६ ॥
विष्णोर्भागौ चतुर्थांशाद्धरण्या धारणे स्थितौ। ऊचतुर्गर्वसंयुक्तं वचनं शेषकच्छपौ ॥ २७ ॥

ब्रह्माजी बोले—देवगण! आपलोग मेरी बात सुनिये और उसके अनुसार काम कीजिये। इस कार्यमें आप लोग दानवोंके साथ मित्रता कर लें और अमृत-प्राप्तिके लिये उपाय करें। इसके लिये चक्रपाणि भगवान् विष्णुको उद्बोधित कीजिये और वरुणको सहायक तथा शेषनागरूपी रस्सीसे परिवेष्टित मन्दराचलको मथानी बनाकर क्षीरसमुद्रका मन्थन कीजिये। थोड़े समयके लिये दानवेन्द्र बलिको अध्यक्षरूपमें नियुक्त कर दीजिये। पातालमें स्थित कूर्मरूप अव्यय भगवान् विष्णुकी और मन्दराचलकी प्रार्थना कीजिये। तत्पश्चात् समुद्र-मन्थनका कार्य प्रारम्भ कीजिये। उस कथनको सुनकर देवगण दानवराजके महलमें पहुँचे और कहने लगे—'बले! अब विरोध बंद कीजिये, हमलोग तो आपके भृत्य हैं। आप अमृत-प्राप्तिके लिये उद्योग करें और शेषनागको रस्सीके रूपमें वरण करें। दैत्य! अमृतमन्थनरूप कार्यमें आपके द्वारा अमृतके उत्पन्न हो जानेपर आपकी कृपासे हम सभी लोग निःसंदेह अमर हो जायँगे।' देवताओंद्वारा इस प्रकार कहे जानेपर दानवराज बलि उस समय प्रसन्न हो गया और कहने लगा—'देवगण! जैसा आपलोग कह रहे हैं, मुझे इस समय वैसा ही करना चाहिये। मैं तो अकेला ही क्षीरसागरका मन्थन करनेमें समर्थ हूँ। इस समय मैं आपलोगोंकी अमरताके निमित्त दिव्य अमृत ले आऊँगा। जो सुदूरसे आश्रयके लिये आये हुए शरणागत वैरियोंको भक्तिपूर्वक सम्मानित नहीं करता, उसका यह लोक और परलोक—दोनों नष्ट हो जाते हैं। इस समय मैं आप सभी लोगोंकी स्नेहपूर्वक रक्षा

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

करूँगा।' ऐसा कहकर दैत्येन्द्र बलि देवताओंके साथ तुरंत चल पड़ा और सहायताके लिये मन्दराचलसे प्रार्थना करते हुए बोला—'मन्दर! चूँकि इस समय हम सभी देवताओं और असुरोंका यह महान् कार्य उपस्थित हो गया है, अतः इस अमृत-मन्थनके कार्यमें तुम मथानी बन जाओ।' मन्दराचलने कहा—'यदि मुझे कोई आधार मिले तो मुझे स्वीकार है जिसपर स्थित होकर मैं भ्रमण करूँगा और वरुणालयको मथ डालूँगा। साथ ही मेरे भ्रमण करते समय जो समर्थ हो सके, ऐसा किसीको नेतीके कार्यके लिये चुनिये।' तदनन्तर महाबली कूर्म और शेषनाग—दोनों देवता पातालसे ऊपर आये। ये दोनों भगवान् विष्णुके चतुर्थांश भाग हैं और पृथ्वीको धारण करनेके लिये नियुक्त हैं। तब शेष और कच्छप गर्वपूर्ण वचन बोले॥ १३—२७॥

कूर्म उवाच

त्रैलोक्यधारणेनापि न ग्लानिर्मम जायते। किमु मन्दरकात् क्षुद्राद् गुटिकासंनिभादिह॥ २८॥

कूर्मने कहा—मुझे तो इस त्रिलोकीको धारण करनेपर भी थकावट नहीं होती तो भला इस कार्यमें गुटिकाके समान क्षुद्र मन्दरको धारण करनेकी क्या बात है!॥ २८॥

शेष उवाच

ब्रह्माण्डवेष्टनेनापि ब्रह्माण्डमथनेन वा। न मे ग्लानिर्भवेद् देहे किमु मन्दरवर्तने॥ २९॥
तत उत्पाट्य तं शैलं तत्क्षणात् क्षीरसागरे। चिक्षेप लीलया नागः कूर्मश्चाधःस्थितस्तदा॥ ३०॥
निराधारं यदा शैलं न शेकुर्देवदानवाः। मन्दरभ्रामणं कर्तुं क्षीरोदमथने तथा॥ ३१॥
नारायणनिवासं ते जग्मुर्बलिसमन्विताः। यत्रास्ते देवदेवेशः स्वयमेव जनार्दनः॥ ३२॥
तत्रापश्यन्त तं देवं सितपद्मप्रभं शुभम्। योगनिद्रासुनिरतं पीतवाससमच्युतम्॥ ३३॥
हारकेयूरनद्धाङ्गमहिपर्यङ्कसंस्थितम्। पादपद्मेन पद्मायाः स्पृशन्तं नाभिमण्डलम्॥ ३४॥
स्वपक्षव्यजनेनाथ वीज्यमानं गरुत्मता। स्तूयमानं समन्ताच्च सिद्धचारणकिंनरैः॥ ३५॥
आम्नायैर्मूर्तिमद्भिश्च स्तूयमानं समन्ततः।
सव्यबाहूपधानं तं तुष्टुवुर्देवदानवाः। कृताञ्जलिपुटाः सर्वे प्रणताः सर्वतोदिशम्॥ ३६॥

शेषनागने कहा—जब समस्त ब्रह्माण्डका वेष्टन बनने तथा उसका मन्थन करनेसे मेरे शरीरमें शिथिलता नहीं आती तो मन्दरके घुमानेसे कौन-सा कष्ट होगा! ऐसा कहकर नागने लीलापूर्वक उसी क्षण उस मन्दराचलको उखाड़कर क्षीरसागरमें डाल दिया। उस समय कूर्म उसके नीचे स्थित हुए। किंतु क्षीरसमुद्रका मन्थन आरम्भ होनेपर जब देवता और दानव उस आधारशून्य मन्दराचलको घुमानेमें समर्थ न हो सके, तब वे बलिको साथ लेकर भगवान् नारायणके निवासस्थानपर गये, जहाँ देवाधिदेव भगवान् जनार्दन विराजमान थे। वहाँ उन्होंने श्वेत कमलके समान कान्तिमान् एवं कल्याणकारी भगवान् अच्युतको देखा, जिनके शरीरपर पीताम्बर झलक रहा था, जो योगनिद्रामें निमग्न थे, जिनका शरीर हार और केयूरसे विभूषित था, जो शेषनागकी शय्यापर शयन कर रहे थे और अपने चरणकमलसे लक्ष्मीके नाभिमण्डलका स्पर्श कर रहे थे, गरुड़ अपने डैनेरूपी पंखसे जिनपर हवा कर रहे थे, चारों ओरसे सिद्ध, चारण और किंनर जिनकी स्तुतिमें तन्मय थे, मूर्तिमान् वेद चारों ओरसे जिनकी स्तुति कर रहे थे तथा जो अपनी बायीं भुजाको तकिया बनाये हुए थे। तब वे सभी देव-दानव सब ओरसे हाथ जोड़कर प्रणाम करके उन भगवान्की स्तुति करने लगे॥ २९—३६॥

Sri Vidyadhiraja Book Centre Sringeri

CC-O. In Public Domain. Digitized by eGangotri

देवदानवा ऊचुः

नमो लोकत्रयाध्यक्ष तेजसा जितभास्कर । नमो विष्णो नमो जिष्णो नमस्ते कैटभार्दन ॥ ३७ ॥
नमः सर्गक्रियाकर्त्रे जगत्पालयते नमः । रुद्ररूपाय शर्वाय नमः संहारकारिणे ॥ ३८ ॥
नमः शूलायुधाधृष्य नमो दानवघातिने । नमः क्रमत्रयाक्रान्त त्रैलोक्यायाभवाय च ॥ ३९ ॥
नमः प्रचण्डदैत्येन्द्रकुलकालमहानल । नमो नाभिह्रदोद्भूतपद्मगर्भ महाबल ॥ ४० ॥
पद्मभूत महाभूत कर्त्रे हर्त्रे जगत्प्रिय । जनिता सर्वलोकेश क्रियाकारणकारिणे ॥ ४१ ॥
अमरारिविनाशाय महासमरशालिने । लक्ष्मीमुखाब्जमधुप नमः कीर्तिनिवासिने ॥ ४२ ॥
अस्माकममरत्वाय ध्रियतां ध्रियतामयम् । मन्दरः सर्वशैलानामयुतायुतविस्तृतः ॥ ४३ ॥
अनन्तबलबाहुभ्यामवष्टभ्यैकपाणिना । मथ्यताममृतं देव स्वधास्वाहार्थकामिनाम् ॥ ४४ ॥
ततः श्रुत्वा स भगवान् स्तोत्रपूर्वं वचस्तदा । विहाय योगनिद्रां तामुवाच मधुसूदनः ॥ ४५ ॥

देवताओं और दैत्योंने कहा—त्रिलोकीनाथ ! आप अपने तेजसे सूर्यको पराजित करनेवाले हैं, आपको नमस्कार है । विष्णुको प्रणाम है । जिष्णुको अभिवादन है । आप कैटभका वध करनेवाले हैं, आपको नमस्कार है । सृष्टि-कर्म करनेवालेको प्रणाम है । आप जगत्के पालनकर्ता हैं, आपको अभिवादन है । आप रुद्ररूपसे संहार करनेवाले हैं, आप शर्वको नमस्कार है । त्रिशूलरूप आयुधसे धर्षित न होनेवाले आपको प्रणाम है । दानवोंका वध करनेवाले आपको अभिवादन है । आप तीन पगसे त्रिलोकीको आक्रान्त कर लेनेवाले और अजन्मा हैं, आपको नमस्कार है । आप प्रचण्ड दैत्येन्द्रोंके कुलके लिये कालरूप महान् अग्नि हैं, आपको प्रणाम है । महाबल ! आपके नाभि-कुण्डसे पद्मकी उत्पत्ति हुई है, आपको अभिवादन है । आप पद्मको उत्पन्न करनेवाले, महाभूत, जगत्के कर्ता, हर्ता और प्रिय, सभीके जनक, सभी लोकोंके स्वामी, कार्य और कारण—दोनोंका निर्माण करनेवाले, अमरोंके शत्रुओंका विनाश करनेके लिये महान् समर करनेवाले, लक्ष्मीके मुखकमलके मधुप और यशमें निवास करनेवाले हैं, आपको नमस्कार है । आप हमलोगोंकी अमरत्व-प्राप्तिके लिये सभी पर्वतोंमें विशाल मन्दराचलको, जो अयुतायुत योजन विस्तृत है, अवश्य धारण कीजिये । देव ! आप अपनी अनन्त बलशालिनी भुजाओंद्वारा पर्वतको रोककर एक हाथसे स्वाहा-स्वधाके अभिलाषी देवताओंके उपकारार्थ अमृतका मन्थन कीजिये । तदनन्तर भगवान् मधुसूदन उस स्तुतिपूर्ण वचनको सुनकर उस योगनिद्राका परित्याग कर इस प्रकार बोले ॥

श्रीभगवानुवाच

स्वागतं विबुधाः सर्वे किमागमनकारणम् । यस्मात् कार्यादिह प्राप्तास्तद् ब्रूत विगतज्वराः ॥ ४६ ॥
नारायणेनैवमुक्ताः प्रोचुस्तत्र दिवौकसः । अमरत्वाय देवेश मथ्यमाने महोदधौ ॥ ४७ ॥
यथामृतत्वं देवेश तथा नः कुरु माधव । त्वया विना न तच्छक्यमस्माभिः कैटभार्दन ॥ ४८ ॥
प्राप्तुं तदमृतं नाथ ततोऽग्रे भव नो विभो । इत्युक्तश्च ततो विष्णुरप्रधृष्योऽरिमर्दनः ॥ ४९ ॥
जगाम देवैः सहितो यत्रासौ मन्दराचलः । वेष्टितो भोगिभोगेन धृतश्चामरदानवैः ॥ ५० ॥
विषभीतास्ततो देवा यतः पुच्छं ततः स्थिताः । मुखतो दैत्यसंघास्तु सैंहिकेयपुरःसराः ॥ ५१ ॥
सहस्रवदनं चास्य शिरः सव्येन पाणिना । दक्षिणेन बलिर्देहं नागस्याकृष्टवांस्तथा ॥ ५२ ॥
दधारामृतमन्थानं मन्दरं चारुकन्दरम् । नारायणः स भगवान् भुजयुग्मद्वयेन तु ॥ ५३ ॥
ततो देवासुरैः सर्वैर्जयशब्दपुरःसरम् । दिव्यं वर्षशतं साग्रं मथितः क्षीरसागरः ॥ ५४ ॥
ततः श्रान्तास्तु ते सर्वे देवा दैत्यपुरःसराः । श्रान्तेषु तेषु देवेन्द्रो मेघो भूत्वाम्बुशीकरान् ॥ ५५ ॥
ववर्षामृतकणांस्तान् ववौ वायुश्च शीतलः ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

श्रीभगवान्ने कहा—देवगण! आप सब लोगोंका स्वागत है। आपलोगोंके यहाँ आगमनका क्या उद्देश्य है? आपलोग जिस कार्यके लिये यहाँ आये हैं। उसे निश्चिन्त होकर बतलाइये। नारायणके ऐसा कहनेपर देवताओंने कहा—'देवेश! हमलोग अमरत्व-प्राप्तिके लिये समुद्रका मन्थन करना चाहते हैं। भगवान् माधव! हमें जिस उपायसे अमरत्वकी प्राप्ति हो सके, आप वैसा करें। कैटभशत्रो! आपके बिना हमलोग उस अमृतको प्राप्त नहीं कर सकते, अतः सर्वव्यापी नाथ! आप हमलोगोंके अग्रणी बनें।' उनके ऐसा कहनेपर शत्रुनाशक अजेय भगवान् विष्णु देवताओंके साथ उस स्थानपर गये, जहाँ मन्दराचल था। उस समय वह मन्दराचल शेषनागके फणोंसे लिपटा हुआ था तथा देवता और दानवगण उसे पकड़े हुए थे। उस समय विषके भयसे डरकर देवगण तो नागकी पूँछकी ओर और राहुको अगुआ बनाकर दैत्यगण मुखकी ओर स्थित थे। बलि शेषनागके हजार मुखवाले सिरको बायें हाथसे तथा देहको दाहिने हाथसे पकड़कर खींच रहा था। भगवान् नारायणने सुन्दर कन्दराओंसे सुशोभित अमृतके मन्थन-दण्डस्वरूप मन्दराचलको अपनी दोनों भुजाओंसे पकड़ा। इस प्रकार सभी देवताओं तथा दैत्योंने मिलकर जय-जयकार करते हुए सौ दिव्य वर्षोंसे भी अधिक कालतक क्षीरसागरका मन्थन करते रहे, तब दैत्योंसहित वे सभी देवता थक गये। उन लोगोंके थक जानेपर देवराज इन्द्र मेघरूप धारणकर उनके ऊपर अमृतके समान जलकणोंकी वृष्टि करने लगे और शीतल वायु बहने लगी॥ ४६—५५½॥

भग्नप्रायेषु देवेषु शान्तेषु कमलासनः॥ ५६॥
मथ्यतां मथ्यतां सिन्धुरित्युवाच पुनः पुनः। अवश्यमुद्योगवतां श्रीरपारा भवेत् सदा॥ ५७॥
ब्रह्मप्रोत्साहिता देवा ममन्थुः पुनरम्बुधिम्। भ्राम्यमाणे ततः शैले योजनायुतशेखरे॥ ५८॥
निपेतुर्हस्तियूथानि वराहशरभादयः। श्वापदायुतलक्षाणि तथा पुष्पफलद्रुमाः॥ ५९॥
ततः फलानां वीर्येण पुष्पौषधिरसेन च। क्षीरमम्बुधिजं सर्वं दधिरूपमजायत॥ ६०॥
ततस्तु सर्वजीवेषु चूर्णितेषु सहस्रशः। तदम्बुमेदसोत्सर्गाद् वारुणी समपद्यत॥ ६१॥
वारुणीगन्धमाघ्राय मुमुदुर्दैवदानवाः। तदास्वादेन बलिनो देवदैत्यादयोऽभवन्॥ ६२॥
ततोऽतिवेगाज्जगृहुर्नागेन्द्रं सर्वतोऽसुराः। मन्थानं मन्थयष्टिस्तु मेरुस्तत्राचलोऽभवत्॥ ६३॥
अभवच्चाग्रतो विष्णुर्भुजमन्दरबन्धनः। सवासुकिफणालग्नपाणिः कृष्णो व्यराजत॥ ६४॥
यथा नीलोत्पलैर्युक्तो ब्रह्मदण्डोऽतिविस्तरः। ध्वनिर्मेघसहस्रस्य जलधेरुत्थितस्तदा॥ ६५॥

उस समय प्रायः सभी देवताओंके शिथिल एवं शान्त हो जानेपर ब्रह्मा पुनः-पुनः इस प्रकार कहने लगे—'अरे! समुद्रका मन्थन करते चलो। उद्योगी पुरुषोंको सदा अपार लक्ष्मी अवश्य प्राप्त होती है।' ब्रह्माद्वारा इस प्रकार उत्साहित किये जानेपर देवासुरगण पुनः समुद्रका मन्थन करने लगे। इसके बाद दस हजार योजन विस्तृत शिखरवाले मन्दराचलके घुमाये जानेपर (उसके शिखरोंपरसे) हाथियोंके समूह, शूकर, अष्टापद शरभ करोड़ों हिंसक पशु आदि तथा पुष्पों और फलोंसे लदे हुए वृक्ष समुद्रमें गिरने लगे। उन गिरे हुए फलोंके सामर्थ्य तथा पुष्पों और ओषधियोंके रससे क्षीरसागरका जल दहीके रूपमें परिवर्तित हो गया। तदनन्तर उन सभी जीवोंके हजारों प्रकारसे चूर्ण हो जानेपर उनकी मज्जा और जलके संयोगसे वारुणी उत्पन्न हुई। उस वारुणीकी गन्धको सूँघकर देवता और दानव परम प्रसन्न हुए और उसके आस्वादनसे वे बलवान् हो गये। तब असुरोंने अत्यन्त वेगपूर्वक मथानी और शेषनागको चारों ओरसे पुनः पकड़ा। उस समय सुमेरु पर्वत मथानीका डंडा बना। भगवान् विष्णुने अग्रसर होकर अपनी भुजासे मन्दराचलको बाँध लिया। उस समय वासुकिके फणोंपर रखा हुआ

Sri Vidyabharathi Book Centre, Shimoga

CC-O. In Public Domain. Digitized by eGangotri

नका साँवला हाथ ऐसा शोभायमान हो रहा था तत्पश्चात् समुद्रसे हजारों मेघकी-सी गर्जना उद्भूत नो नीले कमलोंसे युक्त अत्यन्त विशा ब्रह्मदण्ड हो । हुई ॥ ५६–६५ ॥

भागे द्वितीये मघवानादित्यस्तु ततः परम् । ततो रुद्रा महोत्साहा वसवो गुह्यकादयः ॥ ६६ ॥
पुरतो विप्रचित्तिश्च नमुचिर्वृत्रशम्बरौ । द्विमूर्धा वज्रदंष्ट्रश्च सैंहिकेयो बलिस्तथा ॥ ६७ ॥
एते चान्ये च बहवो मुखभागमुपस्थिताः । ममन्थुरम्बुधिं दृप्ता बलतेजोविभूषिताः ॥ ६८ ॥
बभूवात्र महाघोषो महामेघरवोपमः । उदधेर्मथ्यमानस्य मन्दरेण सुरासुरैः ॥ ६९ ॥
तत्र नानाजलचरा विनिर्धूता महाद्रिणा । विलयं समुपाजग्मुः शतशोऽथ सहस्रशः ॥ ७० ॥
वारुणानि च भूतानि विविधानि महीधरः । पातालतलवासीनि विलयं समुपानयत् ॥ ७१ ॥
तस्मिंश्च भ्राम्यमाणेऽद्रौ संघृष्टाश्च परस्परम् । न्यपतन् पतगोपेताः पर्वताग्रान्महाद्रुमाः ॥ ७२ ॥
तेषां संघर्षणाच्चाग्निरर्चिर्भिः प्रज्वलन् मुहुः । विद्युद्भिरिव नीलाभ्रमावृणोन्मन्दरं गिरिम् ॥ ७३ ॥
ददाह कुञ्जरांश्चैव सिंहांश्चैव विनिःसृतान् । विगतासूनि सर्वाणि सत्त्वानि विविधानि च ॥ ७४ ॥

शेषनागके दूसरे भागमें इन्द्र, उसके बाद आदित्य, सके बाद महान् उत्साही रुद्रगण, वसुगण तथा गुह्यक दि थे । आगेकी ओर विप्रचित्ति, नमुचि, वृत्र, शम्बर, मूर्धा, वज्रदंष्ट्र, राहु तथा बलि थे । ये तथा इनके सिवा न्य बहुत-से राक्षस मुखभागमें उपस्थित थे । बल र तेजसे विभूषित एवं गर्वसे भरे हुए वे सभी मुद्रका मन्थन कर रहे थे । देवताओं और दानवोंद्वारा दराचलकी मथानीसे मन्थन किये जाते हुए समुद्रसे घगर्जनके समान भीषण ध्वनि निकलने लगी । वहाँ स महान् मन्दराचलसे पिसे हुए नाना प्रकारके सैकड़ों-हजारों जलचर नष्ट हो गये । उस पर्वतने वरुणलोकके पाताललोकवासी अनेकों प्रकारके प्राणियोंको विनाशके पथपर पहुँचा दिया । उस पर्वतके घुमाये जाते समय उस मन्दराचलके ऊपर उगे हुए विशाल वृक्ष पक्षियों-सहित परस्परके संघर्षणसे टूट-टूटकर गिर रहे थे । उनके संघर्षणसे उत्पन्न हुई अग्निने बारंबार प्रज्वलित होकर अपनी लपटोंसे मन्दराचलको उसी प्रकार आच्छादित कर लिया, जैसे बिजलियाँ नीले मेघको ढक लेती हैं । उस अग्निने पर्वतसे निकले हुए सिंहों और हाथियोंको तथा अनेकों प्रकारके प्राणरहित सभी जीवोंको भस्म कर दिया ॥ ६६–७४ ॥

तमग्निममरश्रेष्ठः प्रदहन्तमितस्ततः । वारिणा मेघजेनेन्द्रः शमयामास सर्वतः ॥ ७५ ॥
ततो नानारसास्तत्र सुस्रुवुः सागराम्भसि । महाद्रुमाणां निर्यासा बहवश्चौषधीरसाः ॥ ७६ ॥
तेषाममृतवीर्याणां रसानां पयसैव च । अमरत्वं सुरा जग्मुः काञ्चनच्छविसंनिभाः ॥ ७७ ॥
अथ तस्य समुद्रस्य तज्जातमुदकं पयः । रसान्तरैर्विमिश्रश्च ततः क्षीरादभूद् घृतम् ॥ ७८ ॥
ततो ब्रह्माणमासीनं देवा वचनमब्रुवन् । श्रान्ताः स्म सुभृशं ब्रह्मन् नोद्भवत्यमृतं च यत् ॥ ७९ ॥
ऋते नारायणात् सर्वे दैत्या देवोत्तमास्तथा । चिरायितमिदं चापि सागरस्य तु मन्थनम् ॥ ८० ॥
ततो नारायणं देवं ब्रह्मा वचनमब्रवीत् । विधत्स्वैषां बलं विष्णो भवानेव परायणम् ॥ ८१ ॥

तब देवश्रेष्ठ इन्द्रने इधर-उधर जलाती हुई उस ग्निको बादलके जलसे चारों ओरसे शान्त कर या । तदनन्तर उस समुद्रके जलमें नाना प्रकारके रस, शाल वृक्षोंके रस और ओषधियोंके रस अधिक मात्रामें पकने लगे । उन अमृतके समान गुणकारी रसोंसे युक्त जलसे सुवर्णकी भाँति देदीप्यमान देवगण अमरताको प्राप्त हो गये । समुद्रका जल दुग्धके रूपमें परिणत हो गया था, पुनः अनेक प्रकारके रसोंके मिश्रणसे वह दुग्धसे घृतके रूपमें परिवर्तित हो गया । तब वहाँ बैठे हुए ब्रह्मासे देवताओंने इस प्रकार कहा—'ब्रह्मन् ! हमलोग

Sri Vidyabharathi Book Centre - Sringeri

CC-O. In Public Domain. Digitized by eGangotri

बहुत थक गये हैं, किंतु जो अभीतक अमृत नहीं निकला, इसका कारण यह है कि भगवान् विष्णुको छोड़कर हम सभी देवगण तथा दैत्यगण समुद्रको मथनेमें देरी कर रहे हैं।' तब ब्रह्माने भगवान् विष्णुसे इस प्र कहा—'विष्णो! इन सबको बल प्रदान कीजिये; क्यों आप ही इनके शरणदाता हैं' ॥ ७५–८१ ॥

विष्णुरुवाच

बलं ददामि सर्वेषां कर्मैतद् ये समाश्रिताः। क्षुभ्यतां क्रमशः सर्वैर्मन्दरः परिवर्त्यताम् ॥ ८

इति श्रीमात्स्ये महापुराणेऽमृतमन्थने एकोनपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २४९ ॥

भगवान् विष्णु बोले—इस मन्थन-कार्यमें जितने लोग सम्मिलित हैं, उन सबको मैं बल प्रदान करता हूँ। अब सभी लोग मिलकर क्रमशः मन्दर पर्वतको घु और सागरको क्षुब्ध करें ॥ ८२ ॥

इस प्रकार श्रीमत्स्यमहापुराणमें अमृत-मन्थन नामक दो सौ उनचासवाँ अध्याय सम्पूर्ण हुआ ॥ २४९ ॥

दो सौ पचासवाँ अध्याय

अमृतार्थ समुद्र-मन्थन करते समय चन्द्रमासे लेकर विषतकका प्रादुर्भाव

सूत उवाच

नारायणवचः श्रुत्वा बलिनस्ते महोदधौ। तत्पयः सहिता भूत्वा चक्रिरे भृशमाकुलम् ॥ १
ततः शतसहस्रांशुसमान इव सागरात्। प्रसन्नाभः समुत्पन्नः सोमः शीतांशुरुज्ज्वलः ॥ २
श्रीरनन्तरमुत्पन्ना घृतात् पाण्डुरवासिनी। सुरादेवी समुत्पन्ना तुरगः पाण्डुरस्तथा ॥ ३
कौस्तुभश्च मणिर्दिव्यश्चोत्पन्नोऽमृतसम्भवः। मरीचिविकचः श्रीमान् नारायणउरोगतः ॥ ४
पारिजातश्च विकचकुसुमस्तबकाञ्चितः। अनन्तरमपश्यंस्ते धूममम्बरसंनिभम् ॥ ५
आपूरितदिशाभागं दुःसहं सर्वदेहिनाम्। तमाघ्राय सुराः सर्वे मूर्च्छिताः परिलम्बिताः ॥ ६
उपाविशन्नब्धितटे शिरः संगृह्य पाणिना। ततः क्रमेण दुर्वारः सोऽनलः प्रत्यदृश्यत ॥ ७
ज्वालामालाकुलाकारः समन्ताद् भीषणोऽर्चिषा। तेनाग्निना परिक्षिप्ताः प्रायशस्तु सुरासुराः ॥ ८
दग्धाश्चाप्यर्धदग्धाश्च बभ्रमुः सकला दिशः। प्रधाना देवदैत्याश्च भीषितास्तेन वह्निना ॥ ९
अनन्तरं समुद्भूतास्तस्माड् डुण्डुभजातयः। कृष्णसर्पा महादंष्ट्रा रक्ताश्च पवनाशनाः ॥ १०
श्वेतपीतास्तथा चान्ये तथा गोनसजातयः। मशका भ्रमरा दंशा मक्षिकाः शलभास्तथा ॥ ११
कर्णशल्याः कृकलासा अनेके चैव बभ्रमुः। प्राणिनो दंष्ट्रिणो रौद्रास्तथा हि विषजातयः ॥ १२
शार्ङ्गहालाहलामुस्तवत्सकागुरुभस्मगाः।
नीलपत्रादयश्चान्यं शतशो बहुभेदिनः। येषां गन्धेन दह्यन्ते गिरिशृङ्गाण्यपि द्रुतम् ॥ १३

सूतजी कहते हैं—ऋषियो! भगवान् विष्णुकी बात सुनकर वे बलवान् सम्मिलित होकर उस महासमुद्रमें उसकी जलराशिको अत्यन्त क्षुभित करने लगे। इसके बाद समुद्रसे सौ सूर्योंकी भाँति दीप्तिशाली शीतरश्मि उज्ज्वल चन्द्रमा उत्पन्न हुए। तत्पश्चात् समुद्रके जल*से पीले वस्त्रोंसे शोभित लक्ष्मी उत्पन्न हुईं, फिर सुरादेवी तथा पीले रंगका घोड़ा उत्पन्न हुआ। तदनन्तर नारायणके वक्षःस्थलपर शोभित होनेवाली, किरणोंसे शोभा-सम्पन्न तथा अमृतसे उत्पन्न होनेवाली कौस्तुभमणि उत्पन्न हुई। पुनः अनेक खिले पुष्पोंके गुच्छोंसे व्याप्त पारिजात प्रकट हुआ। तदन देवताओं और दैत्योंने आकाशके समान नीले धुएँको निकलते हुए देखा, जो सभी दिशा परिव्याप्त और सभी प्राणियोंके लिये दुःसह था।

* निरुक्त ७। २४ और नि० निघण्टु १। १२ के अनुसार घृतका जल अर्थ वेदोंमें बहुधा युक्त हुआ है। लक्ष्मी प्राकट्यके समय इसका प्रयोग आवश्यक था।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ूबकर देवगण मूर्च्छित होकर गिरने लगे और हाथसे सिरको पकड़कर समुद्र-तटपर बैठ गये। तदनन्तर क्रमशः वह दुःसह अग्नि दिखायी पड़ी। उसका आकार ज्वालाओंसे व्याप्त था तथा चारों ओर फैली हुई लपटोंसे वह भीषण लग रही थी। उस अग्निसे प्रायः सभी देवता और दानवगण विक्षिप्त हो उठे और कुछ जले तथा कुछ अधजले हुए सभी दिशाओंमें घूमने लगे। इस प्रकार सभी प्रधान देव तथा दैत्यगण उस अग्निसे भयभीत हो गये। कुछ देरके बाद उस अग्निसे ण्डुभ जातिके सर्प उत्पन्न हुए। उसी प्रकार काले, विशाल दाढ़ोंवाले, लाल, वायु पीकर रहनेवाले, श्वेत, पीले तथा अन्य गोनस जातिवाले सर्प तथा मशक, भ्रमर, डँसा, मक्खियाँ, पतंगे, कर्णशल्य, गिरगिट आदि अनेकों जीव उत्पन्न होकर इधर-उधर घूमने लगे। इनके अतिरिक्त अति भीषण दाढ़ोंवाले बहुत-से जीव तथा विषकी अनेकों जातियाँ उत्पन्न हुईं—जैसे शार्ङ्ग, हालाहल, मुस्त, वत्स, अगुरु, भस्मग और नील-पत्र आदि। इसी प्रकार अन्य सैकड़ों भेदोपभेदवाले विष उत्पन्न हुए, जिनकी गन्धसे पर्वतोंके शिखर भी तुरंत ही जलने लगे ॥ १–१३ ॥

अनन्तरं नीलरसौघभृङ्गभिन्नाञ्जनाभं विषमं श्वसन्तम्।
कायेन लोकान्तरपूरकेण केशैश्च वह्निप्रतिमैर्ज्वलद्भिः ॥ १४ ॥
सुवर्णमुक्ताफलभूषिताङ्गं किरीटिनं पीतदुकूलजुष्टम्।
नीलोत्पलाभं कुसुमैः कृतार्धं गर्जन्तमम्भोधरभीमवेगम् ॥ १५ ॥
महाम्बुरम्भोनिधिमध्यसंस्थं सविग्रहं देहिभयाश्रयं तम्।
विलोक्य तं भीषणमुग्रनेत्रं भूताश्च वित्रेसुरथापि सर्वे ॥ १६ ॥
केचिद् विलोक्यैव गता ह्यभावं निःसंज्ञतां चाप्यपरे प्रपन्नाः।
वेमुर्मुखेभ्योऽपि च फेनमन्ये केचित् त्ववाप्ता विषमामवस्थाम् ॥ १७ ॥
श्वासेन तस्य निर्दग्धास्ततो विष्णिवन्द्रदानवाः।
दग्धाङ्गारनिभा जाता ये भूता दिव्यरूपिणः। ततस्तु सम्भ्रमाद् विष्णुस्तमुवाच सुरात्मकम्॥ १८ ॥

तदनन्तर देवताओं और दानवोंने सागरके मध्यमें त एक ऐसा स्वरूप देखा, जिसकी शरीर-कान्ति रस, भ्रमर और घिसे हुए अञ्जनके समान काली थी, विषमरूपसे श्वास ले रहा था और शरीरसे लोकान्तर- व्याप्त कर लिया था, जिसके केश जलती हुई ग्निके समान दिखायी पड़ रहे थे, जिसका शरीर र्ण और मोतियोंसे विभूषित था, जो किरीट धारण ये हुए था, जिसके शरीरपर पीताम्बर सुशोभित था र देहकी कान्ति नीले कमलके समान थी, जो ोंद्वारा अलंकृत और मेघकी तरह अत्यन्त भयंकर रूपसे गर्जना कर रहा था तथा प्राणियोंके लिये शरीरधारी भयका आश्रयस्थान था। उस भीषण एवं उग्र नेत्रवाले स्वरूपको देखकर सभी प्राणी भयभीत हो उठे। कितने तो देखते ही चल बसे, कितने मूर्छित हो गये, कुछ मुखसे फेन उगलने लगे और कुछ लोग विषम अवस्थाको प्राप्त हो गये। उसकी श्वाससे विष्णु, इन्द्र और दानव—सभी जलने लगे। थोड़ी देर पहले जो दिव्य रूपवाले थे, वे जले हुए अंगारके समान हो गये। तब भगवान् विष्णुने भयभीत होकर उस सुरात्मकसे इस प्रकार प्रश्न किया ॥ १४–१८ ॥

श्रीभगवानुवाच

को भवानन्तकप्रख्यः किमिच्छसि कुतोऽपि च। किं कृत्वा ते प्रियं जायेदेवमाचक्ष्व मेऽखिलम् ॥ १९ ॥
तच्च तस्य वचः श्रुत्वा विष्णोः कालाग्नि[illegible] मेघकूटरवु भिन्नदुन्दुभिनिःस्वनः ॥ २० ॥

Sri Vidyabharati Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

श्रीभगवान्‌ने पूछा—यमराजके समान आप कौन हैं ? क्या चाहते हैं ? और कहाँसे आ रहे हैं ? क्या करनेसे आपकी कामना पूर्ण होगी ? ये सभी बातें मुझे बताइये । भगवान् विष्णुकी वह बात सु कालाग्निके समान भयंकर एवं फटी हुई दुन् समान बोलनेवाला कालकूट बोला ॥ १९-२० ॥

कालकूट उवाच

अहं हि कालकूटाख्यो विषोऽम्बुधिसमुद्भवः । यदा तीव्रतरामर्षैः परस्परवधैषिभिः ॥
सुरासुरैर्विमथितो दुग्धाम्भोनिधिरद्भुतः । सम्भूतोऽहं तदा सर्वान् हन्तुं देवान् सदानवान् ॥
सर्वानिह हनिष्यामि क्षणमात्रेण देहिनः । मां वा ग्रसत वै सर्वे यात वा गिरिशान्तिकम् ॥
श्रुत्वैतद् वचनं तस्य ततो भीताः सुरासुराः । ब्रह्मविष्णू पुरस्कृत्य गतास्ते शङ्करान्तिकम् ॥
निवेदितास्ततो द्वाःस्थैस्ते गणेशैः सुरासुराः । अनुज्ञाताः शिवेनाथ विविशुर्गिरिशान्तिकम् ॥
मन्दरस्य गुहां हैमीं मुक्तामणिविभूषिताम् । सुस्वच्छमणिसोपानां वैदूर्यस्तम्भमण्डिताम् ॥
तत्र देवासुरैः सर्वैर्जानुभिर्धरणीं गतैः । ब्रह्माणमग्रतः कृत्वा इदं स्तोत्रमुदाहृतम् ॥

कालकूटने कहा—विष्णो ! मैं समुद्रसे उत्पन्न हुआ कालकूट नामक विष हूँ । जब परस्पर एक-दूसरेके वधके अभिलाषी देवता तथा दैत्योंद्वारा उग्र वेगसे अद्भुत क्षीरसागर मथा गया, तब मैं उन सभी देवताओं और दानवोंका संहार करनेके लिये उत्पन्न हुआ हूँ । मैं क्षणभरमें ही सभी शरीरधारियोंका संहार कर सकता हूँ । अतः ये सभी लोग या तो मुझे निगल जायँ अथवा शंकरकी शरणमें जायँ । कालकूटकी वह बात सुनकर देवता और असुर भयभीत हो गये, तब वे ब्रह्मा और विष्णुको आगे करके शंकरजीके पास जानेके लिये प्रस्थित हुए । वहाँ पहुँचनेपर द्वा गणेश्वरोंने जाकर शिवजीसे देवताओं और आगमनकी सूचना दी । तब शंकरजीसे आज्ञा पा लोग शिवजीके निकट मन्दराचलकी उस सुव गुफामें गये, जो मुक्तामणियोंसे विभूषित थी, स्वच्छ मणिजटित सीढ़ियाँ लगी थीं और जो मणिके स्तम्भसे शोभायमान थी । वहाँ ब्रह्माजीको कर सभी देवताओं और असुरोंने पृथिवीपर टेककर शिवजीको (पञ्चाङ्ग) नमस्कार किया औ वे इस स्तोत्रका पाठ करने लगे ॥ २१-२७ ॥

देवदानवा ऊचुः

नमस्तुभ्यं विरूपाक्ष नमस्ते दिव्यचक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय धन्विने ।
नमस्त्रिशूलहस्ताय दण्डहस्ताय धूर्जटे । नमस्त्रैलोक्यनाथाय भूतग्रामशरीरिणे ।
नमः सुरारिहन्त्रे च सोमाग्न्यर्काग्र्यचक्षुषे । ब्रह्मणे चैव रुद्राय नमस्ते विष्णुरूपिणे ।
ब्रह्मणे वेदरूपाय नमस्ते देवरूपिणे । सांख्ययोगाय भूतानां नमस्ते शम्भवाय ते ।
मन्मथाङ्गविनाशाय नमः कालक्षयंकर । रंहसे देवदेवाय नमस्ते वसुरेतसे ।
एकवीराय सर्वाय नमः पिङ्गकपर्दिने । उमाभर्त्रे नमस्तुभ्यं यज्ञत्रिपुरघातिने ।
शुद्धबोधप्रबुद्धाय मुक्तकैवल्यरूपिणे । लोकत्रयविधात्रे च वरुणेन्द्राग्निरूपिणे ।
ऋग्यजुःसामरूपाय पुरुषायेश्वराय च । अग्र्याय चैव चोग्राय विप्राय श्रुतिचक्षुषे ।
रजसे चैव सत्त्वाय तमसे तिमिरात्मने । अनित्यनित्यभावाय नमो नित्यचरात्मने ।
व्यक्ताय चैवाव्यक्ताय व्यक्ताव्यक्ताय वै नमः । भक्तानामार्तिनाशाय प्रियनारायणाय च ।
उमाप्रियाय शर्वाय नन्दिवक्त्राञ्चिताय च । ऋतुमन्वन्तकल्पाय पक्षमासदिनात्मने ।
नानारूपाय मुण्डाय वरूथपृथुदण्डिने । नमः कपालहस्ताय दिग्वासाय शिखण्डिने ।

Sri Vidyadhiraja Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

धन्विने रथिने चैव यतये ब्रह्मचारिणे । इत्येवमादिचरितैः स्तुतं तुभ्यं नमो नमः ॥ ४० ॥
एवं सुरासुरैः स्थाणुः स्तुतस्तोषमुपागतः । उवाच वाक्यं भीतानां स्मितान्वितशुभाक्षरम् ॥ ४१ ॥

देवताओं और दानवोंने कहा—विरूपाक्ष ! आपको नमस्कार है । दिव्य नेत्रधारी आपको प्रणाम है । आप अपने हाथोंमें पिनाक, वज्र और धनुष धारण करनेवाले हैं, आपको अभिवादन है । हाथमें त्रिशूल और दण्ड धारण करनेवाले जटाधारीको नमस्कार है । आप त्रिलोकीनाथ और प्राणिसमूहके शरीररूप हैं, आपको प्रणाम है । देव-शत्रुओंका संहार करनेवाले तथा चन्द्रमा, अग्नि और सूर्यरूप नेत्र धारण करनेवालेको अभिवादन है । ब्रह्मा, विष्णु और रुद्ररूप आपको नमस्कार है । आप ब्रह्मस्वरूप, वेदस्वरूप और देवरूप हैं, आपको प्रणाम है । आप सांख्ययोगस्वरूप और प्राणियोंका कल्याण करनेवाले हैं, आपको अभिवादन है । कामदेवके शरीरके विनाशक और कालके क्षयकर्ता आपको नमस्कार है । आप वेगशाली, देवाधिदेव और वसुरेता हैं, आपको प्रणाम है । सर्वश्रेष्ठ वीर, सर्वस्वरूप और पीले रंगकी जटा धारण करनेवालेको अभिवादन है । उमाके पति तथा यज्ञ एवं त्रिपुरका विनाश करनेवाले आपको नमस्कार है । आप शुद्ध ज्ञानसे परिपूर्ण, मुक्त कैवल्यरूप, तीनों लोकोंके विधाता, वरुण, इन्द्र और अग्निके स्वरूप, ऋक्, यजुः और सामवेदरूप, पुरुषोत्तम, परमेश्वर, सर्वश्रेष्ठ, भयंकर, ब्राह्मणस्वरूप, श्रुतिरूप नेत्रवाले, सत्त्व, रजस्, तमस्—तीनों गुणोंसे युक्त अन्धकारस्वरूप, अनित्य और नित्य भावसे सम्पन्न तथा नित्यचरात्मा हैं । आपको प्रणाम है । आप व्यक्त, अव्यक्त और व्यक्ताव्यक्त हैं, आपको अभिवादन है । आप भक्तोंकी पीड़ाके विनाशक, नारायणके मित्र, उमाके प्रियतम, संहारकर्ता, नन्दीके मुखसे सुशोभित, मन्वन्तर-कल्प-ऋतु-मास-पक्ष-दिनरूप, अनेक रूपधारी, मुण्डित सिरवाले, स्थूल दण्ड और कवच धारण करनेवाले, खप्परधारी, दिगम्बर, चूडाधारी, धनुषधारी, महारथी, संन्यासी और ब्रह्मचारी हैं, आपको नमस्कार है । इस प्रकारके अनेकों चरित्रोंसे स्तुत होनेवाले आपको बारंबार प्रणाम है । इस प्रकार देवासुरोंद्वारा स्तवन किये जानेपर शंकरजी प्रसन्न हो गये । तब वे उन भयभीत देवासुरोंसे मुसकराते हुए सुन्दर अक्षरोंसे युक्त वचन बोले ॥ २८—४१ ॥

श्रीशंकर उवाच

किमर्थमागता ब्रूत त्राससम्लानमुखाम्बुजाः ।
किं वाभीष्टं ददाम्यद्य कामं प्रब्रूत मा चिरम् । इत्युक्तास्ते तु देवेन प्रोचुस्तं ससुरासुराः ॥ ४२ ॥

भगवान् श्रीशंकरने कहा—देवता एवं दानवो ! तुम्हारे मुखकमल भयके कारण मलिन दीख रहे हैं, बतलाओ, तुमलोग यहाँ किसलिये आये हो ? मैं आज तुमलोगोंको कौन-सी अभीष्ट वस्तु दूँ, यह निर्भय होकर बतलाओ, देर मत करो । भगवान् शंकरद्वारा ऐसा कहे जानेपर देवासुरोंने उनसे इस प्रकार कहा ॥ ४२ ॥

सुरासुरा ऊचुः

अमृतार्थे महादेव मथ्यमाने महोदधौ । विषमद्भुतमुद्भूतं लोकसंक्षयकारकम् ॥ ४३ ॥
स उवाचाथ सर्वेषां देवानां भयकारकः । सर्वान् वो भक्षयिष्यामि अथवा मा पिबन्त्वथ ॥ ४४ ॥
तमशक्ता वयं ग्रस्तुं सोऽस्मान्प्रशक्तो बलोत्कटः । एष निःश्वासमात्रेण शतपर्वसमद्युतिः ॥ ४५ ॥
विष्णुः कृष्णः कृतस्तेन यमश्च विषमात्मवान् । मूर्च्छिताः पतिताश्चान्ये विप्रणाशं गताः परे ॥ ४६ ॥
अर्थोऽनर्थक्रियां याति दुर्भगाणां यथा विभो । दुर्बलानां च संकल्पो यथा भवति चापदि ॥ ४७ ॥
विषमेतत् समुद्भूतं तस्माद् [illegible] । अस्माद् [illegible] त्वं गतिस्त्वं च परायणम् ॥ ४८ ॥

Maharshi ... Collection ... eGangotri

CC-0. In Public Domain. Digitized by eGangotri

भक्तानुकम्पी भावज्ञो भुवनाधीश्वरो विभुः । यज्ञाग्रभुक् सर्वहविः सौम्यः सोमः स्मरान्तकृत् ॥ ४९ ॥
त्वमेको नो गतिर्देव गीर्वाणगणशर्मकृत् । रक्षास्मान् भक्षसंकल्पाद् विरूपाक्ष विषज्वरात् ॥ ५० ॥
तच्छ्रुत्वा भगवानाह भगनेत्रान्तकृद् भवः ॥ ५१ ॥

देवासुर बोले—महादेव ! अमृतके लिये महासागरको मथते समय अद्भुत विष उत्पन्न हुआ है, जो सभी लोकोंका विनाश करनेवाला है । सभी देवताओंको भयभीत करनेवाले उस विषने स्वयं कहा है कि 'मैं तुम सभीको खा जाऊँगा, अन्यथा तुमलोग मुझे पी जाओ ।' ऐसी दशामें हमलोग उस विषको पान करनेमें सर्वथा असमर्थ हैं, किंतु वह महाबली विष हमलोगोंको खा सकता है । उसने अपने निःश्वासमात्रसे सैकड़ों चन्द्रमाके समान कान्तिमान् भगवान् विष्णुको कृष्णवर्ण तथा यमराजको विक्षिप्त कर दिया है । कुछ लोग मूर्छित हो गये हैं और कुछ नष्ट हो गये । भगवन् ! जिस प्रकार अभागोंके अर्थ भी अनर्थके कारण बन जाते हैं तथा आपत्तिकालमें दुर्बलोंके संकल्प विपरीत फल देनेवाले हो जाते हैं, उसी प्रकार अमृतकी अभिलाषासे युक्त हमलोगोंके लिये यह विष उत्पन्न हुआ है । अतः आप इस भयसे हमलोगोंको मुक्त कीजिये, आप ही एकमात्र हम सबके शरणदाता हैं । आप भक्तोंपर अनुकम्पा करनेवाले, मनके भावोंके ज्ञाता, सभी भुवनोंके ईश्वर, सर्वव्यापक, यज्ञोंमें सर्वप्रथम भाग ग्रहण करनेवाले, सकल हवनीय द्रव्यस्वरूप, सौम्य, उमाके साथ स्थित और कामदेवके विनाशक हैं । देवताओंका कल्याण करनेवाले देव ! एकमात्र आप ही हमलोगोंके शरणदाता हैं । विरूपाक्ष ! (सबको) खा लेनेके विचारवाले इस विषके कष्टसे हमलोगोंकी रक्षा कीजिये । यह सुनकर भगदेवताके नेत्रोंका विनाश करनेवाले भगवान् शंकरने कहा ॥ ४३–५१ ॥

देवदेव उवाच

भक्षयिष्याम्यहं घोरं कालकूटं महाविषम् ।
तथान्यदपि यत्कृत्यं कृच्छ्रसाध्यं सुरासुराः । तच्चापि साधयिष्यामि तिष्ठध्वं विगतज्वराः ॥ ५२ ॥
इत्युक्ता हृष्टरोमाणो वाष्पगद्गदकण्ठिनः ।
आनन्दाश्रुपरीताक्षाः सनाथा इव मेनिरे । सुरा ब्रह्मादयः सर्वे समाश्वस्ताः सुमानसाः ॥ ५३ ॥
ततोऽव्रजद् द्रुतगतिना ककुद्मिना हरोऽम्बरे पवनगतिर्जगत्पतिः ।
प्रधावितैरसुरसुरेन्द्रनायकैः स्ववाहनैर्विचलितशुभ्रचामरैः ।
पुरःसरैः स तु शुशुभे शुभाश्रयैः शिवो वशी शिखिकपिशोर्ध्वजूटकः ॥ ५४ ॥
आसाद्य दुग्धसिन्धुं तं कालकूटं विषं यतः । ततो देवो महादेवो विलोक्य विषमं विषम् ॥ ५५ ॥
छायास्थानकमास्थाय सोऽपिबद् वामपाणिना । पीयमाने विषे तस्मिंस्ततो देवा महासुराः ॥ ५६ ॥
जगुश्च ननृतुश्चापि सिंहनादांश्च पुष्कलान् । चक्रुः शक्रमुखाद्याश्च हिरण्याक्षादयस्तथा ॥ ५७ ॥
स्तुवन्तश्चैव देवेशं प्रसन्नाश्चाभवंस्तदा । कण्ठदेशे ततः प्राप्ते विषे देवमथाब्रुवन् ॥ ५८ ॥
विरिञ्चिप्रमुखा देवा बलिप्रमुखतोऽसुराः । शोभते देव कण्ठस्ते गात्रे कुन्दनिभप्रभे ॥ ५९ ॥
भृङ्गमालानिभं कण्ठेऽप्यत्रैवास्तु विषं तव । इत्युक्तः शंकरो देवस्तथा प्राह पुरान्तकृत् ॥ ६० ॥
पीते विषे देवगणान् विमुच्य गतो हरो मन्दरशैलमेव ।
तस्मिन् गते देवगणाः पुनस्तं ममन्थुरब्धिं विविधप्रकारैः ॥ ६१ ॥

इति श्रीमात्स्ये महापुराणेऽमृतमन्थने कालकूटोत्पत्तिर्नाम पञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

देवाधिदेव बोले—देवासुरगण ! मैं उस कालकूट नामक महान् भयंकर विषको तो पी ही जाऊँगा, इसके अतिरिक्त तुमलोगोंका जो कोई अन्य भी कष्टसाध्य कार्य होगा, उसे भी सिद्ध कर दूँगा, तुम लोग चिन्तारहित हो जाओ। इस प्रकार कहे जानेपर ब्रह्मा आदि सभी देवताओंका मन प्रसन्न हो गया, वे भलीभाँति आश्वस्त हो गये, उनके शरीर रोमाञ्चित हो उठे, कण्ठ आँसुओंसे गद्गद हो गये, नेत्रोंमें आनन्दाश्रु छलक आये और वे उस समय अपनेको सनाथ मानने लगे। तदनन्तर जगत्पति भगवान् शंकर वेगशाली नन्दिकेश्वरपर आरूढ़ होकर वायुके समान वेगसे आकाशमार्गसे उस ओर चले। उस समय असुरों तथा सुरोंके अधिपति गण अपने-अपने वाहनोंपर आरूढ़ हो चमर डुलाते हुए उनके आगे-आगे दौड़ रहे थे। इस प्रकार अग्निकी ज्वालासे भूरे रंगवाली जटासे युक्त इन्द्रियजयी भगवान् शिव मङ्गलके आधारस्वरूप उन देवताओंके साथ शोभायमान हो रहे थे। तदनन्तर वे जहाँसे कालकूट विष उत्पन्न हुआ था, उस क्षीरसागरपर पहुँचे। तत्पश्चात् भगवान् महादेवने उस विषम विषको देखकर एक छायायुक्त स्थानमें बैठकर अपने बायें हाथसे उसे पी लिया। उस विषके पी लिये जानेपर इन्द्रादि देव तथा हिरण्याक्ष प्रभृति असुर हर्षपूर्वक नाचने-गाने और भयंकर सिंहनाद करने लगे तथा देवेशकी स्तुति करते हुए प्रसन्न हो गये। उस समय विषके भगवान् शंकरके गलेमें पहुँचनेपर ब्रह्मादि देवता और बलि आदि असुरोंने उनसे इस प्रकार कहा—'देव ! कुन्दकी-सी उज्ज्वल कान्तिवाले आपके शरीरमें कण्ठकी विचित्र शोभा हो रही है। अब यह भृङ्गावलीकी भाँति काला विष यहीं आपके कण्ठमें स्थित रहे।' इस प्रकार कहे जानेपर त्रिपुरविनाशक भगवान् शंकरने 'तथास्तु—वैसा ही हो' यों कहकर उसे स्वीकार कर लिया। इस प्रकार विषपान कर लेनेके बाद शंकरजी देवताओंको वहीं छोड़ पुनः मन्दराचलको चले गये। उनके चले जानेपर देवगण पुनः उस समुद्रको विविध प्रकारसे मथने लगे ॥ ५२–६१ ॥

इस प्रकार श्रीमत्स्यमहापुराणके अमृतमन्थन-प्रसंगमें कालकूटोत्पत्ति नामक दो सौ पचासवाँ अध्याय सम्पूर्ण हुआ ॥२५०॥

दो सौ इक्यावनवाँ अध्याय

अमृतका प्राकट्य, मोहिनीरूपधारी भगवान् विष्णुद्वारा देवताओंका अमृत-पान तथा देवासुरसंग्राम

सूत उवाच

मथ्यमाने पुनस्तस्मिन् जलधौ समदृश्यत। धन्वन्तरिः स भगवानायुर्वेदप्रजापतिः ॥ १ ॥
मदिरा चायताक्षी सा लोकचित्तप्रमाथिनी। ततोऽमृतं च सुरभिः सर्वभूतभयापहा ॥ २ ॥
जग्राह कमलां विष्णुः कौस्तुभं च महामणिम्। गजेन्द्रं च सहस्राक्षो हयरत्नं च भास्करः ॥ ३ ॥
धन्वन्तरिं च जग्राह लोकारोग्यप्रवर्तकम्। छत्रं जग्राह वरुणः कुण्डले च शचीपतिः ॥ ४ ॥
पारिजाततरुं वायुर्जग्राह मुदितस्तथा। धन्वन्तरिस्ततो देवो वपुष्मानुदतिष्ठत ॥ ५ ॥
श्वेतं कमण्डलुं बिभ्रदमृतं यत्र तिष्ठति। एतदत्यद्भुतं दृष्ट्वा दानवानां समुत्थितः ॥ ६ ॥
अमृतार्थे महानादो ममेदमिति जल्पताम्। ततो नारायणो मायामास्थितो मोहिनीं प्रभुः ॥ ७ ॥
स्त्रीरूपमतुलं कृत्वा दानवानभिसंस्थितः।
ततस्तदमृतं तस्यै ददुस्ते मूढचेतनाः। स्त्रियै दानवदैतेयाः सर्वे तद्गतमानसाः ॥ ८ ॥
अथास्त्राणि च मुख्यानि महाप्रहरणानि च। प्रगृह्याभ्यद्रवन् देवान् सहिता दैत्यदानवाः ॥ ९ ॥
ततस्तदमृतं देवो विष्णुरादाय वीर्यवान्। जहार दानवेन्द्रेभ्यो नरेण सहितः प्रभुः ॥ १० ॥

Sri Vidyabharathi Book Centre Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सूतजी कहते हैं—ऋषियो ! पुनः उस समुद्रके मथे जानेपर आयुर्वेदके प्रजापति भगवान् धन्वन्तरि दीख पड़े। पुनः लोगोंके चित्तको उन्मत्त कर देनेवाली एवं बड़ी आँखोंवाली मदिरा उत्पन्न हुई। तदनन्तर अमृत प्रकट हुआ, फिर सभी प्राणियोंके भयको दूर करनेवाली कामधेनु उत्पन्न हुई। उस समय भगवान् विष्णुने लक्ष्मी और महामणि कौस्तुभको तथा हजार नेत्रोंवाले इन्द्रने गजराज ऐरावतको ग्रहण किया। सूर्यने अश्वरत्न उच्चैःश्रवा और लोकमें आरोग्यके प्रवर्तक धन्वन्तरिको स्वीकार किया। वरुणने छत्रको और शचीपति इन्द्रने दोनों कुण्डलोंको ग्रहण किया। वायुदेवने बड़ी प्रसन्नतासे पारिजात वृक्षको ग्रहण किया। इसके बाद शरीरधारी धन्वन्तरि उठकर खड़े हुए। वे एक श्वेतवर्णका कमण्डलु धारण किए हुए थे, जिसमें अमृत भरा था। उस अत्यन्त अद्भुत पात्रको देखकर अमृतके लिये 'यह मेरा है, यह मेरा है' ऐसा बकनेवाले दानवोंके दलमें महान् कोलाहल मच गया। तब भगवान् विष्णुने मोहिनी मायाका आश्रय लिया। वे स्त्रीका अनुपम रूप धारण कर दानवोंके समीप उपस्थित हुए। तब उन मुग्ध चित्तवाले दैत्योंने अमृतको उस स्त्रीके हाथोंमें समर्पित कर दिया; क्योंकि उन सभी दैत्यों और दानवोंका मन उसपर मोहित हो गया था। तदनन्तर वे सभी दैत्य-दानव संगठित होकर मुख्य-मुख्य महान् शस्त्रास्त्रोंको लेकर देवताओंपर टूट पड़े। इस समय नरके साथ-साथ पराक्रमी एवं सामर्थ्यशाली भगवान् विष्णुने उस अमृतको दानवेन्द्रोंसे छीन लिया ॥ १–१० ॥

ततो देवगणाः सर्वे पपुस्तदमृतं तदा। विष्णोः सकाशात् सम्प्राप्य संग्रामे तुमुले सति ॥ ११ ॥
ततः पिबत्सु तत्कालं देवेष्वमृतमीप्सितम्। राहुर्विबुधरूपेण दानवोऽप्यपिबत् तदा ॥ १२ ॥
तस्य कण्ठमनुप्राप्ते दानवस्यामृते तदा। आख्यातं चन्द्रसूर्याभ्यां सुराणां हितकाम्यया ॥ १३ ॥
ततो भगवता तस्य शिरश्छिन्नमलंकृतम्। चक्रायुधेन चक्रेण पिबतोऽमृतमोजसा ॥ १४ ॥
तच्छैलशृङ्गप्रतिमं दानवस्य शिरो महत्। चक्रेणोत्कृत्तमपतच्चालयद् वसुधातलम् ॥ १५ ॥
ततो वैरविनिर्बन्धः कृतो राहुमुखेन वै। शाश्वतश्चन्द्रसूर्याभ्यां प्रसत्याद्यापि बाधते ॥ १६ ॥
विहाय भगवांश्चापि स्त्रीरूपमतुलं हरिः।
नानाप्रहरणैर्भीमैर्दानवान् समकम्पयत्। प्रासाः सुविपुलास्तीक्ष्णाः पतन्तश्च सहस्रशः ॥ १७ ॥
तेऽसुराश्चक्रनिर्भिन्ना वमन्तो रुधिरं बहु। असिशक्तिगदाभिन्ना निपेतुर्धरणीतले ॥ १८ ॥
भिन्नानि पट्टिशैश्चापि शिरांसि युधि दारुणैः। तप्तकाञ्चनमाल्यानि निपेतुरनिशं तदा ॥ १९ ॥
रुधिरेणावलिप्ताङ्गा निहताश्च महासुराः। अद्रीणामिव कूटानि धातुरक्तानि शेरते ॥ २० ॥
ततो हलहलाशब्दः सम्बभूव समन्ततः। अन्योन्यं छिन्दतां शस्त्रैरादित्ये लोहितायति ॥ २१ ॥
परिघैश्चायसैः पातैः सन्निकर्षैश्च मुष्टिभिः। निघ्नतां समरेऽन्योन्यं शब्दो दिवमिवास्पृशत् ॥ २२ ॥
छिन्धि भिन्धि प्रधावेति पातयाभिसरेति वै। विश्रूयन्ते महाघोराः शब्दास्तत्र समन्ततः ॥ २३ ॥
एवं सुतुमुले युद्धे वर्तमाने महाभये। नरनारायणौ देवौ समाजग्मतुराहवम् ॥ २४ ॥
तत्र दिव्यं धनुर्दृष्ट्वा नरस्य भगवानपि। चिन्तयामास वै चक्रं विष्णुर्दानवसूदनः ॥ २५ ॥

तदनन्तर सभी देवता उस तुमुल युद्धके बीच ही विष्णु भगवान्‌से उस अमृतको लेकर पान करने लगे। उस अभिलषित अमृतको पीते समय देवताओंके मध्यमें देवरूपधारी राहु नामक दानव भी अमृतका पान करने लगा। वह अमृत उसके कण्ठदेशतक ही पहुँच पाया था कि देवताओंकी कल्याण-भावनासे प्रेरित होकर चन्द्रमा और सूर्यने उसके भेदको प्रकट कर दिया। तब अमृत पीते हुए उस दानवके अलंकृत सिरको भगवान्‌ने अपने पराक्रमसे चक्रद्वारा काट दिया। फिर तो अ... दानवका चक्रसे कटा हुआ पर्वतशिखरकी भाँति विशाल

Sri Vidyabharathi Book Centre, Sringeri

*

CC-O. In Public Domain. Digitized by eGangotri

मस्तक वसुधातलको कँपाता हुआ भूतलपर गिर पड़ा। तभीसे राहुके उस मुखने चन्द्रमा और सूर्यके साथ अटूट वैर निश्चित कर लिया, जो आज भी उन्हें पीड़ा पहुँचाता है। तत्पश्चात् विष्णु भी उस अनुपम स्त्री-रूपको त्यागकर विविध प्रकारके भयंकर शस्त्रास्त्रोंद्वारा दानवोंको प्रकम्पित करने लगे। उस समय विशाल और तीखी धारवाले हजारों भाले दानवोंपर गिरने लगे। भगवान्‌के चक्रसे छिन्न-भिन्न अङ्गोंवाले राक्षसगण अत्यधिक रक्त वमन करते हुए तलवार और गदाके प्रहारसे घायल होकर पृथ्वीतलपर गिरने लगे। उस समय उस युद्धमें तपाये हुए स्वर्णकी मालाओंसे सुशोभित असुरोंके सिर भीषण पट्टिशोंके प्रहारसे विदीर्ण होकर निरन्तर गिर रहे थे। वहाँ रक्तसे लथपथ हुए अङ्गोंवाले मारे गये महान् असुर गेरूसे रँगे हुए पर्वतोंके शिखरोंकी भाँति सो रहे थे। तदनन्तर सूर्यके लाल हो जानेपर परस्पर एक-दूसरेको शस्त्रोंद्वारा काटनेवालोंका महान् कोलाहल चारों ओर गूँज उठा। उस समरमें लोहनिर्मित परिघों और मुष्टियोंके प्रहारसे एक-दूसरेको मारनेवालोंका शब्द आकाश-मण्डलका स्पर्श-सा कर रहा था। उस समय वहाँ चारों ओर 'काट डालो, विदीर्ण कर दो, दौड़ो, गिरा दो, आगे बढ़ो'—इस प्रकारके महान् भयंकर शब्द सुनायी पड़ रहे थे। इस प्रकार महान् भयकारक घमासान युद्धके चलते समय भगवान् नर-नारायण युद्धस्थलमें उपस्थित हुए। वहाँ नरके दिव्य धनुषको देखकर दैत्यसूदन भगवान् नारायणने भी अपने सुदर्शन चक्रका स्मरण किया ॥ ११—२५ ॥

ततोऽम्बराच्चिन्तितमात्रमागतं महाप्रभं चक्रममित्रनाशनम्।
विभावसोस्तुल्यमकुण्ठमण्डलं सुदर्शनं भीममसह्यविक्रमम् ॥ २६ ॥
तदागतं ज्वलितहुताशनप्रभं भयंकरः करिकरबाहुरच्युतः।
महाप्रभं दनुकुलदैत्यदारणं तथोज्ज्वलज्ज्वलनसमानविग्रहम् ॥ २७ ॥
मुमोच वै तदतुलमुग्रवेगवान् महाप्रभं रिपुनगरावदारणम्।
संवर्तकज्वलनसमानवर्चसं पुनःपुनर्न्यपतत वेगवत् तदा ॥ २८ ॥
व्यदारयद् दितितनयान् सहस्रशः करेरितं पुरुषवरेण संयुगे।
दहत् क्वचिज्ज्वलन इवानिलेरितः प्रसह्य तानसुरगणानकृन्तत ॥ २९ ॥
तत्प्रेरितं वियति मुहुः क्षितौ तदा पपौ रणे रुधिरमथो पिशाचवत्।
अथासुरा गिरिभिरदीनमानसा मुहुर्मुहुः सुरगणमर्दयंस्तदा ॥ ३० ॥
महाबला विगलितमेघवर्चसः सहस्रशो गगनमहाप्रपातिनः।
अथासुरा भयजननाः प्रपेदिरे सपादपा बहुविधमेघरूपिणः ॥ ३१ ॥
महाद्रयः प्रविगलिताग्रसानवः परस्परं द्रुतमभिपत्य सस्वराः।
ततो मही प्रचलितसाद्रिकानना तदाद्रिपाताभिहता समन्ततः ॥ ३२ ॥
परस्परं समभिनिगर्जतां मुहु रणाजिरे भृशमभिसम्प्रवर्तिते।
नरस्ततो वरकनकाग्रभूषणैर्महेषुभिः पवनपथं समावृणोत् ॥ ३३ ॥
विदारयन् गिरिशिखराणि पत्रिभिर्महाभये सुरगणविग्रहे तदा।
ततो महीं लवणजलं च सागरं महासुराः प्रविविशुरर्दिताः सुरैः ॥ ३५ ॥
वियद्गतं ज्वलितहुताशनप्रभं सुदर्शनं परिकुपितं निशम्य च।
ततः सुरैर्विजयमवाप्य मन्दरः स्वमेव देशं गमितः सुपूजितः ॥ ३५ ॥
वितत्य खं दिवमथ चैव सर्वशस्ततो गताः सलिलधरा यथागतम्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ततोऽमृतं सुनिहितमेव चक्रिरे सुराः परां मुदमभिगम्य पुष्कलाम् ।
दृदृशुश्च तं निधिममृतस्य रक्षितं किरीटिने बलिभिरथामरैः सह ॥ ३

इति श्रीमात्स्ये महापुराणेऽमृतमन्थनं नामैकपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५१ ॥

तदनन्तर स्मरण करते ही वह असह्य प्रभावशाली, अत्यन्त कान्तिमान्, शत्रुनाशक, सूर्यके समान तेजस्वी, विस्तृत मण्डलोंवाला भयंकर सुदर्शन चक्र आकाशमार्गसे नीचे उतरा। तब हाथीकी शुण्डके समान बाहुवाले उग्र वेगशाली भगवान् विष्णुने प्रज्वलित अग्निके समान तेजस्वी दानवकुलसंहारक धधकती हुई अग्निके सदृश शरीरवाले परम कान्तिशाली भयंकर चक्रको आया हुआ देखकर उसे दैत्यसेनापर चला दिया। फिर तो रिपुके नगरोंका विध्वंस करनेवाला, संवर्तक नामक प्रलयाग्निके समान तेजस्वी, अनुपम कान्तिमान् वह सुदर्शन चक्र बारंबार वेगपूर्वक शत्रुओंपर प्रहार करने लगा। युद्धभूमिमें पुरुषोत्तमके हाथसे छोड़े गये उस चक्रने हजारों दैत्योंको विदीर्ण कर दिया। उसने वायुसे प्रेरित अग्निकी भाँति कहीं सेनाओंको भस्म कर दिया तो कहीं उन असुरोंको बलपूर्वक काट डाला। रणभूमिमें भगवान्‌के हाथसे प्रेरित वह सुदर्शन चक्र बारंबार आकाशमें तथा पृथ्वी-तलपर पिशाचके समान रक्तपान करने लगा। इसके बाद निर्भय चित्तवाले असुर पर्वतोंद्वारा बारंबार देवताओंकी सेनाको नष्ट करने लगे। हजारों महाबलवान् असुर जलरहित मेघोंके समान आकाशमण्डलसे नीचे गिर रहे थे, जिससे वे अतिशय भयंकर हो गये थे। उनके द्वारा फेंके गये वृक्ष मेघोंके समान दिखायी प[ड़ते] थे। विशाल पर्वत, जिनकी चोटियाँ छिन्न-भिन्न हो [गयी] थीं, शब्द करते हुए एक-दूसरेसे टकरा रहे थे। [उन] पर्वतोंके गिरनेसे अभिहत हुई पर्वत-वनोंसहित [यह] पृथ्वी कम्पायमान हो गयी। इस प्रकार जब युद्धस[्थलमें] एक-दूसरेपर भीषण गर्जन करते हुए बारंबार [प्र]तिघात होने लगा और दानवोंने देव-सेनाओं[को] आतंकित कर दिया, तब नरने सुन्दर सुवर्ण[जटित] अग्रभागवाले अपने विशाल बाणोंसे वायुमार्गको अव[रुद्ध] कर दिया और बाणोंके प्रहारसे पर्वत-शिखरोंको वि[दीर्ण] कर दिया। इस प्रकार देवताओंद्वारा ताड़ित किये [गये] बड़े-बड़े असुर योद्धा पाताल एवं खारे समुद्रमें प्र[विष्ट] हो गये। जलती हुई अग्निके समान कान्तिमान् [एवं] अतिशय कोपमें भरे हुए सुदर्शन चक्रको आकाशमें [गया] हुआ सुनकर देवगण विजयी हुए। तदनन्तर मन्[दरा]चलको आदरपूर्वक अपने स्थानपर स्थापित कर दि[या] गया और सभी दिशाओं तथा आकाशमें फैले हुए बाद[ल] समूह भी जैसे आये थे वैसे ही चले गये। तत्पश्[चात्] देवगण परम हर्षपूर्वक अमृतको सुरक्षित कर लिये [और] उसकी संचित निधिको बलवान् देवताओंके [साथ] किरीटधारी भगवान्‌को सुरक्षाके लिये सौंप दिया गया।

इस प्रकार श्रीमत्स्यमहापुराणमें अमृतमन्थन नामक दो सौ इक्यावनवाँ अध्याय सम्पूर्ण हुआ ॥ २५१ ॥

दो सौ बावनवाँ अध्याय

वास्तुके प्रादुर्भावकी कथा

ऋषय ऊचुः

प्रासादभवनादीनां निवेशं विस्तराद् वद । कुर्यात् केन विधानेन कश्च वास्तुरुदाहृतः ॥ १

ऋषियोंने पूछा—सूतजी! अब आप हमलोगोंको [प्रासाद एवं] राजभवन आदिके संनिवेशकी [विधि] विस्तारपूर्वक बतलाइये। साथ ही वास्[तु] और उनके बनाये जानेकी [विधि क्या कहलाता] है, इसपर भी प्रकाश डालिये ॥ १ ॥

Sri Vidyabharathi Book Centre Bangalore

CC-O. In Public Domain. Digitized by eGangotri

सूत उवाच

भृगुरत्रिर्वसिष्ठश्च विश्वकर्मा मयस्तथा । नारदो नग्नजिच्चैव विशालाक्षः पुरंदरः ॥ २ ॥
ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च । वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती ॥ ३ ॥
अष्टादशैते विख्याता वास्तुशास्त्रोपदेशकाः । संक्षेपेणोपदिष्टं यन्मनवे मत्स्यरूपिणा ॥ ४ ॥
तदिदानीं प्रवक्ष्यामि वास्तुशास्त्रमनुत्तमम् । पुरान्धकवधे घोरे घोररूपस्य शूलिनः ॥ ५ ॥
ललाटस्वेदसलिलमपतद् भुवि भीषणम् । करालवदनं तस्माद् भूतमुद्भूतमुल्बणम् ॥ ६ ॥
ग्रसमानमिवाकाशं सप्तद्वीपां वसुंधराम् । ततोऽन्धकानां रुधिरमपिबत् पतितं क्षितौ ॥ ७ ॥
तेन तत् समरे सर्वं पतितं यन्महीतले । तथापि तृप्तिमगमन्न तद् भूतं यदा तदा ॥ ८ ॥
सदाशिवस्य पुरतस्तपश्चक्रे सुदारुणम् । क्षुधाविष्टं तु तद् भूतमाहर्तुं जगतीत्रयम् ॥ ९ ॥
ततः कालेन संतुष्टो भैरवस्तस्य चाह वै । वरं वृणीष्व भद्रं ते यदभीष्टं तवानघ ॥ १० ॥

सूतजी कहते हैं—ऋषियो ! भृगु, अत्रि, वसिष्ठ, विश्वकर्मा, मय, नारद, नग्नजित्, भगवान् शंकर इन्द्र, ब्रह्मा, कुमार, नन्दीश्वर, शौनक, गर्ग, वासुदेव, अनिरुद्ध, शुक्र तथा बृहस्पति—ये अठारह वास्तुशास्त्र*के उपदेष्टा माने गये हैं। जिसे मत्स्यरूपधारी भगवान्‌ने संक्षेपमें मनुके प्रति उपदेश किया था, उसी श्रेष्ठ वास्तुशास्त्रको मैं आपलोगोंसे बतला रहा हूँ। प्राचीन कालमें भयंकर अन्धक-वधके समय विकराल रूपधारी भगवान् शंकरके ललाटसे पृथ्वीपर स्वेदविन्दु गिरे थे। उससे एक भीषण एवं विकराल मुखवाला उत्कट प्राणी उत्पन्न हुआ। वह ऐसा प्रतीत होता था मानो सातों द्वीपोंसहित वसुंधरा तथा आकाशको निगल जायगा। तत्पश्चात् वह पृथ्वीपर गिरे हुए अन्धकोंके रक्तका पान करने लगा। इस प्रकार वह उस युद्धमें पृथ्वीपर गिरे हुए सारे रक्तको पान कर गया। किंतु इतनेपर भी जब वह तृप्त न हुआ, तब भगवान् सदाशिवके सम्मुख अत्यन्त घोर तपस्यामें संलग्न हो गया। भूखसे व्याकुल होनेपर जब वह पुनः त्रिलोकीको भक्षण करनेके लिये उद्यत हुआ, तब उसकी तपस्यासे संतुष्ट होकर भगवान् शंकर उससे बोले—'निष्पाप ! तुम्हारा कल्याण हो, अब तुम्हारी जो अभिलाषा हो, वह वर माँग लो' ॥ २–१० ॥

तमुवाच ततो भूतं त्रैलोक्यग्रसनक्षमम् । भवामि देवदेवेश तथेत्युक्तं च शूलिना ॥ ११ ॥
ततस्तत् त्रिदिवं सर्वं भूमण्डलमशेषतः । स्वदेहेनान्तरिक्षं च रुन्धानं प्रपतद् भुवि ॥ १२ ॥
भीतभीतैस्ततो देवैर्ब्रह्मणा चाथ शूलिना । दानवासुररक्षोभिरवष्टब्धं समन्ततः ॥ १३ ॥
येन यत्रैव चाक्रान्तं स तत्रैवावसत् पुनः । निवासात् सर्वदेवानां वास्तुरित्यभिधीयते ॥ १४ ॥
अवष्टब्धेन तेनापि विज्ञप्ताः सर्वदेवताः । प्रसीदध्वं सुराः सर्वे युष्माभिर्निश्चलीकृतः ॥ १५ ॥
स्थास्याम्यहं किमाकारो ह्यवष्टब्धो ह्यधोमुखः । ततो ब्रह्मादिभिः प्रोक्तं वास्तुमध्ये तु यो बलिः ॥ १६ ॥
आहारो वैश्वदेवान्ते नूनमस्य भविष्यति । वास्तूपशमनो यज्ञस्तवाहारो भविष्यति ॥ १७ ॥
यज्ञोत्सवादौ च बलिस्तवाहारो भविष्यति । वास्तुपूजामकुर्वाणस्तवाहारो भविष्यति ॥ १८ ॥
अज्ञानात् तु कृतो यज्ञस्तवाहारो भविष्यति ।
एवमुक्तस्ततो हृष्टः स वास्तुरभवत् तदा । वास्तुयज्ञः स्मृतस्तस्मात् ततः प्रभृति शान्तये ॥ १९ ॥

इति श्रीमात्स्ये महापुराणे वास्तुभूतोद्भवो नाम द्विपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५२ ॥

* वास्तुके अर्थ बसनेकी जगह, घर, गाँव नींव, आदि हैं। इसपर समराङ्गणसूत्रधार, वास्तुराजवल्लभ, बृहत्संहिता, शिल्परत्न, गृहरत्नभूषण आदि ग्रन्थोंमें पूर्ण विचार है। पुराणोंमें अग्नि, विष्णुधर्म आदिमें ऐसी ही चर्चा है। इस विद्याका संक्षिप्त उल्लेख ऋग्वेद, शतपथ ब्राह्मण, श्रौतसूत्रों [illegible] आदिमें भी है। इसके मुख्य प्रवर्तक एवं ज्ञाता-कर्ता विश्वकर्मा एवं मय दानव हैं।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तब उस प्राणीने शिवजीसे कहा—'देवदेवेश ! मैं तीनों लोकोंको ग्रस लेनेके लिये समर्थ होना चाहता हूँ।' इसपर त्रिशूलधारी शिवजीने कहा—'ऐसा ही होगा'। फिर तो वह प्राणी अपने विशाल शरीरसे स्वर्ग, सम्पूर्ण भूमण्डल और आकाशको अवरुद्ध करता हुआ पृथ्वीपर आ गिरा। तब भयभीत हुए देवताओं तथा ब्रह्मा, शिव, दानव, दैत्य और राक्षसोंद्वारा वह स्तम्भित कर दिया गया। उस समय जिसने उसे जहाँपर आक्रान्त कर रखा था, वह वहीं निवास करने लगा। इस प्रकार सभी देवताओंके निवास करनेके कारण वह वास्तु नामसे विख्यात हुआ। तब उस दबे हुए प्राणीने भी सभी देवताओंसे निवेदन किया—'देवगण ! आपलोग मुझपर प्रसन्न हों। आपलोगोंद्वारा मैं दबाकर निश्चल बना दिया गया हूँ। भला इस प्रकार अवरुद्ध कर दिये जानेपर नीचे मुख किये हुए मैं किस तरह कबतक स्थित रह सकूँगा।' उसके ऐसा निवेदन करनेपर ब्रह्मा आदि देवताओंने कहा—'वास्तुके प्रसङ्गमें तथा वैश्वदेवके अन्तमें जो बलि दी जायगी, वह निश्चय ही तुम्हारा आहार होगी। वास्तु-शान्तिके लिये जो यज्ञ होगा, वह भी तुम्हें आहारके रूपमें प्राप्त होगा। यज्ञोत्सवमें दी गयी बलि भी तुम्हें आहार रूपमें प्राप्त होगी। वास्तु-पूजा न करनेवाले भी तुम्हारे आहार होंगे। अज्ञानसे किया गया यज्ञ भी तुम्हें आहाररूपमें प्राप्त होगा।' ऐसा कहे जानेपर वह वास्तु नामक प्राणी प्रसन्न हो गया। इसी कारण तबसे शान्तिके लिये वास्तु-यज्ञका प्रवर्तन हुआ ॥ ११–१९ ॥

इस प्रकार श्रीमत्स्यमहापुराणमें वास्तु-प्रादुर्भाव नामक दो सौ बावनवाँ अध्याय सम्पूर्ण हुआ ॥ २५२ ॥

दो सौ तिरपनवाँ अध्याय

वास्तु-चक्रका वर्णन

सूत उवाच

अथातः सम्प्रवक्ष्यामि गृहकालविनिर्णयम्। यथा कालं शुभं ज्ञात्वा सदा भवनमारभेत् ॥ १
चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः। वैशाखे धेनुरत्नानि ज्येष्ठे मृत्युं तथैव च ॥ २
आषाढे भृत्यरत्नानि पशुवर्गमवाप्नुयात्। श्रावणे भृत्यलाभं तु हानिं भाद्रपदे तथा ॥ ३
पत्नीनाशोऽश्विने विद्यात् कार्तिके धनधान्यकम्। मार्गशीर्षे तथा भक्तं पौषे तस्करतो भयम् ॥ ४
लाभं च बहुशो विन्द्यादग्निं माघे विनिर्दिशेत्। फाल्गुने काञ्चनं पुत्रानिति कालबलं स्मृतम् ॥ ५
अश्विनी रोहिणी मूलमुत्तरात्रयमैन्दवम्। स्वाती हस्तोऽनुराधा च गृहारम्भे प्रशस्यते ॥ ६
आदित्यभौमवर्ज्यास्तु सर्वे वाराः शुभावहाः। वर्ज्यं व्याघातशूले च व्यतीपातातिगण्डयोः ॥ ७
विष्कम्भगण्डपरिघवज्रयोगे न कारयेत्। श्वेते मैत्रेऽथ माहेन्द्रे गान्धर्वाभिजिति रौहिणे ॥ ८
तथा वैराजसावित्रे मुहूर्ते गृहमारभेत्। चन्द्रादित्यबलं लब्ध्वा शुभलग्नं निरीक्षयेत् ॥ ९
स्तम्भोच्छ्रायादि कर्तव्यमन्यत्तु परिवर्जयेत्। प्रासादेष्वेवमेवं स्यात् कूपवापीषु चैव हि ॥ १०

सूतजी कहते हैं—ऋषियो ! अब मैं गृहनिर्माणके उस समयका निर्णय बतला रहा हूँ, जिस शुभ समयको जानकर मनुष्यको सर्वदा भवनका आरम्भ करना चाहिये। जो मनुष्य चैत्र मासमें घर बनाता है, वह व्याधि ... वैशाखमें घर बनानेवाला धेनु और रत्न तथा ज्येष्ठ ... मृत्युको प्राप्त होता है। आषाढ़में नौकर, रत्न और प...

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

समूहकी और श्रावणमें नौकरोंकी प्राप्ति तथा भाद्रपदमें हानि होती है। आश्विनमें घर बनानेसे पत्नीका नाश होता है। कार्तिक मासमें धन-धान्यादिकी तथा मार्गशीर्षमें श्रेष्ठ भोज्यपदार्थोंकी प्राप्ति होती है। पौषमें चोरोंका भय और माघ मासमें अनेक प्रकारके लाभ होते हैं, किंतु अग्निका भी भय रहता है। फाल्गुनमें सुवर्ण तथा अनेक पुत्रोंकी प्राप्ति होती है। इस प्रकार समयका फल एवं बल बतलाया जाता है। गृहारम्भमें अश्विनी, रोहिणी, मूल, तीनों उत्तरा, मृगशिरा, स्वाती, हस्त और अनुराधा—ये नक्षत्र प्रशस्त कहे गये हैं। रविवार और मङ्गलवारको छोड़कर शेष सभी दिन शुभदायक हैं। व्याघात, शूल, व्यतीपात; अतिगण्ड, विष्कम्भ, गण्ड, परिघ और वज्र—इन योगोंमें गृहारम्भ नहीं करना चाहिये। श्वेत, मैत्र, माहेन्द्र, गान्धर्व, अभिजित, रौहिण, वैराज और सावित्र—इन मुहूर्तोंमें गृहारम्भ करना चाहिये। चन्द्रमा और सूर्यके बलके साथ-ही-साथ शुभ लग्नका भी निरीक्षण करना चाहिये। सर्वप्रथम अन्य कार्योंको छोड़कर स्तम्भारोपण करना चाहिये। यही विधि प्रासाद, कूप एवं बावलियोंके लिये भी मानी गयी है॥ १—१०॥

पूर्वं भूमिं परीक्षेत पश्चाद्वास्तुं प्रकल्पयेत्। श्वेता रक्ता तथा पीता कृष्णा चैवानुपूर्वशः॥ ११॥
विप्रादेः शस्यते भूमिरतः कार्यं परीक्षणम्। विप्राणां मधुरास्वादा कटुका क्षत्रियस्य तु॥ १२॥
तिक्ता कषाया च तथा वैश्यशूद्रेषु शस्यते। अरत्निमात्रे वै गर्ते स्वनुलिप्ते च सर्वशः॥ १३॥
घृतमामशरावस्थं कृत्वा वर्त्तिचतुष्टयम्। ज्वालयेद् भूपरीक्षार्थं तत्पूर्णं सर्वदिङ्मुखम्॥ १४॥
दीप्तौ पूर्वादि गृह्णीयाद् वर्णानामनुपूर्वशः। वास्तुः सामूहिको नाम दीप्यते सर्वतस्तु यः॥ १५॥
शुभदः सर्ववर्णानां प्रासादेषु गृहेषु च। रत्निमात्रमधोगर्त्ते परीक्ष्यं खातपूरणे॥ १६॥
अधिके श्रियमाप्नोति न्यूने हानिं समे समम्। फालकृष्टेऽथवा देशे सर्वबीजानि वापयेत्॥ १७॥
त्रिपञ्चसप्तरात्रे च यत्रारोहन्ति तान्यपि। ज्येष्ठोत्तमा कनिष्ठा भूर्वर्जनीयतरा सदा॥ १८॥
पञ्चगव्यौषधिजलैः परीक्षित्वा च सेचयेत्। एकाशीतिपदं कृत्वा रेखाभिः कनकेन च॥ १९॥
पश्चात् पिष्टेन चालिप्य सूत्रेणालोड्य सर्वतः। दश पूर्वायता लेखा दश चैवोत्तरायताः॥ २०॥
सर्ववास्तुविभागेषु विज्ञेया नवका नव। एकाशीतिपदं कृत्वा वास्तुवित् सर्ववास्तुषु॥ २१॥

पहले भूमिकी परीक्षाकर फिर बादमें वहाँ गृहका निर्माण करना चाहिये। श्वेत, लाल, पीली और काली—इन चार वर्णोंवाली पृथिवी क्रमशः ब्राह्मणादि चारों वर्णोंके लिये प्रशंसित मानी गयी है। इसके बाद उसके स्वादकी परीक्षा करनी चाहिये। ब्राह्मणके लिये मधुर स्वादवाली, क्षत्रियके लिये कड़वी, वैश्यके लिये तिक्त तथा शूद्रके लिये कसैली स्वादवाली पृथ्वी उत्तम मानी गयी है। तत्पश्चात् भूमिकी पुनः परीक्षाके लिये एक हाथ गहरा गड्ढा खोदकर उसे सब ओरसे भलीभाँति लीप-पोतकर स्वच्छ कर दे। फिर एक कच्चे पुरवेमें घी भरकर उसमें चार बत्तियाँ जला दे और उसे उसी गड्ढेमें रख दे। उन बत्तियोंकी लौ क्रमशः चारों दिशाओंकी ओर हों। यदि पूर्व दिशाकी बत्ती अधिक कालतक जलती रहे तो ब्राह्मणके लिये उसका फल शुभ होता है। इसी प्रकार क्रमशः उत्तर, पश्चिम और दक्षिणकी बत्तियोंको क्षत्रिय, वैश्य एवं शूद्रोंके लिये कल्याणकारक समझना चाहिये। यदि वह वास्तुदीपक चारों दिशाओंमें जलता रहे तो प्रासाद एवं साधारण गृह-निर्माणके लिये वहाँकी भूमि सभी वर्णोंके लिये शुभदायिनी है। एक हाथ गहरा गड्ढा खोदकर उसे उसी मिट्टीसे पूर्ण करते समय इस प्रकार परीक्षा करे कि यदि मिट्टी शेष रह जाय तो श्रीकी प्राप्ति होती है, न्यून हो जाय तो

Sri Vidya Peetham Book Centre Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हानि होती है तथा सम रहनेसे समभाव होता है। अथवा भूमिको हलद्वारा जुतवाकर उसमें सभी प्रकारके बीज बो दे। यदि वे बीज तीन, पाँच तथा सात रातोंमें अङ्कुरित हो जाते हैं तो उनके फल इस प्रकार जानने चाहिये। तीन रातवाली भूमि उत्तम, पाँच रातवाली भूमि मध्यम तथा सात रातवाली कनिष्ठ है। कनिष्ठ भूमिको सर्वथा त्याग देना चाहिये। इस प्रकार भूमि-परीक्षा कर पञ्चगव्य और ओषधियोंके जलसे भूमिको सींच दे और सुवर्णकी सलाईद्वारा रेखा खींचकर इक्यासी कोष्ठ बनावे। (कोष्ठ बनानेका ढंग इस प्रकार है—) पिष्टकसे चुपड़े हुए सूतसे दस रेखाएँ पूर्वसे पश्चिम तथा दस रेखाएँ उत्तरसे दक्षिणकी ओर खींचे। सभी प्रकारके वास्तु-विभागोंमें इस नव-नव (९×९) अर्थात् इक्यासी* कोष्ठका वास्तु जानना चाहिये। वास्तुशास्त्रको जाननेवाला सभी प्रकारके वास्तुसम्बन्धी कार्योंमें इसका उपयोग करे॥ ११—२१॥

पदस्थान् पूजयेद् देवांस्त्रिंशत् पञ्चदशैव तु। द्वात्रिंशद् बाह्यतः पूज्याः पूज्याश्चान्तस्त्रयोदश॥ २२॥
नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोधत। ईशानकोणादिषु तान् पूजयेद्धविषा नरः॥ २३॥
शिखी चैवाथ पर्जन्यो जयन्तः कुलिशायुधः। सूर्यसत्यौ भृशश्चैव आकाशो वायुरेव च॥ २४॥
पूषा च वितथश्चैव †बृहत्क्षतयमावुभौ। गन्धर्वो भृङ्गराजश्च मृगः पितृगणस्तथा॥ २५॥
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः। असुरः शोषपापौ च रोगोऽहिर्मुख्य एव च॥ २६॥
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा। बहिर्द्वात्रिंशदेते तु तदन्तस्तु ततः शृणु॥ २७॥
ईशानादिचतुष्कोणसंस्थितान् पूजयेद् बुधः। आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च॥ २८॥
मध्ये नवपदे ब्रह्मा तस्याष्टौ च समीपगान्। साध्यानेकान्तरान् विद्यात् पूर्वाद्यान् नामतः शृणु॥ २९॥
अर्यमा सविता चैव विवस्वान् विबुधाधिपः। मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः स्मृतः॥ ३०॥
अष्टमश्चापवत्सस्तु परितो ब्रह्मणः स्मृताः। आपश्चैवापवत्सश्च पर्जन्योऽग्निर्दितिस्तथा॥ ३१॥
पदिकानां तु वर्गोऽयमेवं कोणेष्वशेषतः। तन्मध्ये तु बहिर्विंशद् द्विपदास्ते तु सर्वशः॥ ३२॥
अर्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा। ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्वशः॥ ३३॥

फिर उन कोष्ठोंमें स्थित पैंतालीस देवताओंकी पूजा करे। उनमें बत्तीसकी बाहरसे तथा तेरहकी भीतरसे पूजा करनी चाहिये। मैं उनके नाम और स्थान बतला रहा हूँ, आपलोग सुनिये। (इन्हें जानकर) मनुष्यको ईशान आदि कोणोंमें हविष्यद्वारा उन-उन देवताओंकी पूजा करनी चाहिये। शिखी, पर्जन्य, जयन्त, इन्द्र, सूर्य, सत्य, भृश, अन्तरिक्ष, वायु, पूषा, वितथ, बृहत्क्षत, यम, गन्धर्व, भृङ्गराज, मृग, पितृगण, दौवारिक, सुग्रीव, पुष्पदन्त, जलाधिप, असुर, शोष, पाप, रोग, अहि, मुख्य, भल्लाट, सोम, सर्प, अदिति और दिति—ये बत्तीस बाह्य देवता हैं। बुद्धिमान् पुरुषको ईशान आदि चारों कोणोंमें स्थित इन देवताओंकी पूजा करनी चाहिये। अब वास्तु चक्रके भीतरी देवताओंके नाम सुनिये—आप, सावित्र, जय, रुद्र—ये चार चारों ओरसे तथा मध्यके नौ कोष्ठोंमें ब्रह्मा और उनके समीप अन्य आठ देवताओंकी भी पूजा करनी चाहिये। (ये सब मिलकर मध्यके तेरह देवता होते हैं।) ब्रह्माके चारों ओर स्थित ये आठ देवता, जो क्रमशः पूर्वादि दिशाओंमें दो-दोके क्रमसे स्थित रहते हैं, साध्यनामसे कहे जाते हैं। उनके नाम सुनिये—अर्यमा, सविता, विवस्वान्, विबुधाधिप, मित्र, राजयक्ष्मा, पृथ्वीधर तथा आठवें आपवत्स। आप, आपवत्स, पर्जन्य, अग्नि तथा दिति—ये पाँच देवताओंके वर्ग हैं। (इनकी पूजा अग्निकोणमें करनी चाहिये।) उनके बाहर बीस देवता हैं, जो दो पदोंमें रहते हैं। अर्यमा, विवस्वान्, मित्र और पृथ्वीधर—ये चार ब्रह्माके चारों ओर तीन-तीन पदोंमें स्थित रहते हैं॥ २२—३३॥

* वास्तुचक्र तीन प्रकारके होते हैं—एक सौ पदका, दूसरा ८१ पदका और तीसरा ६४ पदका। यहाँ ८१ पदका ही वर्णन है। † 'बृहत्क्षत' इति बृहत्संहितायां (५३।४४) स्वः पाठः।
Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

वंशानिदानीं वक्ष्यामि ऋजूनपि पृथक् पृथक्। वायुं यावत् तथा रोगात् पितृभ्यः शिखिनं पुनः ॥ ३४ ॥
मुख्याद् भृशं तथा शोषाद् वितथं यावदेव तु। सुग्रीवाददितिं यावन्मृगात् पर्जन्यमेव च ॥ ३५ ॥
एते वंशाः समाख्याताः क्वचिच्च जयमेव तु। एतेषां यस्तु सम्पातः पदं मध्यं समं तथा ॥ ३६ ॥
मर्म चैतत् समाख्यातं त्रिशूलं कोणगं च यत्। स्तम्भन्यासेषु वर्ज्यानि तुलाविधिषु सर्वदा ॥ ३७ ॥
कीलोच्छिष्टोपघातादि वर्जयेद् यत्नतो जनः। सर्वत्र वास्तुर्निर्दिष्टो पितृवैश्वानरायतः ॥ ३८ ॥
मूर्धन्यग्निः समादिष्टो मुखे चापः समाश्रितः। पृथ्वीधरोऽर्यमा चैव स्कन्धयोस्तावधिष्ठितौ ॥ ३९ ॥
वक्षःस्थले चापवत्सः पूजनीयः सदा बुधैः। नेत्रयोर्दितिपर्जन्यौ श्रोत्रेऽदितिजयन्तकौ ॥ ४० ॥
सर्पेन्द्रावंससंस्थौ तु पूजनीयौ प्रयत्नतः। सूर्यसोमादयस्तद्वद् बाह्वोः पञ्च च पञ्च च ॥ ४१ ॥
रुद्रश्च राजयक्ष्मा च वामहस्ते समास्थितौ। सावित्रः सविता तद्वद्धस्तं दक्षिणमास्थितौ ॥ ४२ ॥
विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ। पूषा च पापयक्ष्मा च हस्तयोर्मणिबन्धने ॥ ४३ ॥
तथैवासुरशोषौ च वामपार्श्वं समाश्रितौ। पार्श्वे तु दक्षिणे तद्वद् वितथः सबृहत्क्षतः ॥ ४४ ॥
ऊर्वोऽर्यमाम्बुपौ ज्ञेयौ जान्वोर्गन्धर्वपुष्पकौ। जङ्घयोर्भृङ्गसुग्रीवौ स्फिक्स्थौ दौवारिको मृगः ॥ ४५ ॥
जयशक्रौ तथा मेढ्रे पादयोः पितरस्तथा। मध्ये नवपदे ब्रह्मा हृदये स तु पूज्यते ॥ ४६ ॥

अब मैं उनके वंशोंको पृथक्-पृथक् संक्षेपमें कह रहा हूँ। वायुसे लेकर रोगपर्यन्त, पितृगणसे शिखीपर्यन्त, मुख्यसे भृशपर्यन्त, शोषसे वितथपर्यन्त, सुग्रीवसे अदितिपर्यन्त तथा मृगसे पर्जन्यपर्यन्त—ये ही वंश कहे जाते हैं। कहीं-कहीं मृगसे लेकर जयपर्यन्त वंश कहा गया है। पदके मध्यमें इनका जो सम्पात है, वह पद, मध्य तथा सम नामसे प्रसिद्ध है। त्रिशूल और कोणगामी मर्मस्थल कहे जाते हैं, जो सर्वदा स्तम्भन्यास और तुलाकी विधिमें वर्जित माने गये हैं। मनुष्यके लिये यत्नपूर्वक देवताके पदोंपर कीलें गाड़ना, जूँठन फेंकना तथा चोटें पहुँचाना वर्जित है। यह वास्तु-चक्र, सर्वत्र पितृवर्गीय वैश्वानरके अधीन माना गया है। उसके मस्तकपर अग्नि और मुखमें जलका निवास है, दोनों स्कन्धोंपर पृथ्वीधर तथा अर्यमा अधिष्ठित हैं। बुद्धिमान्को वक्षःस्थलपर आपवत्सकी पूजा करनी चाहिये। नेत्रोंमें दिति और पर्जन्य तथा कानोंमें अदिति और जयन्त हैं। कंधोंपर सर्प और इन्द्रकी प्रयत्नपूर्वक पूजा करनी चाहिये। इसी प्रकार बाहुओंमें सूर्य और चन्द्रमासे लेकर पाँच-पाँच देवता स्थित हैं। रुद्र और राजयक्ष्मा—ये दोनों बायें हाथपर अवस्थित हैं। उसी प्रकार सावित्र और सविता दाहिने हाथपर स्थित हैं। विवस्वान् और मित्र—ये उदरमें तथा पूषा और पापयक्ष्मा—ये हाथोंके मणिबन्धोंमें स्थित हैं। उसी प्रकार असुर और शोष—ये बायें पार्श्वमें तथा दाहिने पार्श्वमें वितथ और बृहत्क्षत स्थित हैं। ऊरुभागोंपर यम और वरुण, घुटनोंपर गन्धर्व और पुष्पक, दोनों जंघोंपर क्रमशः भृङ्ग और सुग्रीव, दोनों नितम्बोंपर दौवारिक और मृग, लिङ्गस्थानपर जय और शक्र तथा पैरोंपर पितृगण स्थित हैं। मध्यके नौ पदोंमें, जो हृदय कहलाता है, ब्रह्माकी पूजा होती है ॥ ३४—४६ ॥

चतुःषष्टिपदो वास्तुः प्रासादे ब्रह्मणा स्मृतः। ब्रह्मा चतुष्पदस्तत्र कोणेष्वर्धपदस्तथा ॥ ४७ ॥
बहिष्कोणेषु वास्तौ तु सार्धाश्चोभयसंस्थिताः। विंशतिर्द्विपदाश्चैव चतुःषष्टिपदे स्मृताः ॥ ४८ ॥
गृहारम्भेषु कण्डूतिः स्वाम्यङ्गे यत्र जायते। शल्यं त्वपनयेत् तत्र प्रासादे भवने तथा ॥ ४९ ॥
सशल्यं भयदं यस्मादशल्यं शुभदायकम्। हीनाधिकाङ्गतां वास्तोः सर्वथा तु विवर्जयेत् ॥ ५० ॥
नगरग्रामदेशेषु सर्वत्रैवं विवर्जयेत्।
चतुःशालं त्रिशालं च द्विशालं चैकशालकम्। नामतस्तान् प्रवक्ष्यामि स्वरूपेण द्विजोत्तमाः ॥ ५१ ॥

इति श्रीमात्स्ये महापुराणे एकाशीतिपदवास्तुनिर्णयो नाम त्रिपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५३ ॥

Sri Vidyabharathi Book Centre, Srirangam

CC-O. In Public Domain. Digitized by eGangotri

ब्रह्माने प्रासादके निर्माणमें चौंसठ पदोंवाले वास्तुको श्रेष्ठ बतलाया है। उसके चार पदोंमें ब्रह्मा तथा उनके कोणोंमें आपवत्स, सविता आदि आठ देवगण स्थित हैं। वास्तुके बाहरवाले कोणोंमें भी अग्नि आदि आठ देवताओंका निवास है तथा दो पदोंमें जयन्त आदि बीस देवता स्थित हैं। इस प्रकार चौंसठ पदवाले वास्तुचक्रमें देवताओंकी स्थिति बतलायी गयी है। गृहारम्भके समय गृहपतिके जिस अङ्गमें खुजली जान पड़े, महल तथा भवनमें वास्तुके उसी अङ्गपर गड़ी हुई शल्य या कीलको निकाल देना चाहिये; क्योंकि शल्यसहित गृह भयदायक और शल्यरहित कल्याणकारक होता है। वास्तुका अधिक एवं हीन अङ्गका होना सर्वथा त्याज्य है। इसी प्रकार नगर, ग्राम और देश—सभी जगहपर इन दोषोंका परित्याग करना चाहिये। द्विजवरो! अब मैं चतुःशाल, त्रिशाल, द्विशाल तथा एकशालवाले भवनोंके नाम और स्वरूपका वर्णन करूँगा॥ ४७—५१॥

इस प्रकार श्रीमत्स्यमहापुराणमें इक्यासीपद निर्णय नामक दो सौ तिरपनवाँ अध्याय सम्पूर्ण हुआ॥ २५३॥

दो सौ चौवनवाँ अध्याय

वास्तुशास्त्रके अन्तर्गत राजप्रासाद आदिकी निर्माण-विधि

सूत उवाच

चतुःशालं प्रवक्ष्यामि स्वरूपान्नामतस्तथा। चतुःशालं चतुर्द्वारैरलिन्दैः सर्वतोमुखम्॥ १॥
नाम्ना तत् सर्वतोभद्रं शुभं देवनृपालये। पश्चिमद्वारहीनं च नन्द्यावर्तं प्रचक्षते॥ २॥
दक्षिणद्वारहीनं तु वर्धमानमुदाहृतम्। पूर्वद्वारविहीनं तत् स्वस्तिकं नाम विश्रुतम्॥ ३॥
रुचकं चोत्तरद्वारविहीनं तत् प्रचक्षते। सौम्यशालाविहीनं यत् त्रिशालं धान्यकं च तत्॥ ४॥
क्षेमवृद्धिकरं नृणां बहुपुत्रफलप्रदम्। शालया पूर्वया हीनं सुक्षेत्रमिति विश्रुतम्॥ ५॥
धन्यं यशस्यमायुष्यं शोकमोहविनाशनम्। शालया याम्यया हीनं यद् विशालं तु शालया॥ ६॥
कुलक्षयकरं नृणां सर्वव्याधिभयावहम्। हीनं पश्चिमया यत् तु पक्षघ्नं नाम तत् पुनः॥ ७॥
मित्रबन्धुसुतान् हन्ति तथा सर्वभयावहम्। याम्यापराभ्यां शालाभ्यां धनधान्यफलप्रदम्॥ ८॥
क्षेमवृद्धिकरं नृणां तथा पुत्रफलप्रदम्। यमसूर्यं च विज्ञेयं पश्चिमोत्तरशालकम्॥ ९॥
राजाग्निभयदं नृणां कुलक्षयकरं च यत्। उदक्पूर्वे तु शाले दण्डाख्ये यत्र तद् भवेत्॥ १०॥
अकालमृत्युभयदं परचक्रभयावहम्। धनाख्यं पूर्वयाम्याभ्यां शालाभ्यां यद् द्विशालकम्॥ ११॥
तच्छस्त्रभयदं नृणां पराभवभयावहम्। चुल्ली पूर्वापराभ्यां तु सा भवेन्मृत्युसूचनी॥ १२॥
वैधव्यदायकं स्त्रीणामनेकभयकारकम्। कार्यमुत्तरयाम्याभ्यां शालाभ्यां भयदं नृणाम्॥ १३॥
सिद्धार्थवज्रवर्ज्याणि द्विशालानि सदा बुधैः।

सूतजी कहते हैं—ऋषियो! अब मैं चतुःशाल* (त्रिशाल, द्विशाल आदि) भवनोंके स्वरूप, उनके विशिष्ट नामोंके साथ बतला रहा हूँ। चतुःशाल चारों ओर भवन, द्वार तथा बरामदोंसे युक्त हो, उसे 'सर्वतोभद्र' कहा जाता है। वह देव-मन्दिर तथा राजभवनके लिये मङ्गलकारक होता है। वह चतुःशाल यदि पश्चिम द्वारसे हीन हो तो 'नन्द्यावर्त', दक्षिणद्वारसे हीन हो तो 'वर्धमान', पूर्वद्वारसे रहित हो तो 'स्वस्तिक', उत्तरद्वारसे विहीन हो तो 'रुचक' कहा जाता है।

* रावणादिके ऐसे चतुःशाल, त्रिशाल आदि भवनोंका उल्लेख वाल्मीकीय रामायण, सुन्दरकाण्ड, राजतरङ्गिणी ३। १२, मृच्छकटिकनाटक ३। ७ तथा बृहत्संहिता अ० ५३ आदिमें आता है। शिल्परत्न, समराङ्गण, काश्यपशिल्पादिमें इनकी रचनाका विस्तृत विधान है।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

(अब त्रिशाल भवनोंके भेद बतलाते हैं।) उत्तर दिशाकी शालासे रहित जो त्रिशाल भवन होता है, उसे 'धान्यक' कहते हैं। वह मनुष्योंके लिये कल्याण एवं वृद्धि करनेवाला तथा अनेक पुत्ररूप फल देनेवाला होता है। पूर्वकी शालासे विहीन त्रिशाल भवनको 'सुक्षेत्र' कहते हैं। वह धन, यश और आयु प्रदान करनेवाला तथा शोक-मोहका विनाशक होता है। जो दक्षिणकी शालासे विहीन होता है, उसे 'विशाल' कहते हैं। वह मनुष्योंके कुलका क्षय करनेवाला तथा सब प्रकारकी व्याधि और भय देनेवाला होता है। जो पश्चिमशालासे हीन होता है, उसका नाम 'पक्षघ्न' है, वह मित्र, बन्धु और पुत्रोंका विनाशक तथा सब प्रकारका भय उत्पन्न करनेवाला होता है। (अब 'द्विशालों'के भेद कहते हैं—) दक्षिण एवं पश्चिम—दो शालाओंसे युक्त भवनको धनधान्यप्रद कहते हैं। वह मनुष्योंके लिये कल्याणका वर्धक तथा पुत्रप्रद कहा गया है। पश्चिम और उत्तरशालावाले भवनको 'यमसूर्य' नामक शाल जानना चाहिये। वह मनुष्योंके लिये राजा और अग्निसे भयदायक और कुलका विनाशक होता है। जिस भवनमें केवल पूर्व और उत्तरकी ही दो शालाएँ हों, उसे 'दण्ड' कहते हैं। वह अकालमृत्यु तथा शत्रुपक्षसे भय उत्पन्न करनेवाला होता है। जो पूर्व और दक्षिण-की शालाओंसे युक्त द्विशाल भवन हो, उसे 'धन' कहते हैं। वह मनुष्योंके लिये शस्त्र तथा पराजयका भय उत्पन्न करनेवाला होता है। इसी प्रकार केवल पूर्व तथा पश्चिमकी ओर बना हुआ 'चुल्ली' नामक द्विशालभवन मृत्युसूचक है। वह स्त्रियोंको विधवा करनेवाला तथा अनेकों प्रकारका भय उत्पन्न करनेवाला होता है। केवल उत्तर एवं दक्षिणकी शालाओंसे युक्त द्विशाल भवन मनुष्योंके लिये भयदायक होता है। अतः ऐसे भवनको नहीं बनवाना चाहिये। बुद्धिमानोंको सदा सिद्धार्थ* और वज्रसे† भिन्न द्विशालभवन बनवाना चाहिये॥ १-१३½॥

अथातः सम्प्रवक्ष्यामि भवनं पृथिवीपतेः॥ १४॥
पञ्चप्रकारं तत् प्रोक्तमुत्तमादिविभेदतः। अष्टोत्तरं हस्तशतं विस्तरश्चोत्तमो मतः॥ १५॥
चतुर्ष्वन्येषु विस्तारो हीयते चाष्टभिः करैः। चतुर्थांशाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते॥ १६॥
युवराजस्य वक्ष्यामि तथा भवनपञ्चकम्। षड्भिः षड्भिस्तथाशीतिर्हीयते तत्र विस्तरात्॥ १७॥
त्र्यंशेन चाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते। सेनापतेः प्रवक्ष्यामि तथा भवनपञ्चकम्॥ १८॥
चतुःषष्टिस्तु विस्तारात् षड्भिः षड्भिस्तु हीयते। पञ्चस्वेतेषु दैर्घ्यं च षड्भागेनाधिकं भवेत्॥ १९॥
मन्त्रिणामथ वक्ष्यामि तथा भवनपञ्चकम्। चतुश्चतुर्भिर्हीना स्यात् करषष्टिः प्रविस्तरे॥ २०॥
अष्टांशेनाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते। सामन्तामात्यलोकानां वक्ष्ये भवनपञ्चकम्॥ २१॥
चत्वारिंशत् तथाष्टौ च चतुर्भिर्हीयते क्रमात्। चतुर्थांशाधिकं दैर्घ्यं पञ्चस्वेतेषु शस्यते॥ २२॥
शिल्पिनां कञ्चुकीनां च वेश्यानां गृहपञ्चकम्। अष्टाविंशत् कराणां तु विहीनं विस्तरे क्रमात्॥ २३॥
द्विगुणं दैर्घ्यमेवोक्तं मध्यमेष्वेवमेव तत्।

अब मैं राजभवनके विषयमें वर्णन कर रहा हूँ। वह उत्तम आदि भेदसे पाँच प्रकारका कहा गया है। एक सौ आठ हाथके विस्तारवाला राजभवन उत्तम माना गया है। अन्य चार प्रकारके भवनोंमें विस्तार क्रमशः आठ-आठ हाथ कम होता जाता है; किंतु पाँचों प्रकारके भवनोंमें लम्बाई विस्तारके चतुर्थांशसे अधिक होती

* एक प्रकारका स्तम्भ जिसमें ८ पहल या कोण होते हैं।
† जिस द्विशालमें केवल दक्षिण और पश्चिमकी ओर भवन हों (बृहत्संहिता ५३।३९)।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

है। अब मैं युवराजके पाँच प्रकारके भवनोंका वर्णन कर रहा हूँ। इसमें उत्तम भवनकी चौड़ाई अस्सी हाथकी होती है। अन्य चारकी चौड़ाई क्रमशः छः-छः हाथ कम होती जाती है। इन पाँचों भवनोंकी लम्बाई चौड़ाईसे एक तिहाई अधिक कही गयी है। इसी प्रकार अब मैं सेनापतिके पाँच प्रकारके भवनोंका वर्णन कर रहा हूँ। उसके उत्तम भवनकी चौड़ाई चौंसठ हाथकी मानी गयी है। अन्य चार भवनोंकी चौड़ाई क्रमशः छः-छः हाथ कम होती जाती है। इन पाँचोंकी लम्बाई चौड़ाईके षष्ठांशसे अधिक होनी चाहिये। अब मैं मन्त्रियोंके भी पाँच प्रकारके भवन बतला रहा हूँ। उनमें उत्तम भवनका विस्तार साठ हाथ होता है तथा अन्य चार क्रमशः चार-चार हाथ कम चौड़े होते हैं। इन पाँचोंकी लम्बाई चौड़ाईके अष्टांशसे अधिक कही गयी है। अब मैं सामन्त, छोटे राजा और अमात्य (छोटे मन्त्री) लोगोंके पाँच प्रकारके भवनोंको बतलाता हूँ। इनमें उत्तम भवनकी चौड़ाई अड़तालीस हाथकी होनी चाहिये तथा अन्य चारोंकी चौड़ाई क्रमशः चार-चार हाथ कम कही गयी है। इन पाँचों भवनोंकी लम्बाई चौड़ाईकी अपेक्षा सवाया अधिक कही गयी है। अब शिल्पकार, कंचुकी और वेश्याओंके पाँच प्रकारके भवनोंको सुनिये। इन सभी भवनोंकी चौड़ाई अट्ठाईस हाथ कही गयी है। अन्य चारों भवनोंकी चौड़ाईमें क्रमशः दो-दो हाथकी न्यूनता होती है। लम्बाई चौड़ाईसे दुगुनी कही गयी है॥ १४—२३½॥

दूतीकर्मान्तिकादीनां वक्ष्ये भवनपञ्चकम्॥ २४॥
चतुर्थांशाधिकं दैर्घ्यं विस्तारो द्वादशैव तु। अर्धार्धकरहानिः स्याद् विस्ताराद् पञ्चशः क्रमात्॥ २५॥
दैवज्ञगुरुवैद्यानां सभास्तारपुरोधसाम्। तेषामपि प्रवक्ष्यामि तथा भवनपञ्चकम्॥ २६॥
चत्वारिंशत् तु विस्ताराच्चतुर्भिर्हीयते क्रमात्। पञ्चस्वेतेषु दैर्घ्यं च षड्भागेनाधिकं भवेत्॥ २७॥
चतुर्वर्णस्य वक्ष्यामि सामान्यं गृहपञ्चकम्। द्वात्रिंशतः कराणां तु चतुर्भिर्हीयते क्रमात्॥ २८॥
आषोडशादिति परं नूनमन्त्यावसायिनाम्। दशांशेनाष्टभागेन त्रिभागेनाथ पादिकम्॥ २९॥
अधिकं दैर्घ्यमित्याहुर्ब्राह्मणादेः प्रशस्यते। सेनापतेर्नृपस्यापि गृहयोरन्तरेण तु॥ ३०॥
नृपवासगृहं कार्यं भाण्डागारं तथैव च।
सेनापतेर्गृहस्यापि चातुर्वर्ण्यस्य चान्तरे। वासाय च गृहं कार्यं राजपूज्येषु सर्वदा॥ ३१॥
अन्तरप्रभवाणां च स्वपितुर्गृहमिष्यते। तथा हस्तशतादर्धं गदितं वनवासिनाम्॥ ३२॥
सेनापतेर्नृपस्यापि सप्तत्या सहितेऽन्विते। चतुर्दशहृते व्यासे शालान्यासः प्रकीर्तितः॥ ३३॥
पञ्चत्रिंशान्विते तस्मिन्नलिन्दः समुदाहृतः। तथा षट्त्रिंशद्धस्ता तु सप्ताङ्गुलसमन्विता॥ ३४॥
विप्रस्य महती शाला न दैर्घ्यं परतो भवेत्। दशाङ्गुलाधिका तद्वत् क्षत्रियस्य विधीयते॥ ३५॥

अब मैं दूती-कर्म करनेवालों तथा परिवारके अन्य लोगोंके पाँच प्रकारके भवनोंको बतला रहा हूँ। उनकी चौड़ाई बारह हाथकी तथा लम्बाई उससे सवाया अधिक होती है। शेष चार गृहोंकी चौड़ाई क्रमशः आधा-आधा हाथ न्यून होती है। अब मैं ज्योतिषी, गुरु, वैद्य, सभापति और पुरोहित—इन सभीके पाँच प्रकारके भवनोंका वर्णन कर रहा हूँ। उनके उत्तम भवनकी चौड़ाई चालीस हाथकी होती है। शेषकी क्रमसे चार-चार हाथकी कम होती है। इन पाँचों भवनोंकी लम्बाई चौड़ाईके षष्ठांशसे अधिक होती है। अब फिर साधारणतया चारों वर्णोंके लिये पाँच प्रकारके गृहोंका वर्णन करता हूँ। उनमें ब्राह्मणके घरकी चौड़ाई बत्तीस हाथकी होनी चाहिये। अन्य जातियोंके लिये क्रमशः चार-चार हाथकी कमी होनी चाहिये। (अर्थात् ब्राह्मणके उत्तम गृहकी चौड़ाई बत्तीस हाथ, क्षत्रियके घरकी अट्ठाईस हाथ, वैश्यके घरकी चौबीस हाथ तथा सत्-शूद्रके घरकी बीस हाथ और असत्-शूद्रके घरकी सोलह हाथ होनी चाहिये।) किंतु सोलह

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

हाथसे कमकी चौड़ाई अन्त्यजोंके लिये है। ब्राह्मणके घरकी लम्बाई चौड़ाईसे दशांश, क्षत्रियके घरकी अष्टमांश, वैश्यके घरकी तिहाई और शूद्रके घरकी चौथाई भाग अधिक होनी चाहिये। यही विधि श्रेष्ठ मानी गयी है। सेनापति और राजाके गृहोंके बीचमें राजाके रहनेका गृह बनाना चाहिये। उसी स्थानपर भाण्डागार भी रहना चाहिये। सेनापतिके तथा चारों वर्णोंके गृहोंके मध्य भागमें सर्वदा राजाके पूज्य लोगोंके निवासार्थ गृह बनवाना चाहिये। इसके अतिरिक्त विभिन्न जातियोंके लिये एवं वनेचरोंके लिये शयन करनेका घर पचास हाथका बनवाना चाहिये। सेनापति और राजाके गृहके परिमाणमें सत्तरका योग करके चौदहका भाग देनेपर व्यासमें शालाका न्यास कहा गया है। उसमें पैंतीस हाथपर बरामदेका स्थान कहा गया है। छत्तीस हाथ सात अङ्गुल लम्बी ब्राह्मणकी बड़ी शाला होनी चाहिये। उसी प्रकार दस अङ्गुल अधिक क्षत्रियकी शाला होनी चाहिये ॥ २४—३५ ॥

पञ्चत्रिंशत्करा वैश्ये ह्यङ्गुलानि त्रयोदश। तावत्करैव शूद्रस्य युता पञ्चदशाङ्गुलैः ॥ ३६ ॥
शालायास्तु त्रिभागेन यस्याग्रे वीथिका भवेत्। सोष्णीषं नाम तद्वास्तु पश्चाच्छ्रेयोच्छ्रयं भवेत् ॥ ३७ ॥
पार्श्वयोर्वीथिका यत्र सावष्टम्भं तदुच्यते। समन्ताद्वीथिका यत्र सुस्थितं तदिहोच्यते ॥ ३८ ॥
शुभदं सर्वमेतत् स्याच्चातुर्वर्ण्ये चतुर्विधम्। विस्तरात् षोडशो भागस्तथा हस्तचतुष्टयम् ॥ ३९ ॥
प्रथमो भूमिकोच्छ्राय उपरिष्टात् प्रहीयते। द्वादशांशेन सर्वासु भूमिकासु तथोच्छ्रयः ॥ ४० ॥
पक्वेष्टका भवेद् भित्तिः षोडशांशेन विस्तरात्। दारवैरपि कल्प्या स्यात् तथा मृन्मयभित्तिका ॥ ४१ ॥
गर्भमानेन मानं तु सर्ववास्तुषु शस्यते। गृहव्यासस्य पञ्चाशदष्टादशभिरङ्गुलैः ॥ ४२ ॥
संयुतो द्वारविष्कम्भो द्विगुणश्चोच्छ्रयो भवेत्। द्वारशाखासु बाहुल्यमुच्छ्रायकरसम्मितैः ॥ ४३ ॥
अङ्गुलैः सर्ववास्तूनां शस्यते पृथुत्वं बुधैः। उदुम्बरोत्तमाङ्गं च तदर्धार्धप्रविस्तरात् ॥ ४४ ॥

इति श्रीमात्स्ये महापुराणे वास्तुविद्यासु गृहमाननिर्णयो नाम चतुःपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५४ ॥

वैश्यके लिये पैंतीस हाथ तेरह अङ्गुल लम्बी शाला होनी चाहिये। उतने ही हाथ तथा पंद्रह अङ्गुल शूद्रकी शालाका परिमाण है। शालाकी लम्बाईके तीन भागपर यदि सामनेकी ओर गली बनी हो तो वह 'सोष्णीष' नामक वास्तु है। पीछेकी ओर गली हो तो वह 'श्रेयोच्छ्रय' कहलाता है। यदि दोनों पार्श्वोंमें वीथिका हो तो वह 'सावष्टम्भ' तथा चारों ओर वीथिका हो तो 'सुस्थित' नामक वास्तु कहा जाता है। ये चारों प्रकारकी वीथियाँ चारों वर्णोंके लिये मङ्गलदायी हैं। शालाके विस्तारका सोलहवाँ भाग तथा चार हाथ— यह पहले खण्डकी ऊँचाईका मान है। अधिक ऊँचा करनेसे हानि होती है। उसके बाद अन्य सभी खण्डोंकी ऊँचाई बारहवें भागके बराबर रखनी चाहिये। यदि पक्की ईंटोंकी दीवाल बनायी जा रही हो तो गृहकी चौड़ाईके सोलहवें भागके परिमाणके बराबर मोटाई होनी चाहिये। वह दीवाल लकड़ी तथा मिट्टीसे भी बनायी जा सकती है। सभी वास्तुओंमें भीतरके मानके अनुसार लम्बाई-चौड़ाईका मान श्रेष्ठ माना गया है। गृहके व्याससे पचास अङ्गुल विस्तार तथा अठारह अङ्गुल वेधसे युक्त द्वारकी चौड़ाई रखनी चाहिये और उसकी ऊँचाई चौड़ाईसे दुगुनी होनी चाहिये। जितनी ऊँचाई द्वारकी हो उतनी ही दरवाजेमें लगी हुई शाखाओंकी भी होनी चाहिये। ऊँचाई जितने हाथोंकी हो उतने ही अङ्गुल उन शाखाओंकी मोटाई होनी चाहिये—यही सभी वास्तुविद्याके ज्ञाताओंने बताया है। द्वारके ऊपरका कलश (बुर्ज) तथा नीचेकी देहली (चौखट)—ये दोनों शाखाओंसे आधे अधिक मोटे हों, अर्थात् इन्हें शाखाओंसे ड्योढ़ा मोटा रखना चाहिये ॥

इस प्रकार श्रीमत्स्यमहापुराणमें वास्तुप्रकरणमें गृह-मान-निर्णय नामक दो सौ चौवनवाँ अध्याय सम्पूर्ण हुआ ॥ २५४ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

दो सौ पचपनवाँ अध्याय

वास्तुविषयक वेधका विवरण

सूत उवाच

अथातः सम्प्रवक्ष्यामि स्तम्भमानविनिर्णयम्। कृत्वा स्वभवनोच्छ्रायं सदा सप्तगुणं बुधैः ॥ १ ॥
अशीत्यंशः पृथुत्वे स्यादग्रे नवगुणे सति। रुचकश्चतुरः स्यात् तु अष्टास्रो वज्र उच्यते ॥ २ ॥
द्विवज्रः षोडशास्रस्तु द्वात्रिंशास्रः प्रलीनकः। मध्यप्रदेशे यः स्तम्भो वृत्तो वृत्त इति स्मृतः ॥ ३ ॥
एते पञ्च महास्तम्भाः प्रशस्ताः सर्ववास्तुषु। पद्मवल्लीलताकुम्भपत्रदर्पणरूपिताः ॥ ४ ॥
स्तम्भस्य नवमांशेन पद्मकुम्भान्तराणि तु। स्तम्भतुल्या तुला प्रोक्ता हीना चोपतुला ततः ॥ ५ ॥
त्रिभागेनेह सर्वत्र चतुर्भागेन वा पुनः। हीनं हीनं चतुर्थांशात् तथा सर्वासु भूमिषु ॥ ६ ॥
वासगेहानि सर्वेषां प्रविशेद् दक्षिणेन तु। द्वाराणि तु प्रवक्ष्यामि प्रशस्तानीह यानि तु ॥ ७ ॥
पूर्वेणेन्द्रं जयन्तं च द्वारं सर्वत्र शस्यते। याम्यं च वितथं चैव दक्षिणेन विदुर्बुधाः ॥ ८ ॥
पश्चिमे पुष्पदन्तं च वारुणं च प्रशस्यते। उत्तरेण तु भल्लाटं सौम्यं तु शुभदं भवेत् ॥ ९ ॥
तथा वास्तुषु सर्वत्र वेधं द्वारस्य वर्जयेत्। द्वारे तु रथ्यया विद्धे भवेत् सर्वकुलक्षयः ॥ १० ॥
तरुणा द्वेषबाहुल्यं शोकः पङ्केन जायते। अपस्मारो भवेन्नूनं कूपवेधेन सर्वदा ॥ ११ ॥
व्यथा प्रस्रवणेन स्यात् कीलेनाग्निभयं भवेत्। विनाशो देवताविद्धे स्तम्भेन स्त्रीकृतो भवेत् ॥ १२ ॥

सूतजी कहते हैं—ऋषियो! अब मैं स्तम्भके परिमाणके विषयमें बतला रहा हूँ। बुद्धिमान् पुरुषोंको चाहिये कि वे अपने गृहकी ऊँचाईके मानको सातसे गुणाकर उसके अस्सीवें भागके बराबर खम्भेकी मोटाई रखें। उसकी मोटाईमें नौसे गुणा कर अस्सीवें भागके बराबर खम्भेका मूलभाग रखना चाहिये। चार कोणवाला स्तम्भ 'रुचक', आठ कोणवाला 'वज्र', सोलह कोणवाला 'द्विवज्र' तथा बत्तीस कोणवाला 'प्रलीनक' कहा जाता है। मध्य प्रदेशमें जो खम्भा वृत्ताकार रहता है, उसे 'वृत्त' कहा गया है। ये पाँच प्रकारके स्तम्भ सभी प्रकारके वास्तु-कार्यमें प्रशंसनीय कहे गये हैं। ये सभी स्तम्भ पद्म, वल्ली, लता, कुम्भ, पत्र एवं दर्पणसे चित्रित रहने चाहिये। इन कमलों तथा कुम्भोंमें स्तम्भके नवें अंशके बराबर अन्तर रहना चाहिये। स्तम्भके बराबर ऊँचाईको 'तुला' तथा उससे न्यूनको 'उपतुला' कहते हैं। मानके तृतीय या चतुर्थ भागसे हीन जो तुला है, वही 'उपतुला' है। यह उपतुला सभी भूमियोंमें रहती है। सभी वास-गृहोंमें दाहिनी ओर प्रवेशद्वार रखना चाहिये। अब मैं गृहके जो प्रशस्तद्वार हैं, उन्हें बतला रहा हूँ। पूर्व दिशामें इन्द्र और जयन्तद्वार सभी गृहोंमें श्रेष्ठ माने गये हैं। बुद्धिमान् लोग दक्षिण द्वारोंमें याम्य और वितथको श्रेष्ठ मानते हैं। पश्चिम द्वारोंमें पुष्पदन्त और वरुण प्रशंसित हैं। उत्तर द्वारोंमें भल्लाट तथा सौम्य शुभदायक होते हैं। सभी वास्तुओंमें द्वारवेधको बचाना चाहिये। गली, सड़क या मार्गद्वारा द्वार-वेध होनेपर पूरे कुलका क्षय हो जाता है। वृक्षके द्वारा वेध होनेपर द्वेषकी अधिकता होती है। कीचड़से वेध होनेपर शोक होता है और कूपद्वारा वेध होनेपर अवश्य ही सदाके लिये मिरगीका रोग होता है। नाबदान या जलप्रवाहसे वेध होनेपर व्यथा होती है, कीलसे वेध होनेपर अग्निभय होता है, देवतासे विद्ध होनेपर विनाश तथा स्तम्भसे विद्ध होनेपर स्त्रीद्वारा क्लेशकी प्राप्ति होती है॥ १—१२ ॥

गृहभर्तुर्विनाशः स्याद् गृहेण च गृहे कृते। अमेध्यावस्करैर्विद्धे गृहिणी बन्धकी भवेत् ॥ १३ ॥
तथा यक्षभयं विन्द्यादन्त्यजस्य गृहेण तु। उच्छ्रायाद् द्विगुणां भूमिं त्यक्त्वा वेधो न जायते ॥ १४ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

स्वयमुद्घाटिते द्वारे उन्मादो गृहवासिनाम् । स्वयं वा पिहिते विद्यात् कुलनाशं विचक्षणः ॥ १५ ॥
मानाधिके राजभयं न्यूने तस्करतो भवेत् । द्वारोपरि च यद् द्वारं तदन्तकमुखं स्मृतम् ॥ १६ ॥
अध्वनो मध्यदेशे तु अधिको यस्य विस्तरः । वज्रं तु संकटं मध्ये सद्यो भर्तुर्विनाशनम् ॥ १७ ॥
तथान्यपीडितं द्वारं बहुदोषकरं भवेत् । मूलद्वारात् तथान्यत् तु नाधिकं शोभनं भवेत् ॥ १८ ॥
कुम्भश्रीपर्णिवल्लीभिर्मूलद्वारं तु शोभयेत् । पूजयेच्चापि तन्नित्यं बलिना चाक्षतोदकैः ॥ १९ ॥
भवनस्य वटः पूर्वे दिग्भागे सार्वकामिकः । उदुम्बरस्तथा याम्ये वारुण्यां पिप्पलः शुभः ॥ २० ॥
प्लक्षश्चोत्तरतो धन्यो विपरीतास्त्वसिद्धये । कण्टकी क्षीरवृक्षश्च आसनः सफलो द्रुमः ॥ २१ ॥
भार्याहानौ प्रजाहानौ भवेतां क्रमशस्तदा । न च्छिन्द्याद् यदि तानन्यानन्तरे स्थापयेच्छुभान् ॥ २२ ॥
पुन्नागाशोकबकुलशमीतिलकचम्पकान् । दाडिमीपिप्पलीद्राक्षास्तथा कुसुममण्डपान् ॥ २३ ॥
जम्बीरपूगपनसद्रुमकेतकीभिर्जातीसरोजशतपत्रिकमल्लिकाभिः ।
यन्नारिकेलकदलीदलपाटलाभिर्युक्तं तदत्र भवनं श्रियमातनोति ॥ २४ ॥

इति श्रीमात्स्ये महापुराणे वास्तुविद्यासु वेधपरिवर्जनं नाम पञ्चपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५५ ॥

एक घरसे दूसरे घरमें वेध पड़नेपर गृहपतिका विनाश होता है तथा अपवित्र द्रव्यादिद्वारा वेध होनेपर घरकी स्वामिनी वन्ध्या हो जाती है । अन्त्यजके घरके द्वारा वेध होनेपर हथियारसे भय प्राप्त होता है । गृहकी ऊँचाईसे दुगुनी भूमिकी दूरीपर वेधका दोष नहीं होता । जिस घरके द्वार बिना हाथ लगाये स्वयं खुल जाते हैं, उस घरके निवासियोंको उन्मादका रोग होता है । इसी प्रकार स्वयं बंद हो जानेपर कुलका नाश हो जाता है—ऐसा विद्वान् लोग बतलाते हैं । गृहके द्वार यदि अपने मानसे अधिक ऊँचे हैं तो राजभय तथा यदि नीचे हैं तो चोरोंका भय होता है । द्वारके ऊपर जो द्वार बनता है, वह यमराजका मुख कहा जाता है । मार्गके बीचमें बने हुए जिस गृहकी चौड़ाई बहुत अधिक होती है, वह वज्रके समान शीघ्र ही गृहपतिके विनाशका कारण होता है । यदि मुख्यद्वार अन्य द्वारोंसे निकृष्ट हो तो वह बहुत बड़ा दोषकारक होता है । अतः मुख्यद्वारकी अपेक्षा अन्य द्वारोंका बड़ा होना शुभकारक नहीं है । घट, श्रीपर्णी और लताओंसे मूलद्वारको सुशोभित रखना चाहिये और उसकी नित्य बलि, अक्षत और जलसे पूजा करनी चाहिये । घरकी पूर्व दिशामें बरगदका वृक्ष सभी प्रकारकी कामनाओंको पूर्ण करनेवाला होता है । दक्षिणमें गूलर और पश्चिममें पीपलका पेड़ शुभकारक होता है । इसी तरह उत्तरमें पाकड़का पेड़ मङ्गलकारी है । इससे विपरीत दिशामें रहनेपर ये वृक्ष विपरीत फल देनेवाले होते हैं । घरके समीप यदि काँटे या दूधवाले वृक्ष, असनाका वृक्ष एवं फलदार वृक्ष हों तो उनसे क्रमशः स्त्री और संतानकी हानि होती है । यदि कोई उन्हें काट न सके तो उनके समीप अन्य शुभदायक वृक्षोंको लगा दे । पुंनाग, अशोक, मौलसिरी, शमी, तिलक, चम्पा, अनार, पीपली, दाख, अर्जुन, जंबीर, सुपारी, कटहल, केतकी, मालती, कमल, चमेली, मल्लिका, नारियल, केला एवं पाटल—इन वृक्षोंसे सुशोभित घर लक्ष्मीका विस्तार करता है ॥ १३–२४ ॥

इस प्रकार श्रीमत्स्यमहापुराणके वास्तु-विद्या-प्रसङ्गमें वेधविवरण नामक दो सौ पचपनवाँ अध्याय सम्पूर्ण हुआ ॥ २५५ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

दो सौ छप्पनवाँ अध्याय

वास्तुप्रकरणमें गृह-निर्माणविधि

सूत उवाच

उदगादिप्लवं वास्तु समानशिखरं तथा। परीक्ष्य पूर्ववत् कुर्यात् स्तम्भोच्छ्रायं विचक्षणः ॥ १ ॥
न देवधूर्तसचिवचत्वराणां समीपतः। कारयेद् भवनं प्राज्ञो दुःखशोकमयं ततः ॥ २ ॥
तस्य प्रदेशाश्चत्वारस्तथोत्सर्गोऽग्रतः शुभः। पृष्ठतः पृष्ठभागस्तु सव्यावर्तः प्रशस्यते ॥ ३ ॥
अपसव्यो विनाशाय दक्षिणे शीर्षकस्तथा। सर्वकामफलो नृणां सम्पूर्णो नाम वामतः ॥ ४ ॥
एवं प्रदेशमालोक्य यत्नेन गृहमारभेत्। अथ सांवत्सरप्रोक्ते मुहूर्ते शुभलक्षणे ॥ ५ ॥
रत्नोपरि शिलां कृत्वा सर्वबीजसमन्विताम्। चतुर्भिर्ब्राह्मणैः स्तम्भं कारयित्वा सुपूजितम् ॥ ६ ॥
शुक्लाम्बरधरः शिल्पिसहितो वेदपारगः। स्नापितं विन्यसेत् तद्वत् सर्वौषधिसमन्वितम् ॥ ७ ॥
नानाक्षतसमोपेतं वस्त्रालङ्कारसंयुतम्। ब्रह्मघोषेण वाद्येन गीतमङ्गलनिःस्वनैः ॥ ८ ॥
पायसं भोजयेद् विप्रान् होमं तु मधुसर्पिषा। वास्तोष्पते प्रतिजानीहि मन्त्रेणानेन सर्वदा ॥ ९ ॥
सूत्रपाते तथा कार्यमेवं स्तम्भोदये पुनः। द्वारवंशोच्छ्रये तद्वत् प्रवेशसमये तथा ॥ १० ॥
वास्तूपशमने तद्वद् वास्तुयज्ञस्तु पञ्चधा। ईशाने सूत्रपातः स्यादाग्नेये स्तम्भरोपणम् ॥ ११ ॥
प्रदक्षिणं च कुर्वीत वास्तोः पदविलेखनम्। तर्जनी मध्यमा चैव तथाङ्गुष्ठस्तु दक्षिणे ॥ १२ ॥
प्रवालरत्नकनकफलं पिष्ट्वा कृतोदकम्। सर्ववास्तुविभागेषु शस्तं पदविलेखने ॥ १३ ॥

सूतजी कहते हैं—ऋषियो! बुद्धिमान् पुरुष उत्तरकी ओर झुकी हुई या समान भागवाली भूमिकी परीक्षा कर पूर्व कही गयी रीतिसे स्तम्भकी ऊँचाई आदिका निर्माण कराये। बुद्धिमान् पुरुषको देवालय, धूर्त, सचिव या चौराहेके समीप अपना घर नहीं बनवाना चाहिये; क्योंकि इससे दुःख, शोक और भय बना रहता है। घरके चारों ओर तथा द्वारके सम्मुख और पीछे कुछ भूमिको छोड़ देना शुभकारक है। पिछला भाग दक्षिणावर्त रहना ठीक है; क्योंकि वामावर्त विनाशकारक होता है। दक्षिण भागमें ऊँचा रहनेवाला घर 'सम्पूर्ण' वास्तुके नामसे अभिहित किया जाता है। वह मनुष्योंकी सभी कामनाओंको पूर्ण करता है। इस प्रकारके प्रदेशको देखकर प्रयत्नपूर्वक गृह आरम्भ करना चाहिये। सर्वप्रथम वेदज्ञ पुरोहित श्वेत वस्त्र धारणकर कारीगरके साथ ज्योतिषीके कथनानुसार शुभ मुहूर्तमें सभी बीजोंसे युक्त आधार-शिलाको रत्नके ऊपर स्थापित करे। पुनः चार ब्राह्मणोंद्वारा उस स्तम्भकी भलीभाँति पूजा कराकर उसे धो-पोंछकर अक्षत, वस्त्र, अलंकार और सर्वौषधिसे पूजितकर पूर्ववत् मन्त्रोच्चारण, बाजा और माङ्गलिक गीत आदिके शब्दके साथ स्थापित कर दे। ब्राह्मणोंको खीरका भोजन कराये और 'वास्तोष्पते प्रतिजानीहि'* (ऋक्संहिता ७। ५४। १) इस मन्त्रके द्वारा मधु और घीसे हवन करे। वास्तुयज्ञ पाँच प्रकारके हैं—सूत्रपात, स्तम्भारोपण, द्वारवंशोच्छ्रय (चौखट-स्थापन), गृहप्रवेश और वास्तु-शान्ति। इन सभीमें पूर्ववत् कार्य करनेका विधान है। ईशानकोणमें सूत्रपात और अग्निकोणमें स्तम्भारोपण होता है। वास्तुके पदचिह्नोंको बनाकर उसकी प्रदक्षिणा करनी चाहिये। सभी वास्तु-विभागोंमें दाहिने हाथकी तर्जनी, मध्यमा और अङ्गूठेसे मूँगा, रत्न और सुवर्णके चूर्णसे मिश्रित जलद्वारा पद-चिह्न बनाना श्रेष्ठ माना गया है ॥ १–१३ ॥

—क्रमशः

* यह पूरा मन्त्र इस प्रकार है—वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः। यत् त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे॥ (ऋ० ७। ५४। १, तैत्ति० ३। ४। १०। १)।

Sri Vidya Lakshmi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

श्रीगीता-रामायण-परीक्षा-समितिकी पाठ्य पुस्तकें एवं नियमावली

शिशु-परीक्षा—

१–किष्किन्धाकाण्ड सटीक

२–विनयपत्रिकाके १५ पद

प्रथमा-परीक्षा—

अन्योन्याधाररूपेण प्रणमामि स्थिताविह। विश्वचक्रमिदं यस्मात् सर्वपापहरं परम्॥१७॥
आयुधं चापि वासश्च भवादुद्धर मामतः। इत्यामन्त्र्य च यो दद्याद् विश्वचक्रं विमत्सरः॥१८॥
विमुक्तः सर्वपापेभ्यो विष्णुलोके महीयते। वैकुण्ठलोकमासाद्य चतुर्बाहुः सनातनः॥१९॥
सेव्यतेऽप्सरसां सङ्घैस्तिष्ठेत् कल्पशतत्रयम्।
प्रणमेद् वाथ यः कृत्वा विश्वचक्रं दिने दिने। तस्यायुर्वर्धते नित्यं लक्ष्मीश्च विपुला भवेत्॥२०॥
इति सकलजगत्सुराधिवासं वितरति यस्तपनीयषोडशारम्।
हरिभवनमुपागतः स सिद्धैश्चिरमभिगम्य नमस्यते शिरोभिः॥२१॥
असुदर्शनतां प्रयाति शत्रोर्मदनसुदर्शनतां च कामिनीभ्यः।
स सुदर्शनकेशवानुरूपः कनकसुदर्शनदानदग्धपापः॥२२॥
कृतगुरुदुरितानि षोडशारप्रवितरणे प्रवराकृतिर्मुरारेः।
अभिभवति भवोद्भवन्ति भित्त्वा भवमभितो भवने भयानि भूयः॥२३॥

इति श्रीमात्स्ये महापुराणे महादानानुकीर्तने विश्वचक्रप्रदानविधिर्नाम पञ्चाशीत्यधिकद्विशततमोऽध्यायः॥२८५॥

फिर अठारह प्रकारके अन्न, लवण आदि सभी रस, जलसे भरे हुए आठ माङ्गलिक कलश, विविध प्रकारके वस्त्र, पुष्पमाला, ईख, फल, रत्न, वितान—इन सबको भी यथास्थान रखना चाहिये। तदनन्तर माङ्गलिक शब्दोंके साथ गृहस्थ यजमान स्नान करके श्वेत वस्त्र धारणकर हवन एवं अधिवासनके उपरान्त अञ्जलिमें पुष्प ग्रहणकर तीन बार प्रदक्षिणा करे और इस मन्त्रका उच्चारण करे—'विश्वमयको नमस्कार है। विश्वचक्रात्माको प्रणाम है। तुम परमानन्दस्वरूप हो, अतः पापरूप कीचड़से हमारी रक्षा करो। चूँकि इस तत्त्वस्वरूप, गुणातीत,

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तेजोमय विश्वचक्रको योगीलोग सदा अपने हृदयमें देखते हैं, अतः मैं तुम्हें नमस्कार करता हूँ। यह विश्वचक्र वासुदेवमें स्थित है और माधव इस चक्रके मध्य भागमें स्थित हैं, इस प्रकार तुम दोनों अन्योन्याधाररूपसे स्थित हो, तुन्हें मैं प्रणाम करता हूँ। चूँकि यह विश्वचक्र सम्पूर्ण पातकोंका विनाश करनेवाला, भगवान्‌का आयुध तथा उनका निवासस्वरूप भी है, अतः इस भवसे मेरा उद्धार करें।' इस प्रकार आमन्त्रित करके जो मनुष्य मत्सररहित हो इस विश्वचक्रका दान करता है, वह सभी पापोंसे छूटकर विष्णुलोकमें पूजित होता है तथा वैकुण्ठलोकको प्राप्तकर चार भुजाओंसे युक्त और अविनाशी हो जाता है तथा अप्सरासमूहोंद्वारा सेवित होकर तीन सौ कल्पोंतक वहाँ निवास करता है। अथवा जो व्यक्ति इस विश्वचक्रका निर्माण कर इसे प्रतिदिन प्रणाम करता है, उसकी आयु बढ़ती है और नित्य लक्ष्मीकी वृद्धि होती है। इस प्रकार जो व्यक्ति सुवर्णनिर्मित सोलह अरोंसे युक्त तथा समस्त जगत् एवं देवताओंके अधिष्ठानरूप इस चक्रको वितरित करता है, वह विष्णु-भवनको प्राप्त होता है तथा उसे सिद्धगण सिर झुकाकर नमस्कार करते हैं। वह पुरुष स्वर्णनिर्मित सुदर्शनके दानसे निष्पाप होकर शत्रुओंको विकराल रूपमें तथा कामिनियोंको मदनकी भाँति सुन्दर कमनीयरूपमें दिखायी पड़ता है और शुभदर्शन केशवकी भाँति मनोरम स्वरूप धारण करता है। इस सोलह अरोंवाले सुवर्णनिर्मित चक्रके दान करनेसे किये गये महापाप शीघ्र ही नष्ट हो जाते हैं और कर्ता मुरारिकी श्रेष्ठ आकृति प्राप्त करता है तथा भव-भयका भेदन कर बार-बार जन्म-मरणके भयसे भी छूट जाता है॥ १२–२३॥

इस प्रकार श्रीमत्स्यमहापुराणमें महादान-वर्णन-प्रसंगमें विश्वचक्र-प्रदान-विधि नामक दो सौ पचासीवाँ अध्याय सम्पूर्ण हुआ॥ २८५॥

दो सौ छियासीवाँ अध्याय

कनककल्पलता-दानकी विधि

मत्स्य उवाच

अथातः सम्प्रवक्ष्यामि महादानमनुत्तमम्। महाकल्पलता नाम महापातकनाशनम्॥ १॥
पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम्। ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम्॥ २॥
तुलापुरुषवत् कुर्याल्लोकेशावाहनं बुधः। चामीकरमयीः कुर्याद् दश कल्पलताः समाः॥ ३॥
नानापुष्पफलोपेता नानांशुकविभूषिताः। विद्याधरसुपर्णानां मिथुनैरुपशोभिताः॥ ४॥
पुष्पाण्यादित्सुभिः सिद्धैः फलानि च विहङ्गमैः। लोकपालानुकारिण्यः कर्तव्यास्तासु देवताः॥ ५॥
ब्राह्मीमनन्तशक्तिं च लवणस्योपरि न्यसेत्। अधस्ताल्लतयोर्मध्ये पद्मशङ्खकरे शुभे॥ ६॥

मत्स्यभगवान्‌ने कहा—इसके बाद मैं महापापोंको नष्ट करनेवाले परमोत्तम महाकल्पलता नामक महादानकी विधि बतला रहा हूँ। बुद्धिमान् यजमान किसी पुण्यतिथिके दिन पुण्याहवाचन करके पूर्वकथित तुलापुरुष-दानके समान ऋत्विज, मण्डप, पूजन-सामग्री, आभूषण और आच्छादन आदिका प्रबन्ध करे तथा उसी प्रकार लोकपालोंका आवाहन करे। कल्पलता-दानके लिये सुवर्णनिर्मित समान परिमाणकी दस कल्पलताएँ बनवाये, जो विविध प्रकारके पुष्पों और फलोंसे युक्त तथा विविध रेशमी वस्त्रोंसे विभूषित तथा विद्याधरों एवं पक्षियोंके जोड़ोंसे सुशोभित हों। उन्हें पुष्प चुननेका प्रयत्न करते हुए सिद्धों, फल खानेके लिये

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

उत्सुक पक्षियों तथा लोकपालोंके समान आकृतिवाली चाहिये। दो लताओंके निम्नभागमें पद्म और शङ्खसे देवियोंसे युक्त बनाना चाहिये। फिर लवणराशिके सुशोभित हाथोंवाली उन दोनों मङ्गलमयी देवियोंको ऊपर अनन्त एवं ब्राह्मी शक्तिको स्थापित करना चित्रित करे ॥ १—६ ॥

इभासनस्था तु गुडे पूर्वतः कुलिशायुधा। रजन्यजस्थिताग्नायी स्रुवपाणिरथानले ॥ ७ ॥
याम्ये च महिषारूढा गदिनी तण्डुलोपरि। नैर्ऋते नैर्ऋती स्थाप्या सखड्गा दक्षिणापरे ॥ ८ ॥
वारुणे वारुणी क्षीरे झषस्था नागपाशिनी। पताकिनी च वायव्ये मृगस्था शर्करोपरि ॥ ९ ॥
सौम्या तिलेषु संस्थाप्या शङ्खिनी निधिसंस्थिता। माहेश्वरी वृषारूढा नवनीते त्रिशूलिनी ॥ १० ॥
मौलिन्यो वरदास्तद्वत् कर्तव्या बालकान्विताः। शक्त्या पञ्चपलादूर्ध्वमासहस्रात् प्रकल्पयेत् ॥ ११ ॥
सर्वासामुपरि स्थाप्यं पञ्चवर्णं वितानकम्। धेनवो दश कुम्भाश्च वस्त्रयुग्मानि चैव हि ॥ १२ ॥
मध्यमे द्वे तु गुरवे ऋत्विग्भ्योऽन्यास्तथैव च।
ततो मङ्गलशब्देन स्नातः शुक्लाम्बरो बुधः। त्रिः प्रदक्षिणमावृत्य मन्त्रमेतमुदीरयेत् ॥ १३ ॥
नमो नमः पापविनाशिनीभ्यो ब्रह्माण्डलोकेश्वरपालिनीभ्यः।
आशंसिताधिक्यफलप्रदाभ्यो दिग्भ्यस्तथा कल्पलतावधूभ्यः ॥ १४ ॥
इति सकलदिगङ्गनाप्रदानं भवभयसूदनकारि यः करोति।
अभिमतफलदे स नागलोके वसति पितामहवत्सराणि त्रिंशत् ॥ १५ ॥
पितृशतमथ तारयेद् भवाब्धेर्भवदुरितौघविघातशुद्धदेहः।
सुरपतिवनितासहस्रसंख्यैः परिवृतमम्बुजसंसदाभिवन्द्यः ॥ १६ ॥
इति विधानमिदं दिगङ्गनानां कनककल्पलताविनिवेदकम्।
पठति यः स्मरतीह तथेक्षते स पदमेति पुरंदरसेवितम् ॥ १७ ॥

इति श्रीमात्स्ये महापुराणे महादानानुकीर्तने कनककल्पलताप्रदानविधिर्नाम षडशीत्यधिकद्विशततमोऽध्यायः ॥२८६॥

पूर्व दिशामें गुड़के ऊपर कुलिशका अस्त्र धारण किये हुए हाथीपर विराजमान इन्द्राणीको, अग्निकोणमें हल्दी-चूर्णपर स्रुवा हाथमें लिये हुए बकरेपर सवार अग्नायीको, दक्षिण दिशामें तण्डुलपर महिषारूढ गदा धारण किये हुए यमीको, नैर्ऋत्यकोणमें घृतके ऊपर खड्गसहित नैर्ऋतीको, पश्चिम दिशामें दुग्धपर नागपाश धारण किये हुए मत्स्यपर आरूढ़ वारुणीको, वायव्यकोणमें शर्कराके ऊपर मृगारूढ़ पताका लिये हुए पताकिनी (वायवी) को, उत्तर दिशामें तिलोंपर निधिसहित शङ्ख लिये हुए (कौबेरी)को तथा ईशानकोणमें मक्खनकी राशिपर नन्दीपर आरूढ़ त्रिशूलधारण किये हुए माहेश्वरी शक्ति ऐशानीको स्थापित करना चाहिये। उसी प्रकार वहाँ केश-मुकुट धारण करनेवाली वरदायिनी देवियोंको भी बालकोंके साथ स्थापित करना चाहिये। उन्हें अपनी शक्तिके अनुसार पाँच पल सोनेसे ऊपर एक हजार पलतकका बनवाना चाहिये। इन सभीके ऊपर पँचरंगा वितान तानना चाहिये। फिर दस गौ, दस कलश तथा दो वस्त्रोंका दान देना चाहिये। इनमेंसे दो मध्यम लताओंको गुरुको तथा अन्य ऋत्विजोंको देना चाहिये। तत्पश्चात् बुद्धिमान् यजमानको माङ्गलिक शब्दोंके साथ स्नान करनेके बाद श्वेत वस्त्र धारणकर इन कल्पलताओंकी तीन प्रदक्षिणा कर इस भावके मन्त्रका उच्चारण करना चाहिये—'जो पापविनाशिनी, ब्रह्माण्ड एवं लोकेश्वरोंका पालन करनेवाली तथा याचकोंको अभिलाषासे भी अधिक फल प्रदान करनेवाली हैं, उन कल्पलता-वधुओं तथा दिग्वधुओंको बारंबार नमस्कार है।' इस प्रकार जो पुरुष भवभयको हरण करनेवाले सम्पूर्ण दिगङ्गनाओंके दानको करता है, वह अभीष्ट फलदायी नागलोकमें ब्रह्माके तीस वर्षोंतक निवास करता है तथा सैकड़ों पितरोंको भवसागरसे तार देता है। वह सांसारिक

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पापसमूहके नष्ट हो जानेसे विशुद्धशरीर होकर हजारों देवाङ्गनाओंसे सुशोभित ब्रह्माके लोकमें अभिवन्दनीय होता है। इस प्रकार दिगङ्गनाओंके तथा कनककल्पलता- के दानकी विधिको जो पढ़ता, स्मरण करता या देखता है, वह इन्द्रद्वारा सेवित पदको प्राप्त करता है ॥ ७-१७ ॥

इस प्रकार श्रीमत्स्यमहापुराणमें महादानवर्णन-प्रसंगमें कनककल्पलताप्रदानविधि नामक दो सौ छियासीवाँ अध्याय सम्पूर्ण हुआ ॥ २८६ ॥

दो सौ सतासीवाँ अध्याय

सप्तसागर-दानकी विधि

मत्स्य उवाच

अथातः सम्प्रवक्ष्यामि महादानमनुत्तमम्। सप्तसागरकं नाम सर्वपापप्रणाशनम् ॥ १ ॥
पुण्यं दिनमथासाद्य कृत्वा ब्राह्मणवाचनम्। तुलापुरुषवत् कुर्याल्लोकेशावाहनं बुधः ॥ २ ॥
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् । कारयेत् सप्त कुण्डानि काञ्चनानि विचक्षणः ॥ ३ ॥
प्रादेशमात्राणि तथारत्निमात्राणि वै पुनः। कुर्यात् सप्तपलादूर्ध्वमासहस्राच्च शक्तितः ॥ ४ ॥
संस्थाप्यानि च सर्वाणि कृष्णाजिनतिलोपरि। प्रथमं पूरयेत् कुण्डं लवणेन विचक्षणः ॥ ५ ॥
द्वितीयं पयसा तद्वत् तृतीयं सर्पिषा पुनः। चतुर्थं तु गुडेनैव दध्ना पञ्चममेव च ॥ ६ ॥
षष्ठं शर्करया तद्वत् सप्तमं तीर्थवारिणा। स्थापयेल्लवणस्थं तु ब्रह्माणं काञ्चनं शुभम् ॥ ७ ॥
केशवं क्षीरमध्ये तु घृतमध्ये महेश्वरम्। भास्करं गुडमध्ये तु दधिमध्ये निशाधिपम् ॥ ८ ॥
शर्करायां न्यसेल्लक्ष्मीं जलमध्ये तु पार्वतीम्। सर्वेषु सर्वरत्नानि धान्यानि च समन्ततः ॥ ९ ॥
तुलापुरुषवच्छेषमत्रापि परिकल्पयेत्। ततो वारुणहोमान्ते स्नापितो वेदपुङ्गवैः ॥ १० ॥
त्रिः प्रदक्षिणमावृत्य मन्त्रानेतानुदीरयेत्।

मत्स्यभगवान्‌ने कहा—अब मैं सम्पूर्ण पापोंके विनाशक परमोत्तम सप्तसागर नामक महादानकी विधि बतला रहा हूँ। बुद्धिमान् पुरुष तुलापुरुष-दानकी तरह किसी पवित्र दिनके आनेपर पुण्याहवाचन करके लोकपालोंका आवाहन करे तथा ऋत्विज्, मण्डप, पूजन-सामग्री, भूषण, आच्छादन आदिका प्रबन्ध भी उसी तरह करे। विचक्षण पुरुष स्वर्णनिर्मित सात स्वतन्त्र कुण्डोंका निर्माण करे। ये कुण्ड एक बित्ता चौड़े तथा एक अरत्नि अर्थात् बँधी हुई मुट्ठीवाले हाथ-जितने लम्बे होने चाहिये। इन्हें अपनी आर्थिक शक्तिके अनुसार सात पल सोनेसे ऊपर एक हजार पलतकका बनवाना चाहिये। इन सभी कुण्डोंको कृष्णमृगके चर्मपर रखे गये तिलोंके ऊपर स्थापित करना चाहिये। विद्वान् पुरुषको प्रथम कुण्डको लवणसे, द्वितीय कुण्डको दुग्धसे, तृतीयको घृतसे, चतुर्थको गुड़से, पञ्चमको दहीसे, छठेको चीनीसे तथा सातवेंको तीर्थके पवित्र जलसे पूर्ण करना चाहिये। फिर लवण कुण्डमें सुवर्ण-निर्मित ब्रह्माकी, दुग्धकुण्डके मध्यमें भगवान् विष्णुकी, घृतकुण्डमें भगवान् शिवकी, गुड़-कुण्डमें भगवान् भास्करकी, दधिकुण्डमें चन्द्रमाकी, शर्करा कुण्डमें लक्ष्मीकी और जलकुण्डमें पार्वतीकी स्थापना करनी चाहिये। सभी कुण्डोंको सभी ओरसे रत्नों तथा अन्नोंद्वारा अलंकृत करना चाहिये। शेष कार्य तुलापुरुषदानकी भाँति सम्पन्न करना चाहिये। तत्पश्चात् महावारुणी आहुतियाँ प्रदानकर वेदज्ञ ब्राह्मणोंद्वारा अभिषिक्त यजमान इन कुण्डोंकी तीन बार प्रदक्षिणा कर इन मन्त्रोंका उच्चारण करे ॥ १-१०½ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

नमो वः सर्वसिन्धूनामाधारेभ्यः सनातनाः। जन्तूनां प्राणदेभ्यश्च समुद्रेभ्यो नमो नमः॥ ११॥
क्षीरोदकाज्यदधिमाधुरलावणेक्षुसारामृतेन भुवनत्रयजीवसंघान्।
आनन्दयन्ति वसुभिश्च यतो भवन्तस्तस्मान्ममाप्यघविघातमलं विशन्तु॥ १२॥
यस्मात् समस्तभुवनेषु भवन्त एव तीर्थामरासुरसुवद्धमणिप्रदानम्।
पापक्षयामृतविलेपनभूषणाय लोकस्य बिभ्रति तदस्तु ममापि लक्ष्मीः॥ १३॥
इति ददाति रसामृतसंयुताञ्छुचिरविस्मयवानिह सागरान्।
अमलकाञ्चनवर्णमयानसौ पदमुपैति हरेरमरार्चितः॥ १४॥
सकलपापविधौतविराजितः पितृपितामहपुत्रकलत्रकम्।
नरकलोकसमाकुलमप्ययं झटिति सोऽपि नयेच्छिवमन्दिरम्॥ १५॥

इति श्रीमात्स्ये महापुराणे महादानानुकीर्तने सप्तसागरप्रदानविधिर्नाम सप्ताशीत्यधिकद्विशततमोऽध्यायः॥२८७॥

'सनातन सागरगण! आपलोग समस्त जीवोंके प्राणदाता तथा सम्पूर्ण नदियोंके आधार हो, आपको बारंबार नमस्कार है। चूँकि आपलोग दुग्ध, जल, घृत, दही, मधु, लवण, शक्कररूप अमृत तथा रत्नादि सम्पत्तियोंद्वारा त्रिभुवनके जीवसमूहोंको आनन्दित करते हैं, अतः मेरे भी पापपुञ्जोंका विनाश करें। चूँकि आपलोग ही समस्त भुवनोंमें लोकके पापक्षय, अमृत-विलेपन और भूषणके निमित्त तीर्थों, देवताओं, असुरों, और सुन्दर मणिके प्रदान-कार्यको धारणवाले हैं अतः वह लक्ष्मी मुझे भी प्राप्त हो।' इस प्रकार जो मनुष्य पवित्र एवं विस्मयरहित होकर इस लोकमें रस एवं अमृतसे युक्त निर्मल सोनेके बने हुए सागरोंका दान करता है, वह देवताओंद्वारा पूजित होकर भगवान् विष्णुके पदको प्राप्त करता है। सम्पूर्ण पापोंके धुल जानेसे विशुद्ध हुआ यह पुरुष नरकलोकमें व्याकुल हुए पिता, पितामह, पुत्र और पत्नी आदिको भी शीघ्र ही शिवलोकमें ले जाता है॥ ११-१५॥

इस प्रकार श्रीमत्स्यमहापुराणमें महादानवर्णन-प्रसङ्गमें सप्तसागर-दान-विधि नामक दो सौ सत्तासीवाँ अध्याय सम्पूर्ण हुआ॥ २८७॥

दो सौ अठासीवाँ अध्याय

रत्नधेनु-दानकी विधि

मत्स्य उवाच

अथातः सम्प्रवक्ष्यामि महादानमनुत्तमम्। रत्नधेन्विति विख्यातं गोलोकफलदं नृणाम्॥ १॥
पुण्यं दिनमथासाद्य तुलापुरुषदानवत्। लोकेशावाहनं कृत्वा ततो धेनुं प्रकल्पयेत्॥ २॥
भूमौ कृष्णाजिनं कृत्वा लवणद्रोणसंयुतम्। धेनुं रत्नमयीं कुर्यात् सङ्कल्प्य विधिपूर्वकम्॥ ३॥
स्थापयेत् पद्मरागाणामेकाशीतिं मुखे बुधः। पुष्परागशतं तद्वद् घोणायां परिकल्पयेत्॥ ४॥
ललाटे हेमतिलकं मुक्ताफलशतं दृशोः। भ्रूयुगे विद्रुमशतं शुक्ती कर्णद्वये स्मृते॥ ५॥
काञ्चनानि च शृङ्गाणि शिरो वज्रशतात्मकम्। ग्रीवायां नेत्रपटलं गोमेदकशतान्वितम्॥ ६॥
इन्द्रनीलशतं पृष्ठे वैदूर्यशतपार्श्वके। स्फाटिकैरुदरं तद्वत् सौगन्धिकशतैः कटिम्॥ ७॥
खुरा हेममयाः कार्याः पुच्छं मुक्तावलीमयम्। सूर्यकान्तेन्दुकान्तौ च घ्राणे कर्पूरचन्दने॥ ८॥
कुङ्कुमानि च रोमाणि रौप्यनाभिं च कारयेत्। गारुत्मतशतं तद्वदपाने परिकल्पयेत्॥ ९॥

Sri Vidyabharathi Book Donation Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तथान्यानि च रत्नानि स्थापयेत् सर्वसन्धिषु। कुर्याच्छर्करया जिह्वां गोमयं च गुडात्मकम् ॥ १० ॥
गोमूत्रमाज्येन तथा दधिदुग्धे स्वरूपतः। पुच्छाग्रे चामरं दद्यात् समीपे ताम्रदोहनम् ॥ ११ ॥

मत्स्यभगवान्ने कहा—अब मैं मनुष्योंको गोलोक प्रदान करनेवाले अत्युत्तम 'रत्नधेनु' नामक महादानकी विधिका वर्णन कर रहा हूँ। किसी पुण्य दिनके आनेपर यजमान तुलापुरुषदानकी तरह लोकपालोंका आवाहन करनेके पश्चात् धेनुकी कल्पना करे। पृथ्वीपर कृष्णमृगचर्म बिछाकर उसपर एक द्रोण लवण रखकर उसके ऊपर विधिपूर्वक संकल्पसहित रत्नमयी धेनुको स्थापित करे। बुद्धिमान् पुरुष उसके मुखमें इक्यासी पद्मराग मणि तथा थूथुनमें इक्यासी पुष्पराग (पुखराज) स्थापित करे। उस गौके ललाटपर सोनेका तिलक लगावे। उसकी दोनों आँखोंमें सौ मुक्ता (मोती), दोनों भौंहोंपर सौ प्रवाल (मूँगा) और दोनों कानोंकी जगह दो शुक्तियाँ (सीपें) लगानी चाहिये। उसके सींग सोनेके होने चाहिये। सिरकी जगह सौ हीरोंको स्थापित करना चाहिये। कण्ठ और नेत्र-पलकोंमें सौ गोमेदक, पृष्ठभागमें सौ इन्द्रनील (नीलम), दोनों पार्श्व-स्थानोंमें सौ वैदू(दू)र्य (बिलौर), उदरपर स्फटिक तथा कटिदेशपर सौ सौगन्धिक (माणिक-लाल) मणि रखना चाहिये। खुरोंको स्वर्णमय, पूँछको मुक्ता (मोतियों)की लड़ियोंसे युक्त और दोनों नाकोंको सूर्यकान्त तथा चन्द्रकान्त मणियोंसे बनाकर कर्पूर और चन्दनसे अर्चित करना चाहिये। रोमोंको केसर और नाभिको चाँदीसे बनवाये। गुदामें सौ लाल मणियोंको लगाना चाहिये। अन्य रत्नोंको संधिभागोंपर लगाना चाहिये। जीभको शक्करसे, गोबरको गुड़से और गोमूत्रको घीसे बनवाना चाहिये। दही-दूध प्रत्यक्ष ही रखे। पूँछके अग्रभागपर चमर तथा समीपमें ताँबेकी दोहनी रखनी चाहिये ॥ १–११ ॥

कुण्डलानि च हैमानि भूषणानि च शक्तितः। कारयेदेवमेवं तु चतुर्थांशेन वत्सकम् ॥ १२ ॥
तथा धान्यानि सर्वाणि पादाश्चेक्षुमयाः स्मृताः। नानाफलानि सर्वाणि पञ्चवर्णं वितानकम् ॥ १३ ॥
एवं विरचनं कृत्वा तद्वद्धोमाधिवासनम्।
ऋत्विग्भ्यो दक्षिणां दद्याद् धेनुमामन्त्रयेत् ततः। गुडधेनुवदावाह्य इह चोदाहरेत् ततः ॥ १४ ॥
त्वां सर्वदेवगणधाम यतः पठन्ति रुद्रेन्द्रसूर्यकमलासनवासुदेवाः।
तस्मात् समस्तभुवनत्रयदेहयुक्ता मां पाहि देवि भवसागरपीड्यमानम् ॥ १५ ॥
आमन्त्र्य चेत्थमभितः परिवृत्य भक्त्या दद्याद् द्विजाय गुरवे जलपूर्विकां ताम्।
यः पुण्यमाप्य दिनमत्र कृतोपवासः पापैर्विमुक्ततनुरेति पदं मुरारेः ॥ १६ ॥
इति सकलविधिज्ञो रत्नधेनुप्रदानं वितरति स विमानं प्राप्य देदीप्यमानम्।
सकलकलुषमुक्तो बन्धुभिः पुत्रपौत्रैः स हि मदनसरूपः स्थानमभ्येति शम्भोः ॥ १७ ॥

इति श्रीमात्स्ये महापुराणे महादानानुकीर्तने रत्नधेनुप्रदानविधिर्नामाष्टाशीत्यधिकद्विशततमोऽध्यायः ॥ २८८ ॥

अपनी आर्थिक शक्तिके अनुसार उसे सोनेसे निर्मित आभूषण और कुण्डल पहनाने चाहिये, उसके ईखके पैर होने चाहिये। इसी प्रकार गौके चतुर्थांशसे बछड़ा बनवाना चाहिये। उस गौके समीप सभी प्रकारके अन्न, विविध फल, पँचरंगा वितान भी यथास्थान रखना चाहिये। इस प्रकार गौकी रचना, हवन और अधिवासन करनेके बाद ऋत्विजोंको दक्षिणा देनी चाहिये। इसके बाद धेनुको आमन्त्रित करे। उस समय गुड़धेनुकी तरह आवाहन कर यह कहना चाहिये—'देवि! चूँकि रुद्र, इन्द्र, सूर्य, ब्रह्मा, विष्णु—ये सभी तुम्हें सम्पूर्ण देवताओंका निवासस्थान मानते हैं तथा समस्त त्रिभुवन तुम्हारे ही शरीरमें व्याप्त हैं, अतः तुम भवसागरसे पीड़ित मेरा उद्धार करो।' इस प्रकार आमन्त्रित करनेके बाद

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

गौकी परिक्रमा कर भक्तिपूर्वक हाथमें जल लेकर उस गौको ब्राह्मण गुरुको दान करना चाहिये। जो व्यक्ति इस प्रकार पुण्य दिन आनेपर उपवासकर यह दान करता है, उसका शरीर पापोंसे मुक्त हो जाता है और वह भगवान् मुरारिके परमपदको प्राप्त करता है। इस प्रकार सम्पूर्ण विधियोंको जाननेवाला जो पुरुष इस रत्नधेनुका दान करता है, वह सम्पूर्ण पापोंसे मुक्त होकर कामदेव-सदृश सौन्दर्यशाली हो जाता है तथा अपने बन्धुओं, पुत्रों और पौत्रोंके साथ देदीप्यमान विमानपर सवार हो, शिवके लोक (कैलास या सुमेरुस्थित दिव्य शिवधाम)को प्राप्त करता है ॥ १२—१७ ॥

इस प्रकार श्रीमत्स्यमहापुराणके महादान-वर्णन-प्रसङ्गमें रत्नधेनुदान नामक दो सौ अठासीवाँ अध्याय सम्पूर्ण हुआ ॥२८८॥

दो सौ नवासीवाँ अध्याय

महाभूत-घट-दानकी विधि

मत्स्य उवाच

अथातः सम्प्रवक्ष्यामि महादानमनुत्तमम् । महाभूतघटं नाम महापातकनाशनम् ॥ १ ॥
पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम् । ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् ॥ २ ॥
तुलापुरुषवत् कुर्याल्लोकेशावाहनादिकम् । कारयेत् काञ्चनं कुम्भं महारत्नाचितं बुधः ॥ ३ ॥
प्रादेशादङ्गुलशतं यावत् कुर्यात् प्रमाणतः । क्षीराज्यपूरितं तद्वत् कल्पवृक्षसमन्वितम् ॥ ४ ॥
पद्मासनगतांस्तत्र ब्रह्मविष्णुमहेश्वरान् ।
लोकपालान् महेन्द्रांश्च स्वस्ववाहनमास्थितान् । वराहेणोद्धृतां तद्वत् कुर्यात् पृथ्वीं सपङ्कजाम् ॥ ५ ॥
वरुणं चासनगतं काञ्चनं मकरोपरि । हुताशनं मेषगतं वायुं कृष्णमृगासनम् ॥ ६ ॥
तथा कोशाधिपं कुर्यान्मूषकस्थं विनायकम् । विन्यस्य घटमध्ये तान् वेदपञ्चकसंयुतान् ॥ ७ ॥
ऋग्वेदस्याक्षसूत्रं स्याद् यजुर्वेदस्य पङ्कजम् । सामवेदस्य वीणा स्याद् वेणुं दक्षिणतो न्यसेत् ॥ ८ ॥
अथर्ववेदस्य पुनः स्रुक्स्रुवौ कमलं करे । पुराणवेदो वरदः साक्षसूत्रकमण्डलुः ॥ ९ ॥

मत्स्यभगवान्ने कहा—अब इसके बाद मैं महापातकोंको नष्ट करनेवाले अत्युत्तम 'महाभूतघट-दान' नामक महादानकी विधि बतला रहा हूँ। किसी पवित्र तिथिके आनेपर तुलापुरुष-दानकी तरह पुण्याहवाचन कर ऋत्विज्, मण्डप, पूजन-सामग्री, आभूषण और आच्छादन आदिके प्रबन्धके साथ लोकपालोंका आवाहन आदि कार्य सम्पन्न करे। फिर बुद्धिमान् पुरुष रत्नोंसे जटित सोनेका एक कलश बनवाये, जो एक बित्तेसे लेकर सौ अंगुलतकके विस्तारवाला हो। उसे दुग्ध और घृतसे पूर्ण करके उसके पास कल्पवृक्ष रख दे। वहीं पद्मासनपर स्थित ब्रह्मा तथा अपने-अपने वाहनोंपर आरूढ़ विष्णु, शिव, लोकपालगण, देवराज इन्द्रादि देवगणोंको भी बनाये। उसी प्रकार वराहद्वारा ऊपर उठायी गयी कमलसमेत पृथ्वीकी रचना करनी चाहिये। फिर मकरके वाहनपर आसन लगाये हुए स्वर्णनिर्मित वरुण, मेषवाहनपर आरूढ़ अग्नि, कृष्णमृगपर सवार वायु, पालकीपर बैठे हुए कुबेर तथा मूषकपर स्थित गणपति—इन सब देवताओंको पाँचों वेदोंके साथ उक्त घटमें स्थापित करना चाहिये। उनमें ऋग्वेदको रुद्राक्षमाला लिये, यजुर्वेदको कमल लिये, सामवेदको बायें हाथमें वीणा और दाहिने हाथमें वेणु लिये तथा अथर्ववेदको हाथोंमें स्रुक्, स्रुवा और कमल लिये हुए बनाना चाहिये। पञ्चमवेद पुराणके आयुध अक्षसूत्र, कमण्डलु और अभय तथा वरद मुद्राएँ हैं ॥ १—९ ॥

परितः सर्वधान्यानि चामरासनदर्पणम् । पादुकोपानहच्छत्रं दीपिकाभूषणानि च ॥ १० ॥
शय्यां च जलकुम्भांश्च पञ्चवर्णं वितानकम् । स्नात्वाधिवासनान्ते तु मन्त्रमेतमुदीरयेत् ॥ ११ ॥
नमो वः सर्वदेवानामाधारे[illegible] । महाभूताधिदेवेभ्यः शान्तिरस्तु शिवं मम ॥ १२ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

यस्मान्न किंचिदप्यस्ति महाभूतैर्विना कृतम्। ब्रह्माण्डे सर्वभूतेषु तस्माच्छ्रीरक्षयास्तु मे ॥ १३ ॥
इत्युच्चार्य महाभूतघटं यो विनिवेदयेत्। सर्वपापविनिर्मुक्तः स याति परमां गतिम् ॥ १४ ॥
विमानेनार्कवर्णेन पितृबन्धुसमन्वितः। स्तूयमानो वरस्त्रीभिः पदमभ्येति वैष्णवम् ॥ १५ ॥
षोडशैतानि यः कुर्यान्महादानानि मानवः। न तस्य पुनरावृत्तिरिह लोकेऽभिजायते ॥ १६ ॥
इह पठति य इत्थं वासुदेवस्य पार्श्वे ससुतपितृकलत्रः संशृणोतीह सम्यक्।
मुररिपुभवने वै मन्दिरे वार्कलक्ष्म्या त्वमरपुरवधूभिर्मोदते सोऽपि कल्पम् ॥ १७ ॥

इति श्रीमात्स्ये महापुराणे महादानानुकीर्तनं नामैकोननवत्यधिकद्विशततमोऽध्यायः ॥ २८९ ॥

उस कलशके चारों ओर सभी (अठारह) प्रकारके अन्न, चामर, आसन, दर्पण, पादुका, जूता, छत्र, दीपक, आभूषण, शय्या, जलपूर्ण कलश और पँचरंगा वितान रखना चाहिये। फिर यजमान अधिवासनके अन्तमें स्नान करके इस मन्त्रका उच्चारण करे—'इस चराचर जगत्में आपलोग सम्पूर्ण देवताओंके आधार तथा पञ्चमहाभूतोंके अधिदेवता हैं, आपलोगोंको प्रणाम है। आप मुझे शान्ति एवं कल्याण प्रदान कीजिये। चूँकि इस ब्रह्माण्डके सभी जीवोंमें इन पञ्च महाभूतोंके अतिरिक्त अन्य कुछ भी नहीं है, अतः इनकी कृपासे मुझे अक्षय लक्ष्मी प्राप्त हो।' इस प्रकार उच्चारण करनेके बाद जो व्यक्ति महाभूत-घटका दान करता है, वह सभी पापोंसे मुक्त होकर परम गतिको प्राप्त होता है तथा पितरों एवं बन्धुगणोंके साथ सूर्यके समान तेजस्वी विमानपर आरूढ़ हो अप्सराओंद्वारा प्रशंसित होता हुआ विष्णुके लोकको जाता है। जो मानव इन उपर्युक्त सोलहों महादानोंका अनुष्ठान करता है, उसे इस लोकमें पुनः नहीं आना पड़ता। इस पृथ्वीपर जो मनुष्य वासुदेवके समीप इसे इस विधिसे पढ़ता है तथा पुत्र, पिता एवं स्त्रीके साथ भलीभाँति श्रवण करता है, वह सूर्यके समान तेजस्वी होकर देवाङ्गनाओंके साथ विष्णुलोकमें कल्पपर्यन्त आनन्दका अनुभव करता है ॥ १०-१७ ॥

इस प्रकार श्रीमत्स्यमहापुराणमें महादान-वर्णन नामक दो सौ नवासीवाँ अध्याय सम्पूर्ण हुआ ॥ २८९ ॥

दो सौ नब्बेवाँ अध्याय

कल्पानुकीर्तन

मनुरुवाच

कल्पमानं त्वया प्रोक्तं मन्वन्तरयुगेषु च। इदानीं कल्पनामानि समासात् कथयाच्युत ॥ १ ॥

मनुने पूछा—अच्युत ! मन्वन्तर एवं युगोंका दिया है, अब मुझे (सभी तीस) कल्पोंके नाम वर्णन करते समय आपने कल्पका प्रमाण तो बता संक्षेपसे बतलाइये ॥ १ ॥

मत्स्य उवाच

कल्पानां कीर्तनं वक्ष्ये महापातकनाशनम्। यस्यानुकीर्तनादेव वेदपुण्येन युज्यते ॥ २ ॥
प्रथमः श्वेतकल्पस्तु द्वितीयो नीललोहितः। वामदेवस्तृतीयस्तु ततो राथन्तरोऽपरः ॥ ३ ॥
रौरवः पञ्चमः प्रोक्तः षष्ठो देव इति स्मृतः। सप्तमोऽथ बृहत्कल्पः कन्दर्पोऽष्टम उच्यते ॥ ४ ॥
सद्योऽथ नवमः प्रोक्त ईशानो दशमः स्मृतः। तम एकादशः प्रोक्तस्तथा सारस्वतः परः ॥ ५ ॥
त्रयोदश उदानस्तु गारुडोऽथ चतुर्दशः। कौर्मः पञ्चदशः प्रोक्तः पौर्णमास्यामजायत ॥ ६ ॥
षोडशो नारसिंहस्तु समानस्तु ततोऽपरः। आग्नेयोऽष्टादशः प्रोक्तः सोमकल्पस्तथा परः ॥ ७ ॥
मानवो विंशतिः प्रोक्तस्तत्पुमानिति चापरः। वैकुण्ठश्चापरस्तद्वल्लक्ष्मीकल्पस्तथा परः ॥ ८ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

चतुर्विंशतिमः प्रोक्तः सावित्रीकल्पसंज्ञकः। पञ्चविंशस्ततो घोरो वाराहस्तु ततोऽपरः ॥ ९ ॥
सप्तविंशोऽथ वैराजो गौरीकल्पस्तथापरः। माहेश्वरस्तु स प्रोक्तस्त्रिपुरं यत्र घातितम् ॥ १० ॥
पितृकल्पस्तथान्ते तु या कुहूर्ब्रह्मणः पुरा। इत्येवं ब्रह्मणो मासः सर्वपातकनाशनः ॥ ११ ॥

मत्स्यभगवान्‌ने कहा—अब मैं कल्पोंका वर्णन कर रहा हूँ, जो महान् पातकोंको नष्ट करनेवाला है और जिसका अनुकीर्तन करनेसे वेदाध्ययनका पुण्य प्राप्त होता है। उनमें प्रथम श्वेतकल्प, दूसरा नीललोहित, तीसरा वामदेव, चौथा रथन्तरकल्प, पाँचवाँ रौरवकल्प, छठा देवकल्प, सातवाँ बृहत्कल्प, आठवाँ कंदर्पकल्प, नवाँ सद्यः-कल्प, दसवाँ ईशानकल्प, ग्यारहवाँ तमःकल्प, बारहवाँ सारस्वतकल्प, तेरहवाँ उदानकल्प, चौदहवाँ गारुडकल्प तथा पंद्रहवाँ कौर्मकल्प कहा गया है। इस दिन ब्रह्माजीकी पूर्णिमातिथि थी। सोलहवाँ नारसिंहकल्प, सत्रहवाँ समान-कल्प, अठारहवाँ आग्नेयकल्प, उन्नीसवाँ सोमकल्प, बीसवाँ मानवकल्प, इक्कीसवाँ तत्पुमान्‌कल्प, बाईसवाँ वैकुण्ठकल्प, तेईसवाँ लक्ष्मीकल्प, चौबीसवाँ सावित्रीकल्प, पचीसवाँ घोरकल्प, छब्बीसवाँ वाराहकल्प, सत्ताईसवाँ वैराजकल्प, अट्ठाईसवाँ गौरीकल्प, उन्तीसवाँ माहेश्वरकल्प कहा गया है, जिसमें त्रिपुरका विनाश हुआ था। तीसवाँ पितृकल्प है, जो प्राचीन कालमें ब्रह्माकी अमावस्या थी। इस प्रकार ये सभी तीसों कल्प ब्रह्माके एक मास हैं, जो सभी पातकोंका नाश करनेवाले हैं ॥ २—११ ॥

आदावेव हि माहात्म्यं यस्मिन् यस्य विधीयते। तस्य कल्पस्य तन्नाम विहितं ब्रह्मणा पुरा ॥ १२ ॥
संकीर्णास्तामसाश्चैव राजसाः सात्त्विकास्तथा। रजस्तमोमयास्तद्वदेते त्रिंशदुदाहृताः ॥ १३ ॥
संकीर्णेषु सरस्वत्याः पितॄणां च्युष्टिरुच्यते।
अग्नेः शिवस्य माहात्म्यं तामसेषु दिवाकरे। राजसेषु च माहात्म्यमधिकं ब्रह्मणः स्मृतम् ॥ १४ ॥
यस्मिन् कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा। तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते ॥ १५ ॥
सात्त्विकेष्वधिकं तद्वद् विष्णोर्माहात्म्यमुत्तमम्। तथैव योगसंसिद्धा गमिष्यन्ति परां गतिम् ॥ १६ ॥
ब्राह्मं पाद्ममिमं यस्तु पठेत् पर्वणि पर्वणि। तस्य धर्मे मतिर्ब्रह्मा करोति विपुलां श्रियम् ॥ १७ ॥
यस्तु दद्यादिमान् कृत्वा हैमान् पर्वणि पर्वणि। ब्रह्मविष्णुपुरे वासं मुनिभिः पूज्यते दिवि ॥ १८ ॥
सर्वपापक्षयकरं कल्पदानं यतो भवेत्। मुनिरूपांस्ततः कृत्वा दद्यात् कल्पान् विचक्षणः ॥ १९ ॥
पुराणसंहिता चेयं तव भूप मयोदिता। सर्वपापहरा नित्यमारोग्यश्रीफलप्रदा ॥ २० ॥
ब्रह्मसंवत्सरशतादेकाहं शैवमुच्यते। शिववर्षशतादेकं निमेषं वैष्णवं विदुः ॥ २१ ॥
यदा स विष्णुर्जागर्ति तदेदं चेष्टते जगत्। यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति ॥ २२ ॥

प्रारम्भमें ही जिस कल्पमें जिसका माहात्म्य वर्णन किया गया है, उसी आधारपर ब्रह्माने उस कल्पका वह नाम रखा है। ये तीसों कल्प संकीर्ण, तामस, राजस, सात्त्विक तथा रजस्तमोमय—इन भेदोंसे युक्त कहे गये हैं। संकीर्ण कल्पोंमें सरस्वती तथा पितरोंका, तामसमें अग्नि, सूर्य तथा शिवका और राजसमें ब्रह्माका अधिक माहात्म्य कहा गया है। प्राचीन कालमें ब्रह्माने जिस कल्पमें जिस पुराणको कहा है, उसी कल्पका माहात्म्य उस पुराणमें वर्णन किया गया है। सात्त्विक कल्पोंमें उत्तम रूपसे विष्णु भगवान्‌का माहात्म्य वर्णित है। योगसे सिद्धि प्राप्त करनेवाले लोग उनके पाठसे परमगतिको प्राप्त होते हैं। जो व्यक्ति प्रत्येक पर्वमें इन ब्रह्म तथा पद्म नामक पुराणोंका पाठ करता है, उसकी बुद्धिको ब्रह्मा धर्ममें लगाते हैं तथा उसे प्रचुर सम्पत्ति प्रदान करते हैं। जो व्यक्ति पर्व आनेपर इन्हें सोनेका बनवाकर दान करता है, वह ब्रह्मा तथा विष्णुके पुरमें निवास करते हुए स्वर्गमें मुनियोंद्वारा पूजित होता है; क्योंकि कल्पदान सम्पूर्ण पापोंको नष्ट करनेवाला होता

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

है। विचक्षण पुरुषको इन कल्पोंको मुनिके समान स्वरूपवाला बनाकर दान करना चाहिये। राजन्! यह पुराण-संहिता, जो मैंने तुम्हें बताया है, सभी पापोंको नष्ट करनेवाली तथा नित्य आरोग्य एवं श्रीरूप फल प्रदान करनेवाली है। ब्रह्माका सौ वर्ष शिवका एक दिन तथा शिवका सौ वर्ष विष्णुका एक निमेष कहा जाता है। जब वे विष्णु जागते रहते हैं, तब यह जगत् भी चेष्टावान् रहता है और जब वे शान्त होकर शयन करते हैं, तब सारा जगत् शान्त हो जाता है॥ १२–२२॥

सूत उवाच

इत्युक्त्वा देवदेवेशो मत्स्यरूपी जनार्दनः। पश्यतां सर्वभूतानां तत्रैवान्तरधीयत॥ २३॥
वैवस्वतो हि भगवान् विसृज्य विविधाः प्रजाः। स्वान्तरं पालयामास मार्तण्डकुलवर्धनः॥ २४॥
यस्य मन्वन्तरं चैतदधुना चानुवर्तते।
पुण्यं पवित्रमेतद् वः कथितं मत्स्यभाषितम्। पुराणं सर्वशास्त्राणां यदेतन्मूर्ध्नि संस्थितम्॥ २५॥

इति श्रीमात्स्ये महापुराणे कल्पानुकीर्त्तनं नाम नवत्यधिकद्विशततमोऽध्यायः॥ २९०॥

सूतजी कहते हैं—ऋषियो! ऐसा कहकर मत्स्यरूपी देवदेवेश्वर जनार्दन सभी प्राणियोंके सामने वहीं अन्तर्हित हो गये। विवस्वान्‌के पुत्र मार्तण्ड-कुलवर्धन भगवान् मनु विविध प्रजाओंकी सृष्टि कर अपनी अवधितक उनका पालन करते रहे। उन्हींका यह मन्वन्तर अभीतक चला आ रहा है। इस प्रकार मैंने आपलोगोंसे मत्स्यभगवान्‌द्वारा कहे गये पुण्यप्रद पवित्र पुराणका वर्णन कर दिया। यह मत्स्यपुराण सभी शास्त्रोंमें शिरोभूषण-रूपसे अवस्थित है॥ २३–२५॥

इस प्रकार श्रीमत्स्यमहापुराणमें कल्पानुकीर्तन नामक दो सौ नब्बेवाँ अध्याय सम्पूर्ण हुआ॥ २९०॥

दो सौ इक्यानबेवाँ अध्याय

मत्स्यपुराणकी अनुक्रमणिका

सूत उवाच

एतद् वः कथितं सर्वं यदुक्तं विश्वरूपिणा। मात्स्यं पुराणमखिलं धर्मकामार्थसाधनम्॥ १॥
यत्रादौ मनुसंवादो ब्रह्माण्डकथनं तथा। सांख्यं शारीरकं प्रोक्तं चतुर्मुखमुखोद्भवम्॥ २॥
देवासुराणामुत्पत्तिर्मारुतोत्पत्तिरेव च। मदनद्वादशी तद्वल्लोकपालाभिपूजनम्॥ ३॥
मन्वन्तराणामुद्देशो वैन्यराजाभिवर्णनम्। सूर्यवैवस्वतोत्पत्तिर्बुधसङ्गमनं तथा॥ ४॥
पितृवंशानुकथनं श्राद्धकालस्तथैव च। पितृतीर्थप्रवासश्च सोमोत्पत्तिस्तथैव च॥ ५॥
कीर्तनं सोमवंशस्य ययातिचरितं तथा। कार्तवीर्यस्य माहात्म्यं वृष्णिवंशानुकीर्तनम्॥ ६॥
भृगुशापस्तथा विष्णोर्दशत्यशापस्तथैव च। कीर्तनं पुरुवंशस्य वंशो हौताशनस्तथा॥ ७॥
पुराणकीर्तनं तद्वत् क्रियायोगस्तथैव च। व्रतं नक्षत्रसंख्याकं मार्तण्डशयनं तथा॥ ८॥
कृष्णाष्टमीव्रतं तद्वद् रोहिणीचन्द्रसंज्ञितम्। तडागविधिमाहात्म्यं पादपोत्सर्ग एव च॥ ९॥
सौभाग्यशयनं तद्वदगस्त्यव्रतमेव च। तथानन्ततृतीया तु रसकल्याणिनी तथा॥ १०॥
आर्द्रानन्दकरी तद्वद् व्रतं सारस्वतं पुनः। उपरागाभिषेकश्च सप्तमीस्नपनं पुनः॥ ११॥
भीमाख्या द्वादशी तद्वदनङ्गशयनं तथा। अशून्यशयनं तद्वत् तथैवाङ्गारकव्रतम्॥ १२॥
सप्तमीसप्तकं तद्वद् विशोकद्वादशी तथा। मेरुप्रदानं दशधा ग्रहशान्तिस्तथैव च॥ १३॥
ग्रहस्वरूपकथनं तथा शिवचतुर्दशी। तथा सर्वफलत्यागः सूर्यवारव्रतं तथा॥ १४॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सूतजी कहते हैं—ऋषियो ! विश्वस्वरूप मत्स्य-भगवान्‌ने धर्म, अर्थ और कामके साधनभूत जिस सम्पूर्ण मत्स्यपुराणका वर्णन किया था, वह सब मैंने आपलोगोंको बतला दिया । उसमें आदिमें मनुका संवाद, ब्रह्माण्डका वर्णन तथा चतुर्मुख ब्रह्माके मुखसे उद्भूत शारीरक सांख्यका वर्णन है । तत्पश्चात् देवताओं और असुरोंकी उत्पत्ति, मरुद्गणोंकी उत्पत्ति, मदनद्वादशी, लोकपालोंका पूजन, मन्वन्तरोंका उद्देश्य, राजा पृथुका वर्णन, सूर्य और वैवस्वत मनुकी उत्पत्ति, बुधका इलासे संयोग, पितृवंशका वर्णन, श्राद्धके कालका निर्णय, पितृतीर्थोंमें प्रवास, सोमकी उत्पत्ति, सोमवंशका वर्णन, ययातिका चरित्र, कार्तवीर्य अर्जुनका माहात्म्य, वृष्णि-वंशका वर्णन, भृगुशाप, विष्णुका दैत्योंको शाप, पुरुषेशका कीर्तन, अग्नि-वंशका वर्णन, पुराणोंका वर्णन, क्रियायोगका विवेचन, नक्षत्रसंज्ञकव्रत, मार्तण्ड-शयन, कृष्णाष्टमीव्रत, रोहिणीचन्द्रव्रत, तडागविधिका माहात्म्य, पादपोत्सर्ग-विधि, सौभाग्यशयनव्रत, अगस्त्य-व्रत, अनन्ततृतीयाव्रत, रसकल्याणिनीव्रत, आर्द्रानन्दकरी-व्रत, सारस्वतव्रत, उपरागाभिषेकव्रत, सप्तमीस्नपन-व्रत, भीमद्वादशीव्रत, अनङ्गशयनव्रत, अशून्यशयनव्रत, अङ्गारकव्रत, सप्तमीसप्तकव्रत, विशोकद्वादशीव्रत, दस प्रकारके मेरुओंके दानकी विधि, ग्रहशान्ति, ग्रहोंके स्वरूपका कथन, शिवचतुर्दशीव्रत, सर्वफलत्यागव्रत तथा सूर्यवार-व्रतका निरूपण हुआ है ॥ १—१४ ॥

संक्रान्तिस्नपनं तद्वद् विभूतिद्वादशीव्रतम् । षष्टिव्रतानां माहात्म्यं तथा स्नानविधिक्रमः ॥ १५ ॥
प्रयागस्य तु माहात्म्यं सर्वतीर्थानुकीर्तनम् । ऐलाश्रमव्रतं तद्वद् द्वीपलोकानुकीर्तनम् ॥ १६ ॥
सूर्यचन्द्रगतिस्तद्वदादित्यरथवर्णनम् । तथान्तरिक्षचारश्च ध्रुवमाहात्म्यमेव च ॥ १७ ॥
भुवनानि सुरेन्द्राणां त्रिपुराघोषणं तथा । पितृपिण्डदमाहात्म्यं मन्वन्तरविनिर्णयः ॥ १८ ॥
वज्राङ्गस्य तु सम्भूतिस्तारकोत्पत्तिरेव च । तारकासुरमाहात्म्यं ब्रह्मदेवानुमन्त्रणम् ॥ १९ ॥
पार्वतीसम्भवस्तद्वत् तथा शिवतपोवनम् । अनङ्गदेहदाहस्तु रतिशोकस्तथैव च ॥ २० ॥
गौरीतपोवनं तद्वद् विश्वनाथप्रसादनम् । पार्वतीऋषिसंवादस्तथैवोद्वाहमङ्गलम् ॥ २१ ॥
कुमारसम्भवस्तद्वत् कुमारविजयस्तथा । तारकस्य वधो घोरो नरसिंहोपवर्णनम् ॥ २२ ॥
पद्मोद्भवविसर्गस्तु तथैवान्धकघातनम् । वाराणस्यास्तु माहात्म्यं नर्मदायास्तथैव च ॥ २३ ॥
प्रवरानुक्रमस्तद्वत् पितृगाथानुकीर्तनम् । तथोभयमुखीदानं दानं कृष्णाजिनस्य च ॥ २४ ॥
तथा सावित्र्युपाख्यानं राजधर्मास्तथैव च । यात्रानिमित्तकथनं स्वप्नमाङ्गल्यकीर्तनम् ॥ २५ ॥
वामनस्य तु माहात्म्यं तथैवाथ वराहजम् । क्षीरोदमथनं तद्वत् कालकूटाभिशासनम् ॥ २६ ॥
देवासुरविमर्दश्च वास्तुविद्यास्तथैव च । प्रतिमालक्षणं तद्वद् देवताराधनं ततः ॥ २७ ॥
प्रासादलक्षणं तद्वन्मण्डपानां तु लक्षणम् ।
भविष्यद्राजनिर्देशो महादानानुकीर्तनम् । कल्पानुकीर्तनं तद्वद् ग्रन्थानुक्रमणी तथा ॥ २८ ॥

उसी प्रकार संक्रान्तिस्नपनव्रत, विभूतिद्वादशीव्रत, साठ व्रतोंका माहात्म्य, स्नानविधिका क्रम, प्रयागका माहात्म्य, समस्त तीर्थोंका वर्णन, ऐलाश्रमव्रत, द्वीप और लोकोंका कथन, सूर्य और चन्द्रमाकी गतिका वर्णन, आदित्यके रथका वर्णन, उसका अन्तरिक्षमें गमन, ध्रुवका माहात्म्य, सुरेन्द्रोंके भुवन, त्रिपुरके प्रति घोषणा, पितरोंके पिण्डदानका माहात्म्य, मन्वन्तरोंका निर्णय, वज्राङ्गकी उत्पत्ति, तारककी उत्पत्ति, तारकासुरकी प्रशंसा, ब्रह्मा और देवताओंकी मन्त्रणा, पार्वतीकी उत्पत्ति, शिवका तपोवन-गमन, कामदेवके शरीरका दाह, रतिका शोक, पार्वतीका तपोवन-गमन, विश्वनाथकी प्रसन्नता, पार्वती और सप्तर्षियोंका संवाद, पार्वतीका विवाहोत्सव, कुमार स्कन्दकी उत्पत्ति, कुमारकी विजय, तारकासुरका भयंकर वध, नरसिंहावतारका वर्णन, पद्मोद्भवका विसर्ग,

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अन्धकासुरका वध, वाराणसीका माहात्म्य, नर्मदाका माहात्म्य, प्रवरोंका अनुक्रम, पितृगाथाका वर्णन, उभयमुखी दान तथा कृष्णमृगचर्मके दानका वर्णन, सावित्रीका उपाख्यान, राजधर्मका वर्णन, यात्राके निमित्तका कथन, शुभ-अशुभ स्वप्नों और शकुनोंका निरूपण, वामनका माहात्म्य, वराहका माहात्म्य, क्षीरसागरका मन्थन, कालकूटका दमन, देवों और असुरोंका संग्राम, वास्तुविद्याका कथन, प्रतिमाओंके लक्षण, देवताओंकी आराधना, प्रासादोंका लक्षण, मण्डपोंका लक्षण, भविष्यत्कालीन राजाओंका वर्णन, महादानोंका कथन, कल्पोंका वर्णन तथा ग्रन्थोंकी अनुक्रमणिकाका कथन हुआ है ॥ १५–२८ ॥

एतत् पवित्रमायुष्यमेतत् कीर्तिविवर्धनम् । एतत् पवित्रं कल्याणं महापापहरं शुभम् ॥ २९ ॥
अस्मात् पुराणात् सुकृतं नराणां तीर्थावलीनामवगाहनानाम् ।
समस्तधर्माचरणोद्भवानां सदैव लाभश्च महाफलानाम् ॥ ३० ॥
एतत् पुराणं परमं सर्वदोषविघातकम् । मत्स्यरूपेण हरिणा कथितं मनवेऽर्णवे ॥ ३१ ॥
अस्मात् पुराणादपि पादमेकं पठेत् तु यः सोऽपि विमुक्तपापः ।
नारायणस्यास्पदमेति नूनमनङ्गवद् दिव्यवपुः सुखी स्यात् ॥ ३२ ॥
पुराणमेतत् सकलं रहस्यं श्रद्धान्वितः पुण्यमिदं शृणोति ।
स चाश्वमेधावभृथप्रभावं फलं समाप्नोति हरप्रसादात् ॥ ३३ ॥
शिवं विष्णुं समभ्यर्च्य ब्रह्माणं सदिवाकरम् ।
श्लोकं श्लोकार्धपादं वा श्रद्धया यः शृणोति वा । श्रावयेद् वापि धर्मज्ञस्तत्फलं शृणुत द्विजाः ॥ ३४ ॥
ब्राह्मणो लभते विद्यां क्षत्रियो लभते महीम् । वैश्यो धनमवाप्नोति सुखं शूद्रस्तु विन्दति ॥ ३५ ॥
आयुष्मान् पुत्रवांश्चैव लक्ष्मीवान् पापवर्जितः । श्रुत्वा पुराणमखिलं शत्रुभिश्चापराजितः ॥ ३६ ॥

इति श्रीमात्स्ये महापुराणेऽनुक्रमणिका नामैकनवत्यधिकद्विशततमोऽध्यायः ॥ २९१ ॥

यह पुराण परम पवित्र, आयु प्रदान करनेवाला, कीर्तिवर्धक, परम पावन, कल्याणकारक, बड़े-बड़े पापोंको नष्ट करनेवाला और मङ्गलमय है । इस पुराणसे मनुष्योंको सदैव पुण्य तथा समस्त तीर्थोंमें स्नान करने और सम्पूर्ण धर्माचरणसे उत्पन्न हुए महान् फलोंका लाभ प्राप्त होता है । यह परमोत्तम पुराण सम्पूर्ण दोषोंका नाशक है । इसे मत्स्यरूपधारी श्रीहरिने प्रलयकालमें एकार्णवके जलमें मनुके प्रति कहा था । जो मनुष्य इस पुराणके एक श्लोकके एक चरणका भी पाठ करता है, वह भी पापोंसे मुक्त होकर सुखी हो जाता है तथा कामदेवकी भाँति दिव्य शरीर धारणकर निश्चय ही नारायणके निवासस्थान वैकुण्ठमें चला जाता है । जो मनुष्य श्रद्धापूर्वक इस पुण्यप्रद एवं रहस्यमय सम्पूर्ण पुराणको सुनता है, वह शंकरजीकी कृपासे अश्वमेध-यज्ञके अन्तमें होनेवाले अवभृथ-स्नानके सदृश प्रभावशाली फलको प्राप्त करता है । द्विजवरो ! जो धर्मज्ञ मनुष्य शिव, विष्णु, ब्रह्मा और सूर्यकी अर्चना करके श्रद्धापूर्वक इस पुराणके एक श्लोक, आधे श्लोक अथवा एक चरणको सुनता है अथवा दूसरेको सुनाता है, उसे जो फल प्राप्त होता है, उसे सुनिये । वह ब्राह्मण हो तो विद्या, क्षत्रिय हो तो पृथ्वी, वैश्य हो तो धन और शूद्र हो तो सुख प्राप्त करता है । सम्पूर्ण पुराण सुननेवाला पापरहित होकर आयुष्मान्, पुत्रवान् और लक्ष्मीवान् हो जाता है तथा उसे शत्रु पराजित नहीं कर सकते ॥ २९–३६ ॥

इस प्रकार श्रीमत्स्यमहापुराणमें अनुक्रमणिका नामक दो सौ इक्यानबेवाँ अध्याय सम्पूर्ण हुआ ॥ २९१ ॥

Sri Vidyanidhi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

पुराण-श्रवण-कालमें पालनीय धर्म

श्रद्धाभक्तिसमायुक्ता नान्यकार्येषु लालसाः । वाग्यताः शुचयोऽव्यग्राः श्रोतारः पुण्यभागिनः ॥ १ ॥
अभक्त्या ये कथां पुण्यां शृण्वन्ति मनुजाधमाः । तेषां पुण्यफलं नास्ति दुःखं स्याज्जन्मजन्मनि ॥ २ ॥
पुराणं ये च सम्पूज्य ताम्बूलाद्यैरुपायनैः । शृण्वन्ति च कथां भक्त्याऽदरिद्राः स्युर्न संशयः ॥ ३ ॥
कथायां कीर्त्यमानायां ये गच्छन्त्यन्यतो नराः । भोगान्तरे प्रणश्यन्ति तेषां दाराश्च सम्पदः ॥ ४ ॥
सोष्णीषमस्तका ये च कथां शृण्वन्ति पावनीम् । ते बलाकाः प्रजायन्ते पापिनो मनुजाधमाः ॥ ५ ॥
ताम्बूलं भक्षयन्तो ये कथां शृण्वन्ति पावनीम् । श्वविष्ठां खादयन्त्येतान्नयन्ति यमकिंकराः ॥ ६ ॥
ये च तुङ्गासनारूढाः कथां शृण्वन्ति दाम्भिकाः । अक्षय्यान्नरकान् भुक्त्वा ते भवन्त्येव वायसाः ॥ ७ ॥
ये वै वरासनारूढा ये च मध्यासनस्थिताः । शृण्वन्ति सत्कथां ते वै भवन्त्यर्जुनपादपाः ॥ ८ ॥
असम्प्रणम्य शृण्वन्ति विषभक्षा भवन्ति ते । तथा शयानाः शृण्वन्ति भवन्त्यजगरा नराः ॥ ९ ॥

जो लोग श्रद्धा और भक्तिसे सम्पन्न, अन्य कार्योंकी लालसासे रहित, मौन, पवित्र और शान्तचित्तसे (पुराणकी कथाको) श्रवण करते हैं, वे ही पुण्यके भागी होते हैं। जो अधम मनुष्य भक्तिरहित होकर पुण्यकथाको सुनते हैं, उन्हें पुण्यफल तो मिलता नहीं, उलटे प्रत्येक जन्ममें दुःख भोगना पड़ता है। जो लोग ताम्बूल, पुष्प, चन्दन आदि पूजन-सामग्रियोंद्वारा पुराणकी भलीभाँति पूजा करके भक्तिपूर्वक कथा सुनते हैं, वे निःसंदेह दरिद्रतारहित अर्थात् धनवान् होते हैं। जो मनुष्य कथा होते समय अन्य कार्यके लिये वहाँसे उठकर अन्यत्र चले जाते हैं, उनकी पत्नी और सम्पत्ति नष्ट हो जाती है। जो पापी अधम मनुष्य मस्तकपर पगड़ी बाँधकर (या टोपी लगाकर) पवित्र कथाको सुनते हैं, वे (दूसरे जन्ममें) बगुला होकर उत्पन्न होते हैं। जो लोग पान चबाते हुए पवित्र कथाको सुनते हैं, उन्हें कुत्तेका मल खाना पड़ता है और यमदूत उन्हें यमपुरीमें ले जाते हैं। जो ढोंगी मनुष्य (व्यासासनसे) ऊँचे आसनपर बैठकर कथा सुनते हैं, वे ही अक्षय नरकोंका भोग करके कौआ होते हैं। जो लोग (व्यासासनसे) श्रेष्ठ आसनपर अथवा मध्यम आसनपर बैठकर उत्तम कथाको श्रवण करते हैं, वे अर्जुन नामक वृक्ष होते हैं। जो मनुष्य (पुराणकी पुस्तक और व्यासको) बिना प्रणाम किये ही कथा सुनते हैं, वे विषभक्षी होते हैं तथा जो लोग सोते हुए कथा सुनते हैं, वे अजगर साँप होते हैं ॥ १-९ ॥

यः शृणोति कथां वक्तुः समानासनसंस्थितः । गुरुतल्पसमं पापं सम्प्राप्य नरकं व्रजेत् ॥ १० ॥
ये निन्दन्ति पुराणज्ञान् कथां वै पापहारिणीम् । ते वै जन्मशतं मर्त्याः सूकराः सम्भवन्ति हि ॥ ११ ॥
कथायां कीर्त्यमानायां ये वदन्ति दुरुत्तरम् । ते गर्दभाः प्रजायन्ते कृकलासास्तथैव च ॥ १२ ॥
कदाचिदपि ये पुण्यां न शृण्वन्ति कथां नराः । ते भुक्त्वा नरकान् घोरान् भवन्ति वनसूकराः ॥ १३ ॥
ये कथामनुमोदन्ते कीर्त्यमानां नरोत्तमाः । अशृण्वन्तोऽपि ते यान्ति शाश्वतं परमं पदम् ॥ १४ ॥
कथायां कीर्त्यमानायां विघ्नं कुर्वन्ति ये शठाः । कोट्यब्दं नरकान् भुक्त्वा भवन्ति ग्रामसूकराः ॥ १५ ॥
ये श्रावयन्ति मनुजान् पुण्यां पौराणिकीं कथाम् । कल्पकोटिशतं साग्रं तिष्ठन्ति ब्रह्मणः पदे ॥ १६ ॥
आसनार्थं प्रयच्छन्ति पुराणज्ञस्य ये नराः । कम्बलाजिनवासांसि मञ्चं फलकमेव च ॥ १७ ॥
स्वर्गलोकं समासाद्य भुक्त्वा भोगान् यथेप्सितान् । स्थित्वा ब्रह्मादिलोकेषु पदं यान्ति निरामयम् ॥ १८ ॥

इसी प्रकार जो वक्ताके समान आसनपर बैठकर कथा सुनता है, वह गुरु-शय्या-गमनके समान पापका भागी होकर नरकगामी होता है। जो मनुष्य पुराणोंके ज्ञाता (व्यास) और पापोंको हरण करनेवाली कथाकी निन्दा करते हैं, वे सौ जन्मोंतक सूकर-योनिमें उत्पन्न होते हैं। कथा होते समय जो लोग वक्ताको बुरा उत्तर देते हैं, वे गदहा तथा गिरगिटकी योनिमें पैदा होते हैं। जो मनुष्य इस पुण्य कथाको कभी भी नहीं सुनते,

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

वे घोर नरकोंका भोग करके वनैले सूअर होते हैं। जो नरश्रेष्ठ कही जाती हुई कथाका अनुमोदन करते हैं, वे कथा न सुननेपर भी अविनाशी परम पदको प्राप्त होते हैं। जो दुष्ट कही जाती हुई कथामें विघ्न पैदा करते हैं, वे करोड़ों वर्षोंतक नरकोंका भोग करके अन्तमें ग्रामीण सूअर होते हैं। जो लोग साधारण मनुष्योंको पुराणसम्बन्धिनी पुण्य कथा सुनाते हैं, वे सौ करोड़ कल्पोंसे भी अधिक समयतक ब्रह्मलोकमें निवास करते हैं। जो मनुष्य पुराणके ज्ञाता वक्ताको आसनके लिये कम्बल, मृगचर्म, वस्त्र, सिंहासन और चौकी प्रदान करते हैं, वे स्वर्गलोकमें जाकर अभीष्ट भोगोंका उपभोग करनेके बाद ब्रह्मा आदिके लोकोंमें निवास कर अन्तमें निरामय पदको प्राप्त होते हैं ॥ १०-१८ ॥

पुराणस्य प्रयच्छन्ति ये वरासनमुत्तमम्। भोगिनो ज्ञानसम्पन्ना भवन्ति च भवे भवे ॥ १९ ॥
ये महापातकैर्युक्ता उपपातकिनश्च ये। पुराणश्रवणादेव ते प्रयान्ति परं पदम् ॥ २० ॥
एवंविधविधानेन पुराणं शृणुयान्नरः। भुक्त्वा भोगान् यथाकामं विष्णुलोकं प्रयाति सः॥ २१ ॥
पुस्तकं पूजयेत् पश्चाद् वस्त्रालंकरणादिभिः। वाचकं विप्रसंयुक्तं पूजयीत प्रयत्नवान् ॥ २२ ॥
गोभूमिहेमवस्त्राणि वाचकाय निवेदयेत्। ब्राह्मणान् भोजयेत् पश्चान्मण्डलड्डुकपायसैः॥ २३ ॥
त्वं व्यासरूपी भगवन् बुद्ध्या चाङ्गिरसोपमः। पुण्यवाञ्शीलसम्पन्नः सत्यवादी जितेन्द्रियः ॥ २४ ॥
प्रसन्नमानसं कुर्याद् दानमानोपचारतः। त्वत्प्रसादादिमान् धर्मान् सम्पूर्णाञ्श्रुतवानहम् ॥ २५ ॥
एवं प्रार्थनकं कृत्वा व्यासस्य परमात्मनः। यशस्वी च भवेन्नित्यं यः कुर्यादेवमादरात् ॥ २६ ॥
नारदोक्तानिमान् धर्मान् यः कुर्यान्नियतेन्द्रियः। कृत्स्नं फलमवाप्नोति पुराणश्रवणस्य वै ॥ २७ ॥

इसी तरह जो लोग पुराणकी पुस्तकके लिये उत्तम श्रेष्ठ आसन प्रदान करते हैं, वे प्रत्येक जन्ममें भोगोंका उपभोग करनेवाले एवं ज्ञानी होते हैं। जो महापातकोंसे युक्त होते हैं अथवा जो उपपातकी होते हैं, वे सभी पुराणकी कथा सुननेसे ही परम पदको प्राप्त हो जाते हैं। जो मनुष्य इस प्रकारके नियम-विधानसे पुराणकी कथा सुनता है, वह स्वेच्छानुसार भोगोंको भोगकर विष्णुलोकको चला जाता है। कथा समाप्त होनेपर श्रोता पुरुष प्रयत्नपूर्वक वस्त्र और अलंकार आदिद्वारा पुस्तककी पूजा करे। तत्पश्चात् सहायक ब्राह्मणसहित वाचककी पूजा करे। उस समय वाचकको गौ, पृथ्वी, सोना और वस्त्र देना चाहिये। तदुपरान्त ब्राह्मणोंको मलाई, लड्डू और खीरका भोजन कराना चाहिये। तदनन्तर परमात्मा व्याससे प्रार्थना करे—'आप व्यासरूपी भगवान् बुद्धिमें बृहस्पतिके समान, पुण्यवान्, शीलसम्पन्न, सत्यवादी और जितेन्द्रिय हैं, आपकी कृपासे मैंने इन सम्पूर्ण धर्मोंको सुना है।' इस प्रकार प्रार्थना कर दान, मान और सेवासे उनके मनको प्रसन्न करना चाहिये। जो मनुष्य इस प्रकार आदरपूर्वक करता है, वह सदा यशस्वी होता है। जो जितेन्द्रिय मनुष्य देवर्षि नारदद्वारा कहे गये इन धर्मोंका पालन करता है, वह पुराण-श्रवणका सम्पूर्ण फल पाता है ॥

सूत उवाच

मत्स्यरूपी स भगवान् मनवे बुद्धिशालिने। अवपोद्घातसहितमुक्त्वा ह्यन्तर्दधौ तदा ॥ २८ ॥

इति पुराणश्रवणकालीनधर्माः ।

इति श्रीमद्द्वैपायनमुनिप्रणीतं मत्स्यपुराणं समाप्तम् ।

सूतजी कहते हैं—ऋषियो! उस समय मत्स्यरूपी भगवान् बुद्धिशाली मनुसे आदि-अन्त-सहित इस पुराणको कहकर अन्तर्हित हो गये ॥ २८ ॥

इस प्रकार श्रीमद्द्वैपायनमुनिप्रणीत मत्स्यपुराण समाप्त हुआ ॥

Sri Vidyabharathi Book Centre, Sringeri

॥ श्रीहरिः ॥

CC-O. In Public Domain. Digitized by eGangotri

'कल्याण'के आगामी ६०वें वर्ष १९८६का विशेषाङ्क

'संकीर्तनाङ्क'

भारतीय संस्कृतिमें अपने शास्त्रों, ऋषि-महर्षियों, संत-महात्माओं और भगवद्भक्तोंने अनुभव कर यह निष्कर्ष निकाला और उद्घोषित किया कि कलियुगमें मनुष्यके कल्याणका मुख्यतम सर्वसुलभ और सरल साधन श्रीभगवन्नाम-संकीर्तन ही है। आज देशकी विषम परिस्थितियोंमें तथा विश्वके अशान्त वातावरणमें (जब कि जगत्‌में जीवनकी जटिलताएँ और तनाव बढ़ते जा रहे हैं, सम्पूर्ण मानवजाति शान्तिकी खोजमें व्याकुल है, ऐसे समयमें) 'कल्याण'ने यह निर्णय किया है कि अगले वर्ष १९८६ई० में जनकल्याणार्थ विशेषाङ्कके रूपमें 'संकीर्तनाङ्क' प्रकाशित किया जाय, जिसमें श्रीभगवन्नाम-संकीर्तनसे सम्बद्ध गूढ़ रहस्यों, महत्त्वों, संकीर्तनसे श्रेयःस्वरूप भगवत्-प्राप्ति करनेवाले संत-महात्माओंके चरित्रोंकी विशेषताओं एवं संकीर्तनकी समसामयिक उपयोगिताका सरल-सुगम दिग्दर्शन साधनरूपमें कराया जाय। इस साधनके प्रचार-प्रसारसे प्राणिमात्रका वास्तविक कल्याण तो होगा ही, साथ ही आजके भौतिक वातावरणमें विश्व-प्रेम, सद्भाव और सौहार्द भी बढ़ेंगे तथा भगवान्‌की कृपासे मानव-मात्रमें सद्‌वृत्तियोंका उदय होगा एवं विश्व-कल्याण, विश्व-शान्तिकी दिशामें प्रगति होगी।

एक विशेष प्रसन्नताकी बात यह है कि श्रीभगवन्नाम-संकीर्तनके समर्थ प्रेरक संत श्रीचैतन्य महाप्रभुका पञ्चशती-समारोह भी इसी वर्ष मनाया जा रहा है। अतः महाप्रभुका संकीर्तन-संदेश जन-जनतक पहुँच जाय—यह भी हमारा अन्यतम लक्ष्य है।

इन सबके लिये हम भारतके गण्य-मान्य आचार्य, संत-महात्माओं, अधिकारी मनीषी लेखकों एवं सङ्कीर्तन-प्रेमियोंसे सहयोगकी प्रार्थना करते हैं। हम संकीर्तनके प्रत्येक पक्षपर पठनीय, विचार्य, प्रेरक एवम् अनुष्ठेय सामग्रीका संकलन इस विशेषाङ्कमें देना चाहते हैं। अतः विद्वान् लेखकोंकी सेवामें विशेषाङ्ककी एक संक्षिप्त वाञ्छनीय सूची दिशा-निर्देशके ढंगपर यहाँ दी जा रही है। हमारी आपसे विनम्र प्रार्थना है कि आप अपनी रचना ३१ जुलाई १९८५ के पूर्व अवश्य भेज देनेकी कृपा करें।

—राधेश्याम खेमका
(सम्पादक)

संकीर्तनाङ्ककी संक्षिप्त विषय-सूची

१–संकीर्तनकी शास्त्रीय परिभाषा
२–कीर्तन-संकीर्तनका विवेचन
३–कलिजुग केवल हरि गुन गाहा
४–संकीर्तनमें नाम-महिमा
५–नाम-वन्दना, नाम-स्तुति
६–'कीर्तनीयः सदा हरिः'
७–नाम-संकीर्तनके विविध स्वरूप और महत्त्व
८–नामके साथ लीला, गुण, रूप और चरित्र-कीर्तनका महत्त्व
९–'कलौ तद्धरिकीर्तनात्'
१०–अन्य भक्ति-साधनोंकी अपेक्षा संकीर्तनका वैशिष्ट्य
११–कीर्तनका नवधा भक्तिमें स्थान और महत्त्व
१२–संकीर्तनमें तन्मयता और समाधि
१३–संकीर्तनमें भगवद्दर्शन और भगवत्-साक्षात्कार
१४–संकीर्तनसे योगावस्थाकी प्राप्ति

कृ० पृ० उ०

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

मिलनेका पता

गीताप्रेस, पो० गीताप्रेस (गोरखपुर)

Sri Vidyabharathi Book Centre, Sringeri